॥ श्रीकाशीविश्वनाथपुरी में महल्ला छोटकीपियरीपर बाबू कौलेश्वरसिंह के मकान में बाबू किशुनदयालसिंह के गणेशप्रभाकर छापाखाने में छापा गया जिसे लेना होय उसे चौक में नई सडक पर बाबू कौलेश्वरसिंह के दुकान पर मिलैगा

अथ सिद्धांतचंद्रिका उत्तरार्द्ध प्रारंभः

शोधा बालशास्त्री प्रभुणे ने लिखा हरिनंन्दन. छापनेवाला रामदत्त॥ ६ ॥ ६ ॥ ६ ॥ ❁ ॥ ❁ ॥

अथचंद्रिकाउत्तराईसूत्रलघुभाष्यसहित प्रारम्भः ॥

चे॰ अ॰
ल॰ भा॰
१

अतिशयेनप्रसिद्ध

ओंश्रीगणेशायनमः नमामिविघ्नराशीनां हर्तारं जानकीयुतं ॥ राघवं यं प्रथमं तोभूत्यैभवतु सोऽचिरात् १ ऊंगोपिकावल्लभं नत्वा गिरं भट्टोजिदीक्षितं ॥ विभक्तीर्दशवक्ष्येहं मुनित्र
यमताश्रयः १ स्यादयःकथिताः पूर्वं स्त्रीसामासिकतद्धिताः ॥ आख्याताश्चाथकथ्यंते जिसुपङ् यकृदादयः २ अधिकारोयंप्राङ् नाम्नोयदित्यतः स्यादेतत् किमर्थोऽयमधिकारः न ताव
न्नामव्यावृत्त्यर्थः स्यादिभिरेववाधात् तक्रकौंडिन्यन्यायेन तेषां विशेषविधानात् यत्तु औपगवः पचतिरूपमित्यादौ विभक्त्यंतस्यापि प्रकृतित्वात् तथा च लुक् सूत्रे प्रत्ययग्रहणं उप
पद्यते तदेवं प्रकृत्यंतरस्यव्यवच्छेदार्थं अवश्यंधातुः प्रकृतिर्वक्तव्येति माधवेनोक्तं तन्न प्रकृत्यर्थस्य प्रत्ययार्थस्य चानन्वयात् तथाहि प्रकृत्यर्थौ हि द्रव्यं कारकं च आख्याता
र्थस्तु कर्तृकर्मणी तयोरन्वयो नास्ति कारकाणां क्रियायैवाऽन्वयनियमात् दृष्टांते हि प्रकृत्यर्थप्रत्ययार्थयोः संबंधबोधिका विभक्तिः लुप्तायामपि तस्यां शिष्यमाणेन तद
र्थबोधनं सुतिलाच्च शातंयंतरकल्पनं च भवतीति वाच्यं तेच न तत्र येति सिवं तव्यावृत्तिर्न फलं अत एव तिवाद्यंतव्यावृत्तिरपि न पचतीत्यत्रैकेन तिपा एकाश्रयिकायां क्रिया
यां बोधितायामपरेणान्याश्रयायाः क्रियायाः बोधनस्याशक्यत्वात् प्रथमेनैव संख्याकारकादेरभिहितत्वेन द्वितीयस्य प्रयोगाप्रसंगाच्च प्रथमस्य समासप्रत्ययोरितिलोपे

श्रीगणेशायनमः ॥ धातोः १ वर्त्तमाने तिप् तस् अन्ति सिप् थस् थ मिप् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे ॥ २ ॥

नुतदर्थस्यानवबोधाच्चकर्तृद्वयादिप्रतिपिपादयिषायां तु पचत इत्यादेरेव प्रयोगस्य युक्तत्वात् अतस्तिवंतव्यावृत्तिरपि न फलं यदपि किंचाधिकारार्थमपि धातोर्यया
स्यात् धातूपसर्गसमुदायस्य माभूत् प्रकर्तुमिच्छतीति माधवेनोक्तं तदपि न चुरादौ संग्रामङ् युद्ध इति विशिष्टपाठेन धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते
उपसर्गे समानाकार पूर्वपदं दृश्यकृतं किं पत इति ज्ञापितेन गतार्थत्वात् अन्यथास्वमनायत उदमनायत प्रापीपचत् मादीदत् इत्यादौ दोषस्य दुर्वारत्वात् तन्ना
पकमित्यं वर्णनीयं सोपसर्गाच्चेत्प्रत्ययस्तर्हि संग्रामङ् एवेति एवं व्यर्थोधिकार इति चेत् उच्यते ऊरीकरोति शुक्लीभवति सहायीस्यात् इत्यादौ ऊर्य्यादिच्व्यंतयो
र्धातोः प्राक् प्रयोगस्य नियतत्वेन विशिष्टात्प्रत्ययोत्पत्तिर्दुर्वारा तथा चाङ् द्वित्वयोर्दोषः स्यादित्यधिकार इति दिक् १ तिवाद्येकं पदं अष्टादशवाप्यदानि व्यापारे इति शेषः राम॰
व्यापारः क्रिया सा च धातोर्वाच्या सा त्रिविधा अतीतानागतवर्तमानभेदात् तत्र वर्तमानक्रियायां वर्तेर्धातोस्तिवादयः ते च द्योतका भवंति वर्तमानक्रियायाधातुनैवोक्तत्वा ते १

एवमतीतादिष्वपि ज्ञेयं पदित्तु सद्य आदिरित्यतः कालइत्यनुवर्तते वर्तमाने काले वाच्ये तिवादय इति व्याख्यायते तदा वाचकतापक्षो भवति कालस्य धात्वनामभिहित
त्वात् कालोऽष्टद्रव्यातिरिक्तं नवमं द्रव्यमिति वैशेषिकादिमतं ईश्वरस्यैव मूर्तिभेदः काल इति वेदांतिमतं प्रधानस्यैवावस्थाभेद इति सांख्यादिमतं पक्षत्रयेपि तस्यैक
त्वात् वर्तमानादिभेदाऽभावेऽपि वर्तमानादिक्रियोपाधिवशात् वर्तमानादिव्यपदेशो बोध्यः येतु प्रसिद्धपरिमाणां सूर्यादिक्रियां अप्रसिद्धपरिमाणक्रियायाऽवच्छेदिकां
कालमाहुः सूर्यस्य उदयाचलसंयोगादारभ्यास्ताचलसंयोगपर्यंता क्रियादिनमुच्यते अस्ताचलसंयोगादारभ्योदयाचलसंयोगपर्यंता क्रिया रात्रिरित्युच्यते तदावृत्त्या
तु पक्षमासादिव्यवहारः कालस्याप्यऽनित्यत्वाऽनेकत्वात् तेषां मुख्य एव वर्तमानादिव्यपदेशः अथ को वर्तमानो नाम उच्यते लोकप्रसिद्ध एव तदुक्तं फणिना लोकत एव
वैतत्सिद्धं नहीदं लोकाद्भिद्यते यदीदं लोकाद्भिद्येत तर्हि यत्नाः हं स्यादिति लौकिका हि प्रारब्धाऽपरिसमाप्तं वर्तमानं व्यवहरंति मार्कंडेयश्चिरंजीवति तस्य हि जन्मतः प्रा
राधारणमद्याप्यपरिसमाप्तमिति तिवादिप्रयोगः ननु अजीवीत् जीविष्यति वा चतुर्युगसहस्रांतं ब्रह्मणो दिनं वर्तते नत्ववर्तत वर्तिष्यते वेति विंशत्यादिवर्षपर्य
तं वेदाध्ययनेऽपि अधीते इति प्रयुज्यते नत्वऽध्यैष्ट अध्येष्यते वा येतु भूतभविष्यद्भिन्नो वर्तमान इत्याहुः तन्मते वर्तमानभविष्यद्भिन्नो भूतः भूतवर्तमानभिन्नो भवि
ष्यन्नित्यपि स्यात्तत आन्योन्याश्रयदोषप्रसंगः यत्तु संप्रति वर्तमान इति कालायसूत्रं वर्तमानसंज्ञाविधायकं तत्तुच्छं लोकत एव सिद्धत्वात् तदुक्तं भगवता पाणि
निना कालोपसर्जने च तुल्यं वर्तमानादिकालसंज्ञा अप्रधानमुपसर्जनमिति नवक्तव्यं अर्थस्याऽन्यप्रमाणत्वात् तस्यार्थस्य लोकत एव सिद्धत्वात् अथ पर्वतास्ति
ष्ठति भूरस्तीत्यादौ कथं वर्तमानादिः आरब्धापरिसमाप्तत्वाद्यभावात् उच्यते सृष्टिसंहारश्रुतिप्रामाण्यस्वीकर्तॄणां मतेऽत्राप्यस्ति वर्तमानत्वं कल्पादौ प्रार
ब्धायाः स्थितेरपरिसमाप्तत्वात् तस्थुः पर्वताः भविष्यति भूरित्यादौ त्वतीतानागतकल्पावादाय भूतभविष्ये बोध्ये मीमांसकमते त्वनुपपत्तिः भूतानां सृष्टिप्रल
यानंगीकारात् न कदाचिदनीदृशं जगदित्यभ्युपगमात् वैशेषिकमते आकाशोस्तीत्यनुपपत्तिः आत्मास्तीति सर्वेषां मतेप्यऽनुपपत्तिः अत्र माधवः इह पर्वतादि
स्थित्यादेः सर्वदाभावात् स्वतो भूतत्वाद्ययोगेपि कालत्रयवर्तिनां राज्ञां भूतादिभेदभिन्नपालनादिक्रियाभेदात्तस्थुः पर्वता नलनहुषादिकाले स्थास्यंतिकल्कि
विष्णुकाले तिष्ठंतीदानींतनभूपकाल इति भूतत्वादियोग इत्याह आत्मनस्तु देहाद्युपाध्यऽतीतत्वादिनाप्यतीतत्वादिसंभवोस्ति। अथ वर्तमानग्रहणं मासुसा मान्ये

च॰ आ॰ ल॰ भा॰ २

नतिवादयोर्विधीयेते अतीतानागतयोः सिस्यपौबाधकौ स्यातां विशेषविधानादितिचेत् उच्यते वर्तमानसमीपे भूते भविष्यति च तिवादिसिद्ध्यर्थं वर्तमानग्रहणं तद्बृह
द्भाष्यासामर्थ्याज्ज्ञेणस्यापि वर्तमानस्य ग्रहणं भवति अन्यथा भूतत्वभविष्यत्वयोः सत्वात् तत्र सिस्यपावेवस्यातां कदागमिष्यसि एष गच्छामि गमिष्यामि वा कदागतो
ऽसि अयमागच्छामि अयमागमं वा वर्तमानत्वं क्रियायामन्वेति न फलेन तदाश्रयेन कर्तरि यदि फले अन्वीयात् तर्हि मासात्पूर्वं पक्वे ओदने इदानीं पचतीति प्रयोगः स्यात्
विक्लित्तेर्वर्तमानत्वात् नतु अपाक्षीदिति यदि फलाश्रये अन्वीयात् तर्हि मासानंतरं यास्यमाने ग्रामे ग्रामं यातीति प्रयोगः स्यात् फलसंयोगाश्रयस्य ग्रामस्य वर्तमानत्वात्
नतु ग्रामं यास्यतीति यदि तु कर्तर्यन्वीयात् तर्हि मासात्पूर्वं पाकं कृतवति मासानंतरं वा पाकं करिष्यति पुरुषे दृष्टे इदानीं पचतीति प्रयोगः स्यात् कर्तुः पुरुषस्य विद्यमानत्वात्
नतु अपाक्षीत् पक्ष्यतीति वा अयमत्र संग्रहः क्रियाफलयोर्वोधको धातुः तत्र धातुत्वेन ——— सर्वानुगतेन क्रियाबोधकत्वं धातोः प्रातिस्विकेन रूपेणाभूतपक्त्वाऽऽदिना फलबो
धकत्वं कालः संख्या कारकं चाख्यातार्थः तत्र तिवादित्वेन कालोऽर्थः तिपत्वतस्त्वांतित्वेन एकत्वद्वित्वबहुत्वरूपा संख्यार्थः आत्वेन भावकर्मणी अर्थः आत्वेनपत्वेन च कर्तार्थः
तत्र च फलस्य कर्मणि अन्वयः फलाश्रयस्य कर्मत्वात् व्यापारस्य कर्तरि अन्वयः धातूपात्तव्यापाराश्रयस्य कर्तृत्वात् संख्यायास्तु कर्तरि प्रत्यये कर्तर्यन्वयः कर्मणि प्रत्य
ये कर्मणि कालस्य क्रियायां कर्तृकर्मणी क्रियायां विशेषणे क्रिया तु विशेष्या इदं तु शाब्दिकमीमांसिकयोस्तुल्यं क्रिया प्रत्ययार्थ इति मीमांसकाः प्रत्ययार्थस्यैव प्राधान्य
मिति नियमात् कर्तृकर्मणीत्वाक्षेपलभ्येन त्वाख्यातवाच्ये वैयाकरणास्तु धात्वर्थः क्रिया क्रियावचनस्यैव धातुत्वादित्याहुः ननु प्रत्ययार्थप्राधान्यनियमोपि कीदृशः
यः प्रत्ययार्थः स प्रधानमेव यत्प्रधानं स प्रत्ययार्थ एवेति वा नाद्यः स्त्रीप्रत्यये स्त्रीत्वस्य प्रत्ययार्थस्य प्राधान्याऽभावात् प्रत्ययार्थस्य कालस्य संख्यायाश्च प्राधान्याभावात् नान्त्यः स्त्री
प्रत्ययान्तेप्रधानस्य द्रव्यस्य प्रत्ययार्थत्वाभावात् शुक्लतरः विद्वद्रूपः पचतितमां भिषक्या शङ्क्यादौ प्रत्ययार्थस्यातिशयादेः प्राधान्यादर्शनात् अप्रत्ययार्थस्य राजपुरुषश्त्यादौ
पुरुषादेः प्राधान्यदर्शनाच्च कर्तृकर्मणोराख्यातार्थत्वे आद्भुविकर्मणीति कर्तरि पचेति सूत्रं मानमस्ति क्रियायास्तदर्थत्वेन मानमस्ति किं च कृतवान् भोक्तुं पक्वोत्पादैके क्रि
याप्रतीति रुक्लित्वधातुरप्यस्तितेन धातोरेव क्रियावाचित्वं युक्तं न त्वाख्यातस्य कृदंते आक्षेपलभ्या क्रियाइतिचेत् तर्हि आख्यातेपि तथैवास्तु न चाक्षिप्तायाः क्रियायाः
प्राधान्यं न स्यादिति वाच्यं घटादिशब्दैर्वाच्ययाजात्याऽऽक्षिप्तायाः व्यक्तेः प्राधान्यदर्शनात् सत्वप्रधानानि नामानि क्रियाप्रधानमाख्यातमिति वचनाच्च

सम॰ २

प्राधान्यसंभवात् किंच कर्तुरवाच्यत्वे आख्यातोक्तसंख्यायाश्चानन्वयप्रसंगात् अथवा चैत्रः कर्तरि यद्यन्वयः स्यात् तर्ह्यविशेषात्कर्मादावपि स्यात् मन्मते तु आख्या
तार्थकारके आख्यातार्थसंख्याया अन्वयः संभवति समानप्रत्ययोपात्तत्वात् किंच उक्तानुक्तव्यवस्था च न स्यात् सर्वत्राख्यातेतस्यानभिहितत्वादिति दिक् तार्किका
स्तु प्रथमांतविशेष्यकं बोधमाहुराख्यातस्य च यत्नमर्थं यत्नार्थककरोतिना सर्वाख्यातविवरणात् कर्तुश्चावाच्यतां कृतिमतो वाच्यत्वापेक्षया कृतेर्वाच्यत्वं लाघवात् अव
च्छेदकं कृतित्वरूपं सामान्यं लघु लभ्यते इत्याहुः मत्वर्थलक्षणया च संसर्गमर्यादया वा कृतिमान् देवदत्तो लभ्यत इत्याहुः उच्यते अस्मन्मते कर्ता वाच्यः स च धातूपात्त
व्यापाराश्रयः व्यापारस्तु धातुनैवोक्तः आश्रयमात्रं प्रत्ययार्थः आश्रयत्वं तत्त्वच्छेदकं तच्चाखंडोपाधिरूपमतो नास्माकं गौरवगंधोपि किंच त्वन्मते लक्ष्यतावच्छेद
कस्य गौरवेपि न दोषः शक्यतावच्छेदकस्य तु दोषः इत्यत्र विनिगमकं नास्ति बीजाभावात् अत उभयोरपि गौरवं लाघवं वा तु किंचास्मन्मते कृतिरपि धातुनैवोक्ता परं तु
न कृतित्वेन किंतु व्यापारत्वेन कृतेरपि व्यापारविशेषरूपत्वात् अतः सा न प्रत्ययार्थोन्यलभ्यत्वादनन्यलभ्यस्यैव शब्दार्थत्वांगीकारात् अपि च करोतेर्यत्नार्थत्वं यदुक्तं तद
पि न करोतिः कृत्याद्यर्थः इति वक्ष्यते केवलयत्नार्थत्वे पततीत्यादेः कर्मकता स्यात् करोतिना सर्वाख्यातविवरणादित्यप्युक्तमयुक्तं नहि करोतिनाख्यातानां विवरणे किं
तु धातुनाख्यातस्य तु आख्यात एव विवरणं पचति पाकं करोति शेते शयनं करोति यदपि प्रथमांतपदेनैव कर्ता लभ्यते तदपि न देवदत्तपदेन देवदत्तत्वेन देवदत्त उपस्था
प्यते न कर्तृत्वेन प्रथमायाः अपि नामार्थमात्रे विधानात् अन्योक्ते प्रथमापि न संभवति तव मते कर्तुराख्यातेनोक्तत्वाभावात्कर्तरि तृतीयेवस्यादाख्यातेनानुक्तत्वात् अ
न्योक्त इति उक्ते कर्तरि प्रथमा विधीयते न च कर्तृनिष्ठसंख्याया अभिधानात्कर्तोप्यभिहित एवेति वाच्यं मुख्याभिधाने संभवति गौणोक्तत्वग्रहणस्यान्याय्यत्वात् क्वचि
त्संख्योक्ता गृह्यते क्वचिच्च कर्तेति शास्त्रार्थस्य वैरूप्यप्रसंगाच्चेति कृत्तद्धितसमासैः संख्यायाश्चानभिधानात् किंच कर्तुरवाच्यत्वे नाग्निश्चेति पुरुषव्यवस्था न स्यात् समा
नाधिकरणे युष्मदादौ सति मध्यमादिर्विधीयते आख्यातेन युष्मदस्मदोः सामानाधिकरण्यं कर्तुर्वाच्यत्वे सत्येव संभवति नान्यथा न च युष्मदि सति मध्यम इति व्याख्ये
यमिति वाच्यं त्वां पश्यति पश्यामि वेत्यत्रातिव्याप्तेः न च युष्मदि कर्तरि सति मध्यमो भवतीति वाच्यं त्वया मया वा पच्यत इत्यत्रातिव्याप्तेः किंच रथो गच्छतीत्यादावप्रस
क्तिः स्यात् कृत्यभावात् न चात्र व्यापारे लक्षणेति वाच्यं गौरवात् शक्यसंबंधो लक्षणेति शक्यं संबंधश्चोभयं ज्ञातव्यं मन्मते तु शक्तमात्रं ज्ञातव्यमिति लाघवं लक्ष

वै आ
लभा
२

स्यापि नाधुनिकी किंतु निरूढा वाच्याभूत्तिष्ठति आ पोगस्थैतीत्यादिप्रयोगस्यानादित्वात् निरूढलक्षणा च शक्तितो नाममात्रेण भिन्ना न वस्तुत इति दिक् ॥ धात्तोर्यादास्य प्रत्ययाः स्युर्विधिसंभावनयोर्वाच्ययोः इत्यर्थं वाचकतापक्षः न चात्र पक्षे विध्यादिनार्थेन कर्त्रादावर्थे बाधः विरोधाभावात् किंच कर्त्रादिरपि निरवकाशः न च तिवादावकाशः स्यात् सामान्येन विध्यादिवत् वर्तमानत्वभूतत्वादेरपि तिवादिदिवादिवाच्यत्वात् न चैवं धात्वर्थे प्रति वर्तमानत्वादेः प्रत्ययार्थत्वेन यार्विशेष्यत्वं स्यादिति वाच्यं कर्त्रादावपि तुल्यत्वात् ननु प्रत्ययार्थप्राधान्यमौत्सर्गिकमप्याख्याते त्यज्यते इति चेत् तर्हि तत एवमोक्तदोषावकाश इति यद्वा विधिसंभावनयोर्वर्तमानाद्धातोर्यादास्य प्रत्ययाः स्युः विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थे विशेषणत्वे द्योतकतापक्षो ऽयं संभवति तत्रेयमुपपत्तिः विध्यादीनां प्रत्ययार्थत्वं नोचितं तथा सति कर्त्रादेरर्थस्य प्रत्ययान्तरे चरितार्थस्य विध्यादयो ऽर्था बाधकाः स्युः न च प्रत्ययान्तरेपि वर्तमानत्वादिभिर्बाधात् कर्त्रादिरप्यनवकाशत्वाद्बाधकः स्यादिति वाच्यं वर्तमानादेरपि धात्वर्थत्वाभ्युपगमात् ततश्च प्रत्ययान्तरे सावकाशस्य कर्त्रादेर्यादादिभिरभिधानेन स्यात् ततश्च द्विवचनबहुवचनेन स्यातां अवादयश्च न स्युः पुरुषव्यवस्था च न स्यात्

विधिसंभावनयोः याते यातां युस्' यास् यातं यात याम् याव याम ईत ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि ॥ २ ॥

उक्तोत्वमपुक्ताप्रथमा च न स्यादिति विपूर्वाद्धात्रोन्तर्भावितण्यर्थान्नरः कीतिभावे किः विधविधाने इत्यस्मादन्तर्भावितण्यर्थाद्वा किः विधानं वेधनं वा विधिः अनुष्ठापने कारणप्रवर्तनेति यावत् यादादिवाच्या साधात्वर्थस्य विशेष्या विशेषणीया शिष्योगरुशुश्रूषकोभवेत् एकशिष्याश्रयागुरुनिष्ठप्रीतिजननानुकूला या क्रिया तद्विषया प्रेरणेति विशेष्यपक्षः प्रेरणाविषया एकशिष्याश्रयागुर्वाश्रयप्रीतिजननानुकूला क्रियेति विशेषणपक्षः उभयथापि क्रियाप्रधानमाख्यातमित्यस्य न कश्चिद्विरोधः यादाद्यभिधेयायाः प्रवर्तनायाः अपि क्रियारूपत्वात् द्योतकतापक्षेप्येवं क्रियाद्वयमपि धात्वर्थ एव विशेषणविशेष्यभावे तु कामचारः प्रवर्तनातु स्मृतिपुराणवाक्यनिष्ठा तत्कर्त्रीश्वरमनुव्यासादिनिष्ठा लौकिकवाक्येषु तु पित्रादिवक्तृनिष्ठा प्रवर्तनातस्ते प्रवृत्तेरिष्टसाधनत्वमनुमीयते इयं वेदाध्ययनादिमत्प्रवृत्तिर्मदिष्टसाधनमीश्वरादिभिर्वेदादिभिर्वा कार्यमाणत्वात्

॥ पित्रादिकार्यमाणभोजनादिमत्प्रवृत्तिवत् याप्रवृत्तिरीश्वरादिभिः ॥ ॥

कार्यमाणा न भवति स्वतः इष्टसाधनमपि न भवति ब्रह्मवधसुरापानादिप्रवृत्तिवत् केचित्तु इष्टसाधनत्वं विध्यर्थमाहुः तन्न वेदाध्ययनादौ पित्रादिभिः प्रवर्तिता एव बालाः प्र
वर्तमानाः दृश्यंते न तु इष्टसाधनताऽज्ञानात् आदौ तेषां तदसंभवात् किंच आख्यातस्य यत्नोऽर्थः प्रथमांत विशेष्यकश्च बोधः तत्रेष्टसाधनस्य विशेष्यत्वं न संभवति प्रथ
मांतपदेनानुपस्थानात् विक्लित्तौ यत्नेवान्वये तु प्रत्ययार्थप्राधान्यस्वीकारस्य त्यागप्रसंगात् अन्नं पचेत् अन्नाभिन्नाश्रयाया विक्लित्तेस्तदनुकूलाएकाश्रयाया क्रियायास्तद्वि
षयाप्रवर्तनाप्रेरणाविषयभूतौदनाभिन्नाश्रयकविक्लित्यनुकूलैकाश्रयाक्रियेतिवाबोधः अन्नं पाचयेत् अन्नाभिन्नाश्रयकविक्लित्यनुकूलायाक्रियायास्तद्विषयैकाश्रयाक्रि
येतिप्रवर्तनातद्विषयाप्रवर्तनाप्रवर्तनाविषयान्नाभिन्नाश्रयकविक्लित्यनुकूलभावनातद्विषयाभावना अन्नं पापच्येत अन्नाऽभिन्नाश्रयकविक्लित्यनुकूलातिश
यितायाक्रियायास्तद्विषयाप्रेरणाप्रवर्तनाविषयाऽन्नाभिन्नाश्रयकविक्लित्यनुकूलातिशयिताभावना अन्नं पिपक्षेत् अन्नाभिन्नाश्रयकविक्लित्यऽनुकूलाक्रियायास्तद्वि
षयेच्छायास्तद्विषयाप्रेरणाप्रवर्तनाविषयाऽन्नाभिन्नाश्रयकविक्लित्यनुकूलाक्रियातद्विषयेच्छेत्यादिसंपूर्वकाङ्गवतेश्चौरादिकाद्वा प्रेरणे स्वार्थे वा णिः भावे युट् य
द्वाऽस्मादेव ज्ञापकात् अन्यं तान युः ततः स्त्रियामेवेति विशेषः संभावना कल्पना ऊहः स चोत्कटैककोटिकः संशयः स्थाणुर्वा पुरुषो वेत्यादौ तु सर्वाः कोटयः समत्वेन भा
संते भवेदयं वेदविद् ब्राह्मणत्वादित्यादौ तु वेदवित्त्वावेदवित्त्वकोट्योर्वेदवित्कोटिरेव बाधिका अयमेव संशयसंभावनयोर्भेदः ब्राह्मणत्वादिति हेतुस्तु व्यभिचारित्वान्न
निश्चायकः अवेदविदामपि ब्राह्मणानां दर्शनात् अब्राह्मणानामपि क्षत्रियाणां वेदविदां दर्शनात् वेदावास्त्यनुकूलभावनाश्रय एकोपरोक्षोऽर्थस्तदाश्रयात्मधा
रणानुकूलायाभावनातद्विषयाब्राह्मणत्वहेतुकासंभावनाब्राह्मणत्वहेतुकायासंभावनातद्विषयावेदावास्त्यनुकूलभावनाश्रयापरोक्षैकार्थनिष्ठात्मधारणानु
कूलाभावनेतिवाबोधः एवं भवेदयं बलवान् क्षत्रियत्वात् भवेदयं धनवान् वैश्यत्वात् भवेदयं सेवकः शूद्रत्वादित्यादावपि बोध्यं अन्यत्तु निमंत्रणामंत्रणाऽ
धीष्टसंप्रश्नप्रार्थनादिर्विहितः तत्र निमंत्रणमावश्यकेऽर्थे प्रवर्तनायत्राप्रवर्तमानस्य प्रत्यवायः श्राद्धभोजनादौ दौहित्रादेर्यथा आमंत्रणमिच्छयाप्रवर्तनं यत्राऽप्र
वर्तनेपि न प्रत्यवायः मंगलभोजनादौ दौहित्रादेर्यथा अधीष्टं सत्कारपूर्वकं प्रवर्तनं अध्ययनादौ गुर्वादेर्यथा तन्न विधिग्रहणेनैव संग्रहात् प्रवर्तनायाः स
र्वत्रानुगतत्वात् तदुक्तं वाक्यप्रदीपे न्यायव्युत्पादनार्थं च प्रपंचार्थमथापि वा विध्यादीनामुपादानं चतुर्णामादितः कृतं १ अस्ति प्रवर्तनारूपमनुस्यूतं

च० आ०
त० भा०
४

चतुर्थ्येपि तत्रैव लिङ् विधातव्यः किंभेदस्य विवक्षयेति संप्रश्नप्रार्थनवतिकर्तरि यादादिर्विधेय एव तत्र संप्रश्नः अहं वेदमधीय उत शास्त्रमित्येवंभूतविचारः एवंप्रयोगा
न्वेद्यमुत काशीं अहं गाहिष्ये कुर्यामुत संन्यासमित्यादिष्वपि प्रार्थनायाञ्च भो भोजनं लभेयं भो दक्षिणां प्राप्नुयां भो कन्यां वहेयं अत्र विधिसंभावनयोरिति योगं विभज्य तिवादीन
नुवर्त्य विध्यादिष्वपि तिवादयो विधेयाः यवाग्वाग्निहोत्रं जुहोति पशुना यजते यादादावित्यत्र वर्तमाने इत्यनुवर्त्य वर्तमानेपि यादादयो विधेयाः इच्छेतु इच्छतिवच्छि उपपात इत्यतयो
र्द्योत्यपयोर्वाच्यपो वीधातोस्तु वारयः सु आशीःप्रेरणयोः प्रत्ययार्थत्वे वाच्यपक्षो भवति आशीःप्रेरणयोर्वर्तमानाद्धातोरिति पक्षे तु द्योत्यपक्षो भवति तत्रापि विशेष्यत्वं विशेषणत्वं
चेति द्वैतं आशासनं आशीः आङः शासु इच्छायां संज्ञायाम् कर्तरीत्यनुवर्तमाने स्त्रियां क्तिरित्यधिकारे संपदादेः क्विप् चेति क्विप् अयमेव निर्देशः तस्य वचनस्य सत्वे प्रमाणं अस्मा
देव निपातनात् क्विपि आतङः न तु शासेरिरित्यनेनेत्वमस्तु न परस्मैपदि नः शासेस्तत्र ग्रहणात् अन्यथाऽऽशास्त इत्यादावपि स्यात् आशिषीति निर्देशात् क्विलात्परस्य धातोः
सस्य वः सत्वशासिवसिघसीनां भवति ज्ञापकसिद्धं न सर्वत्रेति उरत्वः किरणोः उरत्वा गोरित्यादौ वसेरीणादिके रकि संप्रसारणे रूपं प्रपूर्वादीरगतावित्यस्मात्प्रेरणार्थं न्यन्तादन्त

आशीःप्रेरणयोः तुप् तां अंतु हि तं त आनिप् आवप् आमप् तां आतां अंतां स्व आथां ध्वं ऐप् आवहैप् आमहैप् ॥ ४ ॥

भोवितन्यर्थोदाभावेप्युर्दृष्टवा प्रेरणा प्रवर्तना विधिशब्दार्थ एव आशीश्च प्रेरणा च आशीःप्रेरणे तयोः आशासनं चाप्राप्तस्यैव संभवतीत्यप्राप्तप्रार्थनमाशीः सा च स्वस्य परस्य च सं
भवति स्वस्य परस्येष्टार्थशंसनं वाशीरिदमप्यप्राप्यविषयमेव संभवति आयुष्मान् भवतु भवान् अतिशयितायुः प्राप्त्यनुकूलैकभवदर्थाश्रयात्मधारणक्रियापातद्विषयाशु
भाशंसा शुभाशंसाविषयभूतादीर्घायुः प्राप्त्यनुकूलैकभवदर्थाश्रयात्मधारणाक्रियेति वार्थः अत्राऽऽपुर्विषयाशीः फलति पुत्रवंतौ भवंतौ पुत्रसंबंधानुकूलाद्विभवदर्थाश्रया
त्मधारणाक्रियातद्विषया शुभाशंसा शुभाशंसाविषयभूता पुत्रसंबंधानुकूलाद्विभवदर्थाश्रयात्मधारणक्रियेति वार्थः वयं वेदमध्ययामहै वेदाक्षरावाप्त्यनुकूलावहद्वस्मद
र्थाश्रयाध्ययनक्रियातद्विषया शुभाशंसाविषयभूता वेदाक्षरावाप्त्यनुकूलावद्वस्मदर्थाश्रयाध्ययनक्रियेति वार्थः अध्ययनायोद्यतो भव साधीसाधोसाधुसंबोध्यकाध्ययन
फलकोद्योगवदेकप्रश्नदर्थाश्रयात्मधारणाक्रियातद्विषया प्रवर्तना प्रवर्तनाविषयभूताध्ययनफलकोद्योगवदेकप्रश्नदर्थाश्रयात्मधारणक्रियेति वार्थः ज्योतिःष्टोमेन स्वर्गका

राम०
४

योग्यजनानां स्वर्गप्राप्त्यनुकूला ज्योतिष्टोमसंज्ञकयागकरणिकैकस्वर्गकामपुरुषाश्रया या भावना तद्विषया प्रवर्तना प्रवर्तनाविषयभूता स्वर्गप्राप्त्यनुकूला ज्योतिष्टोमसंज्ञ
कयागकरणिकैकस्वर्गकामपुरुषाश्रया क्रियेति वार्थः यद्यपि पादादिष्विवाद्ययोनकालविशेषे विहिताः तथापि भविष्यत्कालोऽवगम्यतेऽतीतवर्तमानयोर्विध्याद्यसंभवा
त् यत्तु शब्दं कुर्वाणेऽपि नरे विरामाशंकायां शब्दं कुर्विति वर्तमानेऽपि विधिः संभवतीत्युक्तं तन्न तत्रापि भाविशब्दविषयत्वाद्विधेर्न वर्तमानशब्दविषयता विधिग्रहणोऽनव
र्तमाने पुनः प्रेरणोपादानमधिकसंग्रहार्थं तेनातिसर्गप्राप्तकालयोरपि लुङादिः सिध्यति प्रैषस्तु विधिरेव त्वं गां गच्छ अतिसर्गस्तु तदिच्छया प्रवर्तनात्वेच्छा चेद्गां गच्छे
न चित्कं चित्प्रत्युक्तमध्याह्नकालस्त्वयावक्तव्यो मम तदा गां गागंतव्यास्तीति स आह प्राप्तः कालस्त्वं गां गच्छेति दिक् ॥ तुश्च हिश्च तुही तयोः तातङ् ङित्वेऽपि नांत्यादेशः
त्रापकसिद्धं ॥ सर्वत्रेति ङित्त्वं तस्यैतस्याप्रवृत्तेः किं चानन्यार्थङितो ङित्त्वमंत्यादेशं प्रयोजयति अत्र तु ब्रूतात् मृष्टात् दुग्धादित्यादौ गुणवृद्धिप्रतिषेधसंप्रसारणे चचरि
तार्थत्वात् ङित्त्वस्य नांत्यादेशता ॥ न तु पृक्तात् तौ चंतु हितात् तेनेत्येव कुतो न पठ्यते इति चेन्मैवं प्रेरणेति प्रसंगात् नहि आशिषि तातङ् प्रेरणेति व्यवस्था लभ्यते किं च नाम्निवत्तु

तुह्योस्तातङाशिषि वा ॥ ५ ॥ अनद्यतनेतीते तिप् तां अन् सिप् तं त अमिप् वं मतन् आतां अंत थास् आथां ध्वं इ वहि महि ६

ण्वादिश्च अस्मादिच्च भागेरिति बहुवचनात्पातोऽष्ट्यो भागा विधेयाः तत्र न ज्ञायते चतुर्भिः को भागः त्रिभिः को वेति व्यवस्थानसिद्धेरिति दिक् ॥ ५ अनद्यतनेऽतीते काले द्योत्ये वाच्ये वा
धातोर्दिवादयः अस्मिन्नहनीत्यद्यस्य आदित्वात् इदमश्शब्द्यप्रत्ययश्चाहनीत्यर्थे निपात्यते तद्धितोक्तत्वात् प्रथमा अद्यशब्दवाच्यः कियान्कालः अतीतरात्रेरंतिमं याम
द्वयमागामिन्या प्रथमं यामद्वयं मध्यवर्ती दिवसः सकलः एषोऽद्यशब्दवाच्यः कालः केचित्तु अरुणोदयादारभ्याऽरुणोदयपर्यंतः कालः अन्ये तु सूर्योदयादारभ्य सूर्योदयपर्यं
त इत्याहुः लौकिकानां त्वाद्य एव इति तत्रैव व्यवहारदर्शनात् अद्यभवोऽद्यतनः त्यतनावितितनः अद्यतनः कालस्त्रिविधः अतीतो वर्तमानोऽनागतश्च तत्रातीते द्य
तने भूते सिः अद्यतने वर्तमाने तिवादिः अद्यतनेऽनागते लृडादौ भविष्यतीस्य ५ नास्त्यद्यतनो यस्मिन्निति बहुव्रीहिरिति तस्मिन्नद्यतने काले दिवादिर्यथार्थ परोक्षे
णादिविधानात् यद्वा अद्यतनादन्योऽनद्यतन इति नञ्तत्पुरुषः अनस्वरे इत्यन् नाम्नो न इति नलोपश्च नुनविधानसामर्थ्यात् एवमपि त्यक्तनो लभ्यते तेनन्नद्यत्यो भूतस्य

हीत्यनाति प्रसंगः अद्यतनाद्भिन्नस्यत्वद्यत्यस्य सत्वादिति चेत् मैवं परत्वात् लेः संभवात् दिवादेरवकाशोऽत्यस्तनः कालः च्योभवत्तत्र सेरवकाशोऽद्यतनोऽतीतः अभूद्द
शिरिति उभयविवक्षायां द्वयोः प्रसंगे परत्वात्सिर्भवति अत्रानद्यतने इति योगं विभज्यति वादीननुवर्त्यानद्यतनेतिवाद्ययोर्विधेयाः अनद्यतनोऽतीतोऽनागतश्चयात्वयः
ते न पजति स्म इत्याजवाव्यधिष्ठिरः यो नं ददातिदानावासस्वर्गं याति पाताबेतिसिद्दं ननुत्यस्तन इति वक्तुमुचितं लाघवात् उतरार्थं ताप्यस्य नास्तित्यस्तन इत्यस्यैवाऽ
न्वय संभवादिति चेत् सत्यं न जोक्तमनित्यमित्यद्यतनेपि परोक्षे णादिविध्यर्थमिदं वहु जगद पुरस्तात्तस्य मताकिलाहं सुमो हं किल विललापश्चत्रमद्य निद्रादोषेणास्व
निश्चक्रियायाअप्यननुसंधानात्पारोक्ष्यं ननु बहुव्रीहिपक्षेऽद्यतने दिवादिः प्राप्नोति अद्यतनेऽद्यतनाऽभावादिति चेन्न निषेधस्य प्रसक्तपूर्वकत्वात् अद्यतनेऽनद्यतन
स्य प्रसंगाऽभावान्निषेधाभावः यद्वा अद्यतनेव्यापकेऽद्यतनस्य व्याप्यस्य सत्वात् दिवसे प्रहरोऽस्ति प्रहरे मुहूर्तः मुहूर्ते घटिका इतिवत् त्योभवत्तत्र गतदिवसाऽऽधा
रिकाप्युष्मदर्थे जन्यपुत्राश्रयात्मधारणानुकूला तीता क्रिया वेदमध्यैतवटुः एकवद्भिन्नाश्रयका वेदमास्यऽनुकूलाचिराऽतीताध्ययनक्रिया अहमोदनमपचं ए

॥ परोक्षे णप् अतुस् उस् थप् अथुस् अ णप् व म तिप् तस् झि ते आते झे से आथे ध्वे ए वहे महे ॥ ७ ॥ ६ ॥

काः स्मदर्थाभिन्नाश्रयौदनोत्पत्त्यनुकूलाचिरातीतापाकक्रिया यूयं घटमकुरुत वहुयुष्मदर्थाभिन्नाश्रया घटोत्पत्त्यनुकूलाचिरातीतोत्पादनेति दिक् ६ अनद्यतनाती
तपरोक्षार्थक्रियावृत्तेरिति द्योतकता पक्षः अक्ष्णः परः परोक्षः टाडका इत्यः यस्य लोपः अक्षादिंद्रियात्पर इति वा कश्चिदमाद्यं तस्य परत्वमिति पंचम्यंतस्य परत्वं
म् सहादित्वात् परशब्दस्यौकारोऽस्मादेव निपातनाद्वा विक्लित्त्यनुकूलो व्यापारसंततोऽधः श्रयणांतः पच्यर्थः क्रियाशब्दवाच्यः तस्य समुदायस्य युगपदुत्प
त्यभावादाशुविनाशित्वाच्च प्रत्यक्षत्वं न संभवति पच्यपितयाप्येकैकव्यापारस्य प्रत्यक्षत्वात् तत्समुदायेपि प्रत्यक्षत्वाभिमानो लौकिकानां यत्रत्वेकोप्यवयवो न प्र
त्यक्षस्तत्र क्रिया परोक्षेत्युच्यते अन्ये त्वाहुः यद्यपि क्रिया सर्वा परोक्षैव प्रत्यक्षेण सा सर्वा समुदायीकृता निदर्शयितुं न शक्यते देशांतरप्राप्त्यादिफलेन त्वनुमीयते
तथापि तदनुकूलशक्तिमतां व्यापारविष्टानां साधनानां पारोक्ष्यमिह विवक्षितं तेषां प्रत्यक्षत्वेपि प्रत्यक्षत्वं तेन क्रियानाविष्टसाधनमात्रप्रत्यक्षेपि णादिर्भवत्येव प्र

यपपाचत्वंपेचिचेयेति एवंस्वव्यापारस्यापिवर्तमानतादशायांव्यासंगादिनास्वयमप्रतिसंधानेततःकार्येणाऽनुमितोभवत्येव अहंविललापेतिवत्नाहंकलिंगान्जगामे
त्यत्रतुपापभयात्स्वयमनुष्ठितापिक्रियापलभ्यतेऽतस्तस्या अभावप्रतिपादनात्परोक्षताअतोवैचित्यापन्हवयोरितिनवक्तव्यंभवतिरामोराज्यंचकार प्रजापालनाद्यनु
कूलैकरामाभिन्नाश्रयाचिरातीतापरोक्षाक्रियात्वमीशमश्वमेधेनेयष्टृणकृयुष्मदर्थी आश्रयाईशपूजनानुकूलाऽश्वमेधसंज्ञकयज्ञकरणिकाचिरातीतापरोक्षाक्रियाश्च अ
द्यतनेकिंग्रामांतरेघटोऽभूत् अत्रघटभवनंपरोक्षमतीतमपिनचिरातीतं अतीतेकिं अयमन्नंभोक्ताऽत्रभुजेःभविष्यदनद्यतनत्वेऽप्यतीतताभावः नचात्रविशेषविहि
तैस्ताद्दिभिरेववाधःस्यादितिवाच्यं अपरोक्षतादीनांसावकाशत्वात्परोक्षेणवादिभिरेववाधसंभवात् परोक्षेकिं रामोराज्यमकरोदितिहनुमद्वाक्यं घटोभवदितिवक्तु
र्घटोत्पत्तिश्चिरातीताऽपिनपरोक्षायत्तुउत्तमपुरुषेणावृतमोवेतिज्ञापकात् प्रयोगइतितन्नवैचित्यादौतस्यसावकाशत्वादितिदिक् ॥ णलादीत्यनुवृत्तंसप्तम्याविपरिणा
म्यतेधातोर्द्विर्वचनंभवतिणादौपरेसतिद्वौवारावितिद्विः द्वित्रिचतुर्भ्यःक्रियावृत्तौसुःकृत्वसोऽपवादः अनेनैवनिर्देशेनेदंवचनंज्ञाप्यते अत्रक्रियावाचकंविनाक्रिया

द्विश्च ॥ ॥ आशिषियात् यास्तां यासुस् यास् यास्तं यास्त यासं यास्व यास्म सीष्ट सीयास्तां सीरन् सीष्ठाः सीयास्थां सीध्वं सीय सीवहि सीमहि ॥

ऽऽवृत्तेरसंभवाद्वचनमित्यध्याह्रियते तच्चकृदंतंतदपेक्षयाधातोरिति कर्मणिषष्ठी धातोर्द्वे उच्चारणेकर्तव्ये इत्यर्थः यद्वा द्विरितिसंख्यामात्रवाचकाद्विशब्दाल्लिंगा
र्थेइति सिः द्व्येकयोरितिवत् अन्यथाद्व्येकेष्वितिस्यात् धातोरितिगुणगुणिसंबंधेषष्ठी धातोर्द्वित्वंभवतीत्यर्थः अत्रद्विःप्रयोगोद्विर्वचनंनत्वादेशः सत्यादेशेतु
तोमेत्यादौतुतोवेत्यादिरूपंस्यात् कृतस्यसत्वात् शब्दएवद्विरावर्तते नत्वर्थः द्विश्चेतिविधेयसहचरितेनचकारेणविधेयांतरंसमुच्चीयते तच्चोक्तस्याऽसंभवात्
दानुवृत्तंगृह्यते तेनदयतेर्दिग्यादेशे द्वित्वंनेतिलक्ष्यानुरोधादन्यदपिभवति पिप्ये इत्यादिः परोक्षइतियोगंविभज्यदिवादीननुवृत्त्यपरोक्षेदिवादयोविधेयाः
तेनशश्वदकरोत् चकारवा अनंतरस्येति न्यायेनोक्तणादियोगेनैव द्वित्वंनविदोनवानामितिविहितणादियोगइतिदिक् ॥ स्वस्यपरस्यचेष्टार्थस्यशंसनं
आशीः तस्यांवाच्यायांधातोर्यादादयः यद्वाप्रार्थ्यमानक्रियावृत्तेर्धातोर्यादादयइति ॥ ॥ ॥

॥

च आ
ल भा
६

वर्तुडि त्वेनैवगुणादिनिषेधः सिद्ध इति चेन्न इज्यात् सुप्यादित्यादौ संप्रसारणार्थत्वात् आशीरिति किं स्वप्यादिति विध्यादौ माभूत् यादादेः किं स्वपंतु इत्यादौ संप्रसारणं
मथानस्यात् पंक्तिं पसीष्ट केशवो मंगलं क्रियासुः ब्रह्मविष्णुमहेशाभिन्नाश्रयकाबहुयुष्मदर्थसंबंधमंगलोत्पत्त्यनुकूलायोत्पादनातद्विषयाऽऽशंसना आशंसनाविष
योत्पादनावेतिबोधः भगवनत्वंनो मंगलं करुषीष्टाः एकभगवदर्थसंबोध्यकावच्छस्मदर्थसंबंधिदुःखनाशनेनस्वरूपसुखाभिव्यक्त्यनुकूलायोत्पादनातद्विषयाऽऽशंसा आशं
साविषयभूतोत्पादनेतिवाबोधः अहं वेदमध्येषीय एकास्मदर्थाभिन्नाश्रयावेदाक्षरावाप्त्यनुकूलाध्ययनक्रियातद्विषयाऽऽशंसा आशंसाविषयभूताऽध्ययनक्रियेतिवा
बोधः १० अद्यतनेदिने विहायाऽऽगामिदिने श्वशब्दो वर्ततेतत्रभवः श्वस्तनः कालः तस्मिन्वाच्येधातोस्तादयः यद्वा श्वस्तने व्यापारे वर्तमानाद्धातोस्तादयः श्वोभविताराज्यंकु
मारस्य द्वितीयागामिदिनाधारा एकराज्याऽभिन्नाश्रयकाऽऽगामिकालभाविनी आत्मधारणानुकूलाक्रियेत्यर्थः त्वं सुखं गंतासि एकयुष्मदर्थाभिन्नाश्रयासुखोत्पत्त्यनुकू
लाऽऽगामिदिनभाविनीगतिक्रियेतिबोधः वयं वेदमध्येतास्महे बहुस्मदर्थाभिन्नाश्रयकावेदाक्षरावाप्त्यनुकूलाऽऽगामिदिनभाविनी अध्ययनक्रियेतिबोधः ११

आशीर्यादादेः पंक्तित् १० श्वस्तने ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् तोता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ११

भवनेभूः संपदादित्वात् भावे क्विप् तस्यां भुवि सुद्धे धात्वर्थे साध्यरूपे भावे घञ् अर्थस्तु सिद्धरूपो भावः स्वार्थे अ आदिति फलितं फलाश्रयः कर्मफलं च धातु ॥ आङ्डुविकर्मणि १२
नैवोक्तमित्याश्रयमात्रमाख्यातार्थः अनन्यलभ्यत्वात् न च प्रथमांतेनैवाश्रयोलब्ध इति वाच्यं घटः क्रियते इत्यत्र घटत्वेनैव घटस्योपस्थानात् नत्वाऽऽश्रयत्वेन आश्रय
त्वेनत्वखंडोपाधिरूपमवच्छेदकं यद्वा आश्रयत्वमेव वाच्यं अभेदेन तदेवाऽवच्छेदकं भावेऽकर्मकाद्धातोरात्कर्मणोऽसंभवात् सकर्मकात्तु कर्मणि आत् ननु सक
र्मकाद्भावे पिआतोति ततश्च घटं क्रियते देवदत्तेनेत्यपि स्यादिति चेत् मैवं द्विश्चेत्यत्र श्चोऽनुवततस्माऽवधारणार्थः सकर्मकाद्धातोः कर्मण्येवात् न भावे ननु तर्हि भा
ववत्कर्तर्यपि न स्यादिति चेन्न मध्येऽपवादन्यायात् न्यायश्चायं लाघवमूलकः निषेधस्योपस्थितेनैव निषेध्याकांक्षायाः पूर्तौ अनुपस्थितं न ग्राह्यमिति लाघवं अ राम
यकिमर्थमिदमारभ्यते पूर्वयोगैस्तिबादयो विहिता एव न चार्थविशेषलाभार्थमिदं अतिदिष्टार्थाः प्रत्ययाः स्वार्थेऽपि भवंतीति भावार्थस्य लाभात् अपकर्तरीति कर्तुः ६

इणतन्यकर्तरीतिकर्मणश्चलाभात् मैवं अस्यनियमार्थत्वात् इणतन्यकर्तरीति सर्वाणिकारकाण्यभिधेयत्वेनप्राप्तानिसंज्ञायामकर्तरीत्यत्र यथाप्राप्तानितथात्रापि
तत्रनियमोऽनेन क्रियते कर्मण्येवात् नान्यस्मिन्नर्थे इत्थंभावेऽप्राप्तौ सत्यांभुवीत्युक्तं तथापिकर्तर्य्यप्राप्तौकर्तरि यं चेत्युक्तंनियमपक्षेपिनाऽर्थेनियमः क्रियते कर्मणि
आदेव न तु पयत एवकारस्ततोऽन्यत्राऽवधारणमितिसिद्धांतादर्थेऽस्यनियमो भवति ननुप्रत्ययस्यतेनकारकांतरेप्रत्ययस्याऽनिवारणाद्दुष्टोऽयंपक्षः अतःप्रत्ययनि
यमोऽत्रक्रियते आत्कर्मण्येव भवतिनकरणादौ अर्थस्याऽनियतत्वात तत्रकृत्यस्यपाभवंत्येव अर्थेनियमेपिवचनात्कृतः स्युरितिसुवचं अथभुविकर्मण्याऽऽदितिवक्तुं
युक्तं विधेयस्यपश्चान्निर्देशस्यौचित्यादिति चेत् उच्यते आदिति योगविभागेनाऽन्यस्मादपिधातोराद्विधीयतेतेनजिज्ञासतेशुश्रूषतेसुस्मूर्षते दिदृक्षतेइत्यादिसिद्धं शाशु
स्मदृशामित्यादिनवक्तव्यंभवति अथ भूकर्मणीत्येववक्तव्यं किं पृथङ्निर्देशेन उच्यते कर्तरीतियोगो विभज्यते भुवीतितु तृतीयया विपरिणम्यते कर्मणीत्यनेनकर्मस्था
गृह्यते तेनतुल्यइतित्वध्याहृियते कर्मस्थया भुवा क्रियया तुल्यक्रियेकर्तर्य्यौड्नवति काष्ठंभिनत्तीत्यत्र काष्ठस्य या क्रिया विदारणाश्रयत्वरूपा सैवकाष्ठंभिद्यतेस्वयमेवेत्य
त्रतस्मिन्कर्तृभूतेपिभवतियक् चतुर्थ्यित्यत्रयगितिप्रथमोच्चारणाद्यगिति योगोविभजनीयः तत्रकर्मणिकर्तरीत्यनुवर्त्यकर्मकर्तरियगपिविधेयः लस्यानुसाराद्यो
गविभागादिष्टसिद्धिरिति सिद्धांतात् चतुर्थ्येवसः इत्युक्तु इणातनीत्यत्रवस्यते एतावाऽऽद्यकौ कर्मस्थभावकानांकर्मस्थक्रियाणांच धातूनांभवतः नकर्तृस्थभावकानां
कर्तृस्थक्रियाणांच यत्रकर्मणि दृष्टेक्रियाऽनुमातुंशक्यतेतेकर्मस्थक्रियाः ततोऽन्येकर्तृस्थक्रियाः यथापक्वेषुतंडुलेषुभिन्नेषुचकाष्ठेषुचदृष्टेष्वदृष्टः कर्तृव्यापा
रोऽनुमीयते तदुक्तं कर्मस्थः पचतेर्भावः कर्मस्थाचभिदेः क्रिया आशासिभावः कर्तृस्थः कर्तृस्थाचगमेः क्रिया पद्यप्याधारभावयोरित्यत्रभावशब्देनक्रियाऽपिगृह्य
तेतथाप्यत्रभेदोविवक्षितः पृथगुपादानात् परिस्पंदरूपोधात्वर्थः छिदादिः क्रिया अपरिस्पंदरूपो विक्लित्यादिर्भावः पचतिओदनंभिनत्तिकाष्ठंचदेवदत्तः पच्यते
ओदनः भिद्यतेकाष्ठंस्वयमेव यद्यपिकाष्ठानिपचंतिस्थालीपचतीत्यादौसाधनाधारयोरपिकर्तृत्वंदृश्यतेतथापिनतत्रयगातावविधानात् क्रियतेघटः स्वय
मेवेत्यत्रकरोतेरपिकर्मकर्तातोदृश्यते सचोत्पादनार्थत्वएवसंभवति ननुयत्नार्थत्वे यत्नस्यज्ञानेच्छादिवत्कर्तृस्थत्वात् आशास्तेघटेन आशास्तेघटःस्व
यमेवगच्छतिग्रामंनागच्छतिग्रामः स्वयमेवघटग्रामयोर्दृष्टयोर्नहि पुरुषस्यव्यापारोऽनुमातुंशक्यते इतिकर्तृस्थत्वंक्रियायाः १२ ॥ छ ॥

चं॰ श्रा॰ ल॰ भा॰ ७

कर्तरिवाच्येधातोः पंचादात् देवदत्तः पचतिवेनोक्तत्वात्कर्तरि मध्यमा ननुभावकर्मकर्तृष्वाऽऽद्विधानात्कार्यनिर्णयः मैवंप्रयोगान्निर्णयसंभवात् आस्ते शेते गुरु एव इत्यत्र क
र्तरिप्रथमादर्शनात्कर्तर्य्येत् शय्यते आस्यते गुरुणेत्यत्र कर्तरितृतीयादर्शनात् भावेप्यात् चक्रे करिष्यते वा घटं कुलाल इत्यत्र कर्तर्य्येत् चक्रे करिष्यते वा घटः कुलाले
नेत्यत्र कर्मणि आत् कर्मणि प्रथमायाः कर्तरितृतीयायाश्च दर्शनात् कृषीष्ट कर्तेत्यत्र तु निर्णय एव पर्यायाभ्यामित्यत्राऽनिर्णयः कृतं देत्यागत इत्यादि संदेहा कोतु तृतीया
देर्निर्णय एव केचित्तु अकर्मकाद्यकसहित आत् भावे सकर्मकाद्यकसहित आत्कर्मणि ताभ्याम पलुकयनमादिसहित आत् कर्तरीत्यादि नियामकमाहुः तन्न कर्मकर्तरि
व्यभिचारात् भिद्यते कुशूलः स्वयमेवेत्यत्र यकसहितस्याऽतः कर्तरि विधानात् पच्यते ओदनेन भिद्यते काष्ठेनेत्यादौ भावे च दर्शनात् नत्र कर्तृग्रहणं किमर्थं भावकर्मणोः
पूर्वेण विधानात् परिशेषात् कर्तर्य्येव यं भविष्यति अत्राह माधवः ननु पंचेत्येवास्तु सूत्रे माकारि कर्तृग्रहणं न वाडुवीत्यतो भावकर्मणी अनुवर्तेयातामिति वाच्यं योगांतरारं
भात् अन्यथा पाडुवि कर्मणीत्येव सिद्धत्वात् न चार्थांतरे संभवतीति पारिशेष्यात्कर्तर्य्येव स्यादिति किं कर्तृग्रहणेन गवन्तार्हि भावनिवृत्त्यर्थं कर्तृग्रहणं अन्यथाऽनिर्दि

कर्तरि पंच ॥ १३ ॥ यकचतुर्षु ॥ १४ ॥

ष्टार्थत्वाद्भाव एव स्यात् अत्र प्रकृते रीतिज्ञापकात्कर्तरि स्यादिति चेत् कर्तर्य्येव यथा स्यात्कर्मकर्तरि माभूदिति कर्तृग्रहणमिति तन्न धात्वर्थेन कारकाणामाक्षेपात् न प्राप्तेतद्वार
णार्थं कर्तर्य्येव यमिति नियमार्थं कर्तृग्रहणसंभवात् अस्मदुक्तरीत्या कर्मकर्तर्य्यप्राप्तिविधेः संभवात्तदुक्तरीत्या काष्ठानि पचंतीति करणे कर्तरि स्याली पचतीत्याधारे कर्त
रि चाप्रसंगात् १४ चतुःशब्दः चतुष्टयसंख्याविशिष्टस्य वाचकः संख्येय विशेषाकांक्षायां वचनानि न संबध्यंते तेषां चतुष्टयाभावात् वचनानां त्रित्वात् नापि प्रथममध्य
मोत्तमाः पुरुषाः संबध्यंते तेषामपि तथात्वात् अतोऽत्र विभक्तयः संबध्यंते न च तत्र चत सप्तस्यादिति वाच्यं चतुर्ष्विति सामान्येन पुंसकनिर्देशस्य संभवात् सुडुपहंतुं शक्य
मितिवत् यद्वा आख्यात प्रकरणात् चतुर्विधेष्वाख्यातेष्वित्यर्थः तत्र वर्तमानार्थत्वमेका विधा विधिसंभावनार्थत्वमित्यपरा आशीः प्रेरणार्थत्वमित्यन्या अतीतानद्य राम॰
तनार्थत्वमिति चतुर्थी यद्यपि सप्तविधा आख्याता उक्ताः प्राक् तथापि प्रथमातिक्रमे कारणाभावादादितश्चत्वारो ग्राह्याः अत्राव्यवहितमपि कर्तरीति नानुवर्तते ७

उत्तरत्र कर्तृग्रहणादन्यथाऽनेनैव तत्सिद्धौ किं तेन अतो भुवि कर्मणीति चानुवर्तते तत्र च नयकोऽभिधेयमाख्याते नैवोक्तत्वादनन्यलभ्यस्यैव शब्दार्थत्वाभ्युपगमात् अत
सन्निमित्तविशेषणाभावार्थके षु कर्मार्थकेषु चतुर्ष्विति अत्र तेनादिना वा क्यभेदेन वा द्वितीयोऽप्यर्थो ग्राह्यः भावकर्मार्थके षु चतुर्षु परत इत्येकोऽर्थः कर्मकर्त्रर्थे
षु चतुर्ष्वित्यपरः चतुर्ष्विति निर्देशेन नाम संज्ञाप्रवृत्तिकाले नामांत्यस्वरे फस्य सुपि परे न विसर्ग इति ज्ञापितं तेन गीर्षु पूर्षु दोः षु सजूः ष्वित्यादि सिद्धं एतदर्थमेव चतुर्ष्वि
ति सामान्यनिर्देशः कृतोऽन्यथा चतसृष्वित्युक्ते रदं न ज्ञाप्येतेति दिक् १४ अत्रापि कर्तरीति नाऽपोऽभिधेयमाख्यातोक्तत्वात् किंत्वनुवृत्तस्य चतुर्ष्वित्यस्य विशेषणं कर्त्र
ऽर्थेषु चतुर्षु धातोरप्प्रत्ययः ननु इह कर्तृग्रहणं किमर्थं भावकर्मणोर्यक् विधानात् परिशेषात्कर्तुर्लाभादिति चेन्न इह कर्त्रग्रहणे पको भावकर्मणोर्विधानाऽसंभ
वात् सन्निधानात्कर्तर्येव विधानसंभवाच्च अपः पित्वमपित्तादिर्ङि दिति ङित्वाऽभावार्थं अन्यथाभवतः नयत इत्यादौ ङित्वाद्गुणो न स्यात् विधेयस्य प्रथमोच्चा
रणानुपयोगविभागार्थं कर्मणि कर्तरीति चाऽनुवर्तते कर्मकर्तरि चतुर्षु धातोरप्प्रत्ययः क्वचिद्भवति यकोऽपवादः तेन गणयति गणं गोपालः गणयति गणः स्वके षां चिन्म

॥ अपकर्त्तरि ॥ १५ ॥ अदादेर्लुक् ॥ १६ ॥

ते गणपतेः कर्मतयाऽऽ ह्यागणयति गणयते गणः स्वयमेव कारयति घटं प्रभुः कारयते घटः स्वयमेव चिकीर्षति घटं कुलालः चिकीर्षते घटः स्वयमेव अलंकरोति कन्यां
पिता अलंकुरुते कन्या स्वयमेव ब्रवीति कथां विद्वान् ब्रूते कथा स्वयमेव गां दोग्धि गोधुक् दुग्धे गौः स्वयमेव प्रस्नौति गां गोपः प्रस्नुते गौः स्वयमेव नमति दंडं दंडी न
मते दंडः स्वयमेव अंतर्भावितण्यर्थो वेत्तो गिरति ग्रासं श्वा गिरते ग्रासः स्वयमेवेत्यादि सिद्धं केचित्तु सन्निधानाऽसन्निधानेनाऽनुवृत्ति प्रयोजके किंत्विष्टत्वाऽनिष्टत्वे
प्रयोजके पक्षानुर्ष्वित्यत्राऽनिष्टत्वात्कर्तरीति नाऽनुवर्तते इष्टत्वाद्भुवि कर्मणीति चानुवर्तते तत्र परिशेषात्कर्तरीति लभ्ये पुनः कर्तृग्रहणमन्यत्रापि कर्तरि
यगाऽऽतोर्विधानार्थं तेन सृज्यते स्रजं भक्तः युज्यते ब्रह्मचारी योगं तप्यते तपस्तापस इति सिद्धं अत्र सृजति युनक्ति तपतीति प्राप्तमिति दिक् १५ अद् आदिर्यस्य
स अदादिस्तस्मादादेः अदभक्षणे इत्याऽऽरभ्य दिङ् क्रीडेत्यतः प्राक् वर्ती समुदायोऽदादि शब्देन गृह्यते तस्य चाऽनुद्भूताऽवयवभेदस्याऽन्यपदार्थत्वेन विवक्षणाद्ब

हेरित्येकवचनं पूर्वसूत्रात् २१ इत्यनुवर्तते तच्च षष्ठ्या विपरिणम्यते तेन तस्य लुग्विधीयते अत्र चतुर्थ्वित्यस्याऽनुवृत्तिर्न नोपयुज्यते ऽचतुर्थ्वपोऽभावात् अत्र तद्गुणसंविज्ञा
नबहुव्रीहेराश्रयणादते रप्ययोलुक् अपः किं भिद्यते एवमग्रेपि १६ हुआदिर्यस्य सह्वादिः तस्य द्वौ वारौ इति द्विः द्वित्वविशिष्टवाचकात् द्विशब्दात् क्रियापाभ्यावृत्तौ
सुः सा च पौनःपुन्यतावलादुच्चारणक्रिया गृह्यते लुगेत्यनुवृत्तं सप्तम्या विपरिणम्यते ह्वादेरिति कर्मणि षष्ठी उच्चारणक्रियायाः कर्मत्वात् तथा च लुकि सति ह्वादिर्द्विवार
मुच्चारणीय इति फलितं द्विः प्रयोगो द्विर्वचनमिति सिद्धांतोनतु स्थाने द्विर्वचनमिति तु किं किं हूयते अनचकारोऽधिकः पूर्वेणायोलुकि अनेन द्विर्वचनस्य विधानेन सिद्धत्वा
त् चकारोऽनुक्तसमुच्चयार्थः तेन भीह्रीभृहुवाऽऽमामिति द्वित्वमित्वं च सिध्यति १७ दिवआदिर्यस्य स तस्मात् यप्रत्ययो भवति कर्त्र्यर्थेषु चतुर्षु परेषु अत्राऽनुक्तसमुच्चयार्थश्चकारो
ऽनुवर्तते नभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषां यो वा अनुपसर्गाद्यसः संपूर्वाच्चेति बोध्यं यद्वा भ्राशादयो धातवः दिवादिषु पुषादिभ्योऽन्यत्र पाठ्याः आदर्शे आदर्शेषु पाहीः पाठे
षु उभपाठीः उभपाठेषु अयोश्चततद्गुणोक्ता अत्रापि ग्रात्याः नाभ्राशेति सूत्रारंभे यथा यसु संयसु इति च पाठ्यं यसु पाठेन सिद्धे संपूर्वयाटस्तु नियमार्थः संपूर्वाद्देव यो न उपसर्गांतर

॥ ह्वादेर्द्विश्च ॥ १७ ॥ दिवादेर्यः ॥ १८ ॥ स्वादेर्नुः ॥ १९ ॥ तुदादेरः ॥ २० ॥

पूर्वात् अपनु आदिपाठाद्भवति येन नाप्राप्तिन्यायेनापोऽपवादोऽयं यः चतुर्थ्विति दिवे कर्त्र्यर्थेषु किं दीव्यते यद्यपि य यकिं च समानरूपं तथाप्यऽर्थे पदे च विशेषः १८ सुरादिर्यस्य स स्वा
दिस्तस्मान्नुः प्रत्ययो भवति कर्त्र्यर्थेषु चतुर्षु सुनोति चतुर्थ्विति किं सुषुवे कर्त्र्यर्थेषु किं सूयते सोमो भवता श्रुश्रवणे स्वादिष्वेव पाठ्यः दृशादेः पश्यादिरिति श्रृभावः तस्य तनूकरणे अस्य
व्याप्ताचेतौ स्वादिष्वपि पाठ्यौ भ्वादिषु चतेन तक्ष्णोति तक्षति अक्ष्णोति अक्षतीत्यादि सिद्धं १९ तुद् आदिर्यस्य स तस्मात् अप्रत्ययः कर्तरि चतुर्षु अप्रत्ययस्यापिता दिरिति ङित्वा
न्न गुणः तुदति किंच अप्रत्यये सति वा रीपोः शतुरिति नुम्विकल्पः तरंती अपि तु नित्यं नुम् पचंती अथ रियति धियति इत्यऽत्र अप्रत्यये सति गुणः कुतो न न नधातोरुपधाया गुणो
विधीयते ऽत्रतु इकारो न धातोरुपधेति चेन्न उपधायाः इत्यवयवषष्ठीत्वात् उपधाभूतस्य च धात्ववयवत्वात् गुणप्राप्तेः सत्वात् उच्यते अंत्याद्वर्णात् पूर्वस्योपधात्वे नांत्यस्यापि धा राम॰
त्ववयवस्यैव ग्रहणात् अप्रत्ययस्य चाधात्ववयवत्वान्न दोषः यद्वा अंतरंगबहिरंगयोरंतरंगं बलवदिति परिभाषाश्रयणात् इयुत् अप्रत्ययमात्रापेक्षत्वादंतरंगः ॥ गुणस्तु प्रत्य ८

यमास्याते चापेक्षमाणो बहिरंगः एवमस्तुस्तुवदद्रुवदित्यादावपि बोध्यः ॥ २० ॥ रुधआदिर्यस्य स रुधादिः तस्मात् श्नम् प्रत्ययो भवति कर्तरि चतुर्षु रुणद्धि चतुर्षु किं रुरोध कर्तरि किं रु
ध्यते ननु रुदादेरिति भाष्यमंतवर्ति विभक्त्याश्रयणेन परत्वात् समिदाऽऽधानमिति वदिति चेत्सत्यं स्वघार्थे पदकार्याऽकरणं अन्यथा रुदिः आदिर्वा रुधिः आदिर्वा संदेहः स्यात्
ननु व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात् रुधिरादिर्ग्रहीष्यत इति चेत् एवं तर्हि क्वचिदवांतरपदकार्यं नेति ज्ञापितं क्षीरस्य पानं क्षीरपाणं सुरापाणे शवणामित्यादावेक
पदत्वप्रयुक्तणत्वं भवति समासे क्वचिदेकपदत्वं णत्वे हेतुरिति तस्मादेव लब्धं स्यादेतत् नम् किं प्रत्ययः आगमो वा नाऽऽद्यः रुधादेरिति पंचम्याश्रयणात् परः स्यान्नतु म
ध्ये न च मित्त्वसामर्थ्यादंत्यात्स्वरात्परो भविष्यतीति वाच्यं नमित्यस्य नमइत्यत्र विशेषणे मित्त्वस्योपक्षीणत्वेनासामर्थ्यात् अन्यथा नमऽत्यत्र नादित्युक्ते यत्नानां पावनाना
मित्यादावपि नलोपापत्तेः न च दीर्घे कृते तेन शब्दात्परत्वाभावात् नातिप्रसंग इति वाच्यं परत्वान्नलोपस्यैव प्रसंगात् नांत्यः आगमत्वे मध्ये विधानसंभवेप्यपोदुर्वीरत्वान्प्रत्यय
स्यैव हि प्रत्ययांतरमपवादो भवति न त्वागम इति उच्यते मित्त्वसामर्थ्यादंत्यात्स्वरात्परोऽयं नम् न च विशेषणे उपक्षीणं तद्विशेषणार्थं अनुवंधांतरस्यैव सुवचत्वात् न

॥ रुधादेर्नम् २१ ॥ तनादेरुप् ॥ २२ ॥

मिमध्ये सतीति वा रि परत्वस्यानवकाशत्वेनाऽऽप्स्यादिति वाच्यं दधिब्राह्मणेभ्यो दीयतां तक्रं कौंडिन्यायेति न्यायेन तक्रदानेन दधिदानमिव नमा बाध्यत इति सुवचत्वात् स
त्यपि संभवे बाधनं भवतीत्यभ्युपगमात् यद्वा अवादिभिराख्यातानां कर्त्रर्थे बोधनीये साहाय्यं क्रियते तच्च प्रतिपदोक्तेन नमैव कृतमित्यपो न प्रयोगो वैयर्थ्यादिति दिक् ॥ २१
तन आदिर्यस्य स तस्मात् उप्रत्ययो भवति कर्तरि चतुर्षु तनोति चतुर्षु किं तताने कर्तरि किम् तन्यते नन्वेवं नलोप शिष्यादेरिति वतादेरित्यपि भाव्यमिति चेन्न स्पष्टार्थेन
लोपाऽकरणात् अन्यथा देरित्युक्ते तनादेर्वा तकारादेर्वा सन्देहः स्यादथ व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात्संदेहाभाव इति चेत् तर्हि क्वचिन्नलोपाभावो ज्ञाप्य
ते स्मन् आदिर्येषां ते स्मनादयः रुपवर्षकं वसुपस्य सरवषण्वसुः रुषाऽस्योय स्यसरषणस्व इत्यादौ नलोपो न यद्वा तन आदिर्यस्य उच्चारणार्थोऽकारः एवं रुध
आदिर्यस्येत्यपि अथोपः पित्त्वं किमर्थं न च नूप इत्यत्र विशेषणार्थं नुश्च उश्चेति द्वंद्वे न्वोरिति उश्च नुश्चेति द्वंद्वे उन्वोरिति निर्देशेन वा निर्वाहात् नुप्रत्ययसाह

च॰ आ॰ चर्यात्प्रत्ययस्यैवोकारस्य ग्रहणं न च नु धातुरेव ग्राह्यस्तस्य गुण इत्येव सिद्धत्वात् प्रत्ययाः प्रत्यययोः प्रत्ययस्यैव ग्रहणमिति न्यायाच्चैवमेवं अपित्तादिर्ङिद्दिति ओर्ङित्वेन
ल॰ भा॰ करोति कुरुत इत्यादौ गुणाऽप्रसंगात् न च ङित्वदरितिज्ञापकात्करोते गुणो भवति गुणं विनाऽकाराऽसंभवादिति वाच्यं घर्णोतीत्यादौ गुणाप्रसंगादिति दिक् २२ क्र्यादि
९ भ्यः स्वसक्र्यादिभ्यस्स्यान्नाप्रत्ययो भवति कर्त्रर्थे बुचतुर्द्धक्रीणाति चतुर्थुकि चिक्राय कर्न्त्रर्थे बुकि क्रीयते प्रत्ययस्यादावुच्चारणं योगविभागार्थं नान्तीति योगो विभज्य
ते क्र्यादेर्नुरित्यतो नुरित्यनुवर्तते धातोर्ना प्रत्ययो भवति नुश्च कर्तरि स्वितुर्घु अत्र च स्तंभुस्तुंभुस्कंभुस्कुञ् एते एव धातवो शृत्यंते लक्ष्यानुसारात् स्तभ्नाति स्तभ्नोतीत्यादि एते
सौत्राश्चत्वारः यद्यप्येते क्र्यादिषु पठ्यंते तदापि नुविधानार्थं योगविभागः कर्तव्यः क्र्यादेर्नैर्तिपठित्वा तत्र नु रनुवर्तनेनुः सर्वेभ्यः क्र्यादिभ्यः स्यात् २३ धातोरित्यनुव
तस्य हसादित्यनेन विशेषणात् तदंतविधिः हसंताद्धातोरानः स्याद्धौ परे नापवादः क्र्यादिभ्यो पि हौ परे ना प्राप्तस्तस्यापवादश्चानो भवति गृहाण बधान स्तभान नुस्तुभ
वत्येव येन नाप्राप्तभावेन आनस्य तदपवादत्वाभावात् यदि तु क्र्यादेरित्यनुवर्तते हसंतात्क्र्यादेरिति व्याख्यायते स्तंभ्वादिभ्यो न प्राप्नोतीति तेषां सौत्रत्वेन क्र्यादित्वा

॥ नाक्र्यादेः ॥ २३ ॥ हसादानहौ ॥ २४ ॥ स्यादौ भविष्यति स्यप् ॥ २५ ॥ दिवादावट् ॥ २६ ॥

भावात् यदि तु तेपि क्र्यादिषु पठ्यंते तेतदा न कापि क्षतिः २४ सिद्धादिर्थस्यतस्मिन् भविष्यत्यर्थे वर्तमानाद्धातोः स्यप् प्रत्ययो भवति स्यादौ परे सति इति भविष्यत्वं द्योत्यं धा
तोः स्यप् प्रत्ययो भवति भविष्यति काले तिवादौ परे अत्र पक्षद्वयेऽनुवादसामर्थ्यात् तिवादि यद्वा धातोर्भविष्यतिकाले तिवादिः तस्मिंश्च परे स्यविति पक्षे तु तिवादे
र्वाच्यं भविष्यत्वं कर्तृकर्मभावानां तिवादीनामर्थाः संत्येव न तु भविष्यतीति शतृंतात्सप्तमी शतरि तु स्यप् प्रत्ययो नास्ति स्यादौ तद्विधानात् मैवं शतृशानयोरपि तिप्त्वदि
त्यतिदेशात् स्यप् प्रत्ययो भवति यद्वा अस्मादेव निपातनाच्छतरि स्यप्रत्ययो भवति शानस्याप्युपलक्षणं तेन पक्ष्यन् पक्ष्यमाणः भोक्ष्यन् भोक्ष्यमाण इत्यादि सि
द्धं तुम् तदर्थायां भविष्यतीत्यत्राप्येवं करिष्यति स्यादौ किं कर्ता भविष्यति किं अति २५ प्रत्ययाधिकारेऽप्ययमागमष्टित्वसामर्थ्यात् प्रत्ययत्वे दिवादौ परे धातोः राम॰
परः स्यात् तथा च टित्वं व्यर्थं स्यात् प्रयोजनाभावात् आगमी चास्य धातुरेव षष्ठीनिर्देशान्न तु विकरणः षष्ठ्यभावात् न तु दिवादाविति सप्तमी तत्र वा व्यवा ९

हितेतस्मिन् परेधातोरटाभाव्यमवादिव्यवधानेनप्राप्नोति नचवचनसामर्थ्याद्भविष्यतीतिवाच्यं अजुहोदित्यादौलुङ्विकरणेचरितार्थत्वात् नचपरत्वादट् विकरण
स्यानित्यत्वादटि कृतेचाकृतेचप्राप्तेः यत्तु अवश्यमनित्यः शब्दांतरप्राप्तेः कृतेऽटि अभूदित्यस्य अकृतेच भूइत्यस्य द्वयोरप्यऽनित्ययोः परत्वादडेवादौभवतीतिमाधवेनोक्तं
तन्नशब्दांतरस्यप्राप्नुवन्विधिरनित्योभवतीतिसिद्धांतात् शब्दांतरात्प्राप्नुवन्नितिसिद्धांताऽभावात् अभूदित्यस्यभूइत्यस्यऽचेत्यऽत्रषष्ठ्यऽप्यशुद्धात्र्योधात्वऽ नवयवत्वा
त् भूइत्यस्मादिपिपंचम्या उचितत्वात् उच्यतेशब्दमात्राऽपक्षेत्वादंतरंगोऽट् विकरणस्तु कन्त्राद्यर्थापेक्षणाद्बहिरंगः अंतरंगवहिरंगयोरंतरंगंवलवदि
त्यादावट् यद्वादिवादावडिति सूत्रेतत्रादिनाव्याख्येयंएकेनाऽव्यवहितेदिवादावट् द्वितीयेनव्यवहितेपियेननाव्यवधानेतिन्यायात् यद्वादिवादावडि
त्यत्र अवाऽऽदौनन्नवर्त्यवाक्यभेदेनव्याख्येयंदिवादौपरेधातोररट् दिवादिपरावादौपरेधातोरट् त्यादावितिवद्यादावितिवक्तुमुचितेदिवादौकिं इंहतिजुहोति
स्वर आदिर्यस्यसतस्यं धातोरट् भवतिदिवादौपरेऔहत ऐक्षत नन्वऽत्र दिवादावडित्यट् विहितएवकिमर्थमिदंसत्यंप्रसारंभसामर्थ्याद्द्वितीयोऽद्विधीयतेन

स्वरादेः २७ ॥ स्यपक्रियातिक्रमे ॥ २८ ॥

नुद्वयोरटोः प्रथमतः सवर्णेदीर्घएवास्तुततश्च ऐक्षत औहतेतिस्यात् मैवंद्वितीयाद्विधानवैयर्थ्यप्रसंगान्नचएकस्मिन्नटिकृतेतेनयातोस्वरादित्वावरोधात् द्वि
तीयस्यकथंप्रसंगइतिवाच्यं पदागमास्तद्गुणीभूतास्तद्ग्रहणेनगृह्यंतेइतिन्यायेनाद्विशिष्टस्येवधातुत्वात् नन्वटिकृतेसर्वेषांस्वरादित्वाद्द्वितीयोटस्यात् चाऽऽद्योच्चा
रणोस्वरादित्वंविवक्षणीयमितिवाच्यम् औक्षएज्यतेत्पादाऽवप्रसंगात् उच्यते अटंविनास्वरादित्वमिहविवक्षितंस्वरादेरिति वचनसामर्थ्यात् अन्यथादिवादाव
डित्यस्यापि अहचेत्येवसूत्रमस्तुदिवादौपरेद्वितीयोऽट् भविष्यतिकिंस्वरादिग्रहणेनतन्वैज्यत्तोप्यतेत्यादौप्रथममंतरंगत्वाद्दिवादावट् ततोयकृततोयजादित्वा
त्संप्रसारणंततोधातोः स्वरादित्वेपिद्वितीयोऽट्नस्यात् प्रथमाऽटास्वरादित्वस्याग्रहणात्संप्रसारणास्वरस्याऽत्वादित्वाभावादितिचेन्न अट्संप्रसारणयोरादेशेकृतेत
स्ययदादेशन्यायेनधातुग्रहणेनग्रहणाद्द्वितीयाटः संभवात् स्वरादेः किं अभवत् दिवादौकिं ईहते २७ क्रियायाअतिक्रमः अनिष्पत्तिः असिद्धिरितियावत् भविष्यती

चं॰ आ॰ त्यनुवर्तते उत्तरसूत्राद्भूते इति च भूते भविष्यति चार्थे वर्तमानाद्धातोर्दिवादिः प्रत्ययो भवति क्रियानिष्पत्तौ गम्यमानायां दिवादौ च परे स्यप् भवति यद्वा धातोः परः भूते भविष्य
ल॰ भा॰ ति चार्थे वाच्ये दिवादिर्भवति तस्मिंश्च परे स्यप् क्रियातिक्रमे गम्ये स्य इ विकरणत्वादनर्थकः स्यादावित्यादावपि एवं सिरप्यक्रालस्तु धातोर्वाऽऽख्यातस्य वार्थः कर्त्रादिकं तु
१० आख्यातस्यैव यद्वा भविष्यति भूते इति च नानुवर्तनीयं परिशेषाल्लब्धत्वात् वर्तमानक्रियायाः अतिक्रमाऽसंभवात् यदि कृष्णमनंस्यत्सुखमयास्यत् कृष्णकर्मिका एकाश्र
यानतिस्तदभावप्रयुक्ता सुखकर्मिका एकाश्रया भूता भविष्यन्ती वा याप्राप्तिस्तदसिद्धिः यदि प्रयागमगमिष्यत्तदा मोदकमभोक्ष्यत् प्रयागकर्मिका एकाश्रया भूता भविष्यन्ती वा
यागतिस्तदभावप्रयुक्ता मोदककर्मिकैकाश्रया भक्ष्यक्रियायाः असिद्धिः यदि सुवृष्टिरभविष्यत्तदा सुभिक्षमभविष्यत् सुवृष्ट्याश्रयाऽऽत्मधारणाऽनुकूला भूता भविष्यन्ती वा या
क्रिया तदभावप्रयुक्ता सुभिक्षाश्रयात्मधारणाऽनुकूलाया क्रियाया असिद्धिः क्रियातिक्रमे किं सुवृष्टिरभूत् सुभिक्षमभूत् सुवृष्टिर्भविष्यति सुभिक्षं भविष्यति दिवादौ किम् कृष्णं
नमेच्चेत्सुखं यायात् कृष्णं न नतः सुखं न प्राप्तमिति क्रियानिष्पत्तिरस्ति स्यप् ग्रहणं चिन्त्यं स्यादावित्यतोऽनुवृत्तिसंभवात् अदन्त्वाऽऽगमत्वात्स्यपोऽनुवर्तने न व्यवधायकः एवं स

॥ भूतेसिः ॥ २९ ॥ नवपं ॥ ३० ॥ परान्याऽऽत् ॥ ३१ ॥

द्ग्रहणं व्यर्थमिति चेन्न योगविभागार्थं तेन शत्रादौ क्वचित्स्यप् भवति भविष्यन् भोक्ष्यमाण इत्यादि २० अभूदिति भूतः अकर्मकत्वात्कर्तरि क्तः स्वसत्तया कालं व्याप्तवान् भूतसामा
न्यार्थे वर्तमानाद्धातोर्दिवादिर्भवति धातोः परः भूतसामान्यार्थे दिवादिर्भवति तस्मिंश्च परे सि प्रत्ययो भवति अभूद्वृष्टिः सिसहितस्य दिवादेर्भूतसामान्योऽर्थः अद्यादि सहि
तस्य तु भूतविशेषोऽनद्यतनोऽपरोक्षः भूतोऽनद्यतनपरोक्षो णवादेः विशेषेपि यदि सामान्यविवक्षा विशेषाऽविवक्षा तदा सिर्भवत्येव अभून्नृपो दशरथ इति विशेषविवक्षायां
तु अभवन्नृपो दशरथो बभूवेति वा भूते किं अत्ति दिवादौ किं आगच्छामि वर्तमानसमीपे भूते एव आगच्छामीत्यादौ वर्तमानत्वाऽऽरोपात् तिवादिर्भवति न दिवादिरिति
दिक् २१ भावके अष्टादशवचनात्मका दशविधा आख्याता उक्तास्तेषां नवनववचनानां संज्ञे विधीयेते तिवादीनामाद्यानि नववचनानि पसंज्ञानि पराणि नव आत्संज्ञानि परा राम॰
णीति परशब्देन नवपमित्यत्राऽऽद्यानीति लभ्यन्ते अत्र केचित् पाऽऽत्शब्दाभ्यामेव पवाभ्यां परस्मैपदात्मनेपदशब्दावयवं विना वाक्षिप्येते तौ च संज्ञात्वेन विनियुज्येते इत्याहुस्तन्न १०

तयोरन्तारतेः द्वादेः पेथित्ये आतोऽतोदनत आड्डुवीत्यादौ पाञ्चुन्वयोरेवा रत्तिर्दृश्यते लाघवाच्च पाञ्चुन्वावेव संज्ञेन नु परस्मैपदात्मनेपद शब्दाभ्यां अन्वर्थत्वेन परगा
मिक्रियाफले आत्मगामिक्रियाफले चार्थो लभ्यते पाञ्चुन्वाभ्यां सकर्थं लब्धव्य इति चेत् न विवक्षयानिर्वाहात् न हि विभर्ति विभृते रुणद्धि रुंधे क्रीणाति क्रीणीते इत्यादावन्य
क्रियात्मकं न हि कमलवनोद्घाटनं कुर्वते ये इत्यादावात्मगामिफलं लभ्यते याजको यजति यजमानो यजते इत्यत्रैव परगामित्वात्मगामित्व फलं लभ्यते तन्तु कल्पसूत्रव
लात् शिष्टाचार बलाद्वा बोध्यं व्यर्थोऽतः समुदायात्संपद इति दिक् २।१।२१ अत्र पाऽऽत् शब्दावनुवृत्तौ सप्तम्या विपरिणमयितव्यौ आड्डुवीत्यादेः कर्मणीति कर्त्तरीति चाऽनुवर्त्त
ते नाम्नादि शब्देन विभक्त्यंतं गृह्यते त्रिकपक्षेः विभक्ति कर्त्राद्यभिधाना संभवात् पंचकपक्षो वा यात्यः प्रकरणातिवादयो दशविधा आख्याताः तत्त्वंतेनामाद्यर्थे कर्त्तरि
कर्मणि च विहितानां तिवादीनां पाऽऽतौ यानि नव वचनानि तानि त्रिभिर्भागैर्विभज्य प्रयोक्तव्यानि यथासंख्येन नामार्थे कर्त्तरि प्रयुक्तेऽप्रयुक्ते च प्रथमो भागः प्रयोक्तव्यः स प
चति तौ पचतः ते पचंति स पचते तौ पचेते ते पचंते अप्रयुक्ते पचति पचतः पचंति पचते पचेते पचंते नामार्थे कर्मणि ओदनः पच्यते ओदनौ पच्येते ओदनाः पच्यंते अ

॥ नाम्नि चे युष्मदि चोऽस्मदि च भागे ॥ २२ ॥

प्रयुक्ते पच्यते पच्येते पच्यंते एतं तु कर्मणि नास्ति युष्मदर्थे कर्त्तरि त्वं पचसि युवां पचथः यूयं पचथ त्वं पचसे युवां पचेथे यूयं पचध्वे अप्रयुक्ते पचसि पचथः पचथ पच
से पचेथे पचध्वे युष्मदर्थे कर्मणि प्रयुक्ते त्वं दुःखी क्रियसे रागैः युवां दुःखिनौ क्रियेथे यूयं दुःखिनः क्रियध्वे अप्रयुक्ते क्रियसे क्रियेथे क्रियध्वे अस्मदर्थे कर्त्तरि प्रयुक्ते अ
हं पचामि आवां पचावः वयं पचामः अहं पचे आवां पचावहे वयं पचामहे अप्रयुक्ते पचामि पचावः पचामः पचे पचावहे पचामहे अस्मदर्थे कर्मणि प्रयुक्ते विरागैः सुख्य
हं क्रिये आवां क्रियावहे वयं क्रियामहे अप्रयुक्ते क्रिये क्रियावहे क्रियामहे त्वया पच्यते मया पच्यते इत्यत्र युष्मदाद्यर्थे आख्यातस्य विधानाभावान्न मध्यमोत्तमौ ननु
आख्यातानां वर्त्तमाने ति प्रसित्यादिना आड्डुवीत्यादिना च कर्त्तरि कर्मणि च सिद्धत्वात् किमर्थमिदमारभ्यते सत्यं नामार्थयोः कर्त्तृकर्मणोर्मध्यमोत्तमावपि प्राप्नुतः यु
ष्मदर्थयोः प्रथमोत्तमौ अस्मदर्थयोः प्रथममध्यमावपि अतो नियमार्थमिदमारभ्यते नियमार्थत्वेपि नामादि नियमः नामार्थे कर्त्तरि कर्मणि प्रथम एव युष्मदर्थे मध्यम एव अस्म

चं अ दर्थे उत्तमश्चेति यत्तस्य एवकारस्ततोऽन्यत्राऽवधारणमिति नामाद्यर्थकर्त्रादिनियमो भवति न च समयक्षांतं त्वं पाचकः अहं पच इत्यत्र तद्वणाद्योनस्युरिति नामाद्यर्थकर्त्रादिनिय
ल·भा मादिति वाच्यं वचनसामर्थ्यान्न्वारयो भविष्यंति यद्वा सजातीयापेक्षो नियमः नामार्थैककर्त्रादौ प्रथम एव भवति न मध्यमोत्तमाविति उच्यते भावे आख्याते सर्वे भागाः स्युः नामार्थैक
११ कर्त्रादौ विहितत्वाभावात् अतो भागानियमोऽत्राऽऽश्रीयते प्रथमो नामार्थे कर्त्रादावेव मध्यमो युष्मदर्थकर्त्रादावेव उत्तमोऽस्मदर्थकर्त्रादावेव नान्यत्रेति अस्मिन्पक्षे नामाद्य
नियमात्तस्मिन् कर्त्रादौ तद्व्यापारयो भवत्येवं नन्वऽस्मिन्पक्षे भावे प्रत्यये कोपि पुरुषो न स्यान्नामाद्यर्थैककर्त्रादौ आख्यातस्य विधानात् भावे चाऽऽख्याते तदभावात् वचना
च्चेत्सर्वेपि स्युरविशेषादिष्यते च प्रथम एवमेवं नामार्थस्य कर्तृत्वाद्यभावेपि वचनबलात्प्रथम एव स्यात्प्रथमाऽतिक्रमे कारणाऽभावान्न मध्यमोत्तमौ प्रथमस्याऽप्येकवचन
मेव भवति तावता वचनं चरितार्थं द्वित्वबहुत्वयोरभावान्न द्विवचनबहुवचने इतः यत्र उष्ट्रासिकाः आस्यंते उष्ट्रकर्तृकाऽऽसनसदृशान्याऽऽसनानीत्यर्थः हतशायिकाः शय्य
ते हतकर्तृकशयनसदृशानि शयनानीत्यर्थः ननु नागानामयं वचनप्रामाण्यात्स्वीक्रियते एकवाक्यतया विधिपक्षोप्यऽस्तु तथा हि वर्तमाने तिबादीनां आज्ञुवीत्यादेः ना
म्नि चेत्यस्य चैकवाक्यतया वर्तमानाद्यर्थे तृतेधीतोर्नामाद्यर्थैककर्त्रादौ तिबादीनां पाऽऽतोर्नव वचनानि त्रिधा विभक्तानि एकत्वाद्यर्थे क्रमेण प्रयोक्तव्यानीति अत्रापि पक्षे
भावे उक्तरीत्या प्रथमस्यैकवचनमेव भवति अथ भागैरिति बहुवचनेन त्रिभिरेवेति कथं लभ्यते शृणु कपिंजलानाऽऽलभेतेत्यत्र वाक्ये कपिंजलानिति बहुवचनेपि ए
कस्मिन् द्वयोश्च बहुत्वाऽऽभावात् प्रथमबहुत्वस्य त्रिषु लाभात् त्रय एवेत्युक्तं तेन चतुः पंचाद्यो यथा तथा नागैरित्यत्रापि त्रय एव भागा इत्युक्तं तेनाधिकाः नन्विह भवान्
पचतीत्यत्र मध्यमः प्राप्नोति भवद्युष्मच्छब्दयोरेकार्थत्वादिति चेन्न तयोरत्वभेदात् अलिंगः संबोधनविषयश्च युष्मदर्थः भवदर्थस्तु लिंगवान्न च संबोधनैकविष
यः तथैव हि माणवकाधीष्वेत्यत्राभिमुखीभावो गम्यते एवं त्वमधीष्वेत्यत्रापि उक्तं च संबोधनार्थः सर्वत्र मध्यमः केचिदिष्यते तथा संबोधने सर्वो प्रथमां युष्मदो विदु
रिति त्वद्रूपः त्वत्कल्पः त्वत्तरः पचसि एवं मद्रूपः मत्कल्पः मत्तरः पचामीत्यत्र तरादेः विशेषणत्वेनाऽकर्तृत्वाद्युष्मदस्मदर्थस्यैव कर्तृत्वान्मध्यमोत्तमौ स्तः अतित्वं प्रिय
त्वं पचति अत्यहं प्रियाहं पचतीत्यत्र पूर्वपदाऽन्यपदार्थयोः प्राधान्येन कर्तृत्वात् युष्मदस्मदर्थयोर्गौणत्वेन कर्तृत्वाऽभावात् न मध्यमोत्तमौ एवमऽत्वं त्वं संपद्यते तद् राम·
भवतीत्यादावपि च्व्यंते हि संघीभवति ब्राह्मणा इत्यत्र रोधेन प्रकृतेः कर्तृत्वं विकृतेः कर्तृत्वेन संघीभवति ब्राह्मणाद् इति स्यात् अत्रापि युष्मदस्मदर्थयोर्विकृतित्वेनाऽक ११

नैवंतदुक्तं यदाच्यः ऽर्थे विनिर्दिश्यं भवतो युष्मदस्मदोर्द्वयोरपि तयोर्योगे न धातोर्मध्यमोत्तमौ प्रकृतेर्विकृतेर्वापि त्येकदाप्रतिपादनेवाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नतु
अत एवमृद्घरा भवति ओदनस्तंदुला भवंतीति प्रसज्यते सचत्वंच पंडितौ भवथः अहंच सचत्वंच पंडिता भवाम इत्यत्र त्रयाणां नामाद्यर्थानां कर्तृत्वेन प्राप्तावपि पर
त्वान्मध्यमोत्तमौ भवतः तदुक्तं एकदा चेत्क्रिया कालसंबंधप्रतिपादनं धातोर्नामादिषु तेषु यः परः सप्रमान् भवेत् परत्वंच विधायकसूत्रापेक्षया न प्रयोगापेक्षयाग्रा
ह्यं अस्मदर्थस्यैकत्वेपि समुदायाश्रिता संख्याश्रयात्वात् तदुक्तं द्वयोर्नाम्नोर्वहूनां वापदिवाक्ये समुच्चयः नामन्त्रयाश्रिता संख्या कृतिवाच्योर्विशेषणं सचत्वंच अहंचेति स
ह विवक्षायां तु आदेश्च द्वंद्वे इति आद्ययोर्लोपे ऽस्मदः शेषत्वादुत्तमो भवति संख्या तु समुदायाश्रिता भवति प्रत्येकं कर्तृत्व विवक्षायां तु त्वं पंडितो भवति त्वं भवसि अहं
भवामि अत्र चकाराः किमर्थाः शृणु नामार्थैकर्त्रादौ प्रथमः चाद कर्त्रादौ भावे प्रथमः तत्र द्वित्व बहुत्वयोरभावाद्द्विवचनबहुवचनेन स्तः प्रथमातिक्रमे कारणाभावादेक
त्वाभावेप्येकवचनं भवति विधानसामर्थ्यात् युष्मदर्थेकर्त्रादौ मध्यमः चादुत्तमोऽपि क्वचित् अस्मदर्थकर्त्रादादुत्तमः चात्क्वचिन्मध्यमोपि तेन परिहासे मन्योपपदान्मध्य

|| शित्ये || ३३ ||

मः सम सर्वे व चनांतः मन्यतेर्धातोरुत्तमः सएकवच्चेति संगृहीतं भवति त्वंइति मन्यसे अहमोदनम्भोक्ष्ये इति स्थितं तत्र त्वं इति मन्ये ऽहमोदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः ए
वं त्वं युवां यूयं वा मन्ये अहमोदनं भोक्ष्यसे आवां भोक्ष्ये ये वयं भोक्ष्यध्वे एते प्रयोगाः परिहासे एव भवंति तिङः स्त्रीणि त्रीणीत्यत्र तिङो भागैरिति वर्तुं पक्षं कपिंजलाऽ
धिकरणान्याये नात्मनेपदपरस्मैपदयोस्त्रयस्त्रयो भागाः कर्तव्याः आद्यस्तु प्रथमो भवत्येवद्वितीयोपि मध्यमो भवत्येवतृतीयस्तु उत्तम इति स्वीकारात् युष्मद्युपपदे
समानाधिकरणे स्थानिन्यपि मध्यम इत्यऽस्य स्थाने युष्मदि मध्यम इति सुवचम् युष्मदर्थे वाच्ये इति तदर्थः चार्थे वाच्ये द्वंद्व इतिवत् एवं नाम्नि प्रयुज्यमाने ऽपि प्रथ
म इति कातंत्रसूत्रेपि प्रयुज्यमानेपीति न्यर्थे नामार्थे वाच्ये प्रथम इत्यर्थे प्रयुक्ताऽप्रयुक्तशब्दार्थातभावात् पदपि युगपद्वचने परः पुरुषाणामिति कातंत्र सूत्रं तदपि
न उक्तरीत्या परत्वेनैव निर्वाहादिति दिक् ३४ येपरे मिर्णिद्वतिणइत् यस्य सणित् अणितं णित् इत्याह णिद्वदिति गम्यते परत्र प्रयुज्यमानः परशब्दो विनापि व
तिं वत्यर्थं गमयति अवशिष्टो वशिष्टइत्याह वशिष्टवदिति गम्यते अयंच कार्यस्य प्राधान्यात्कार्यातिदेशः कार्यार्थत्वादतिरेषामतिदेशानां णितः कार्यमतिदेष्टव्यं नास्ति

च॰ आ॰ तिति यत्कार्यं तदतिदिश्यते ननु आतो णप् औ इणः तनो लोप इत्यादि णितः कार्यं कुतो नाऽतिदिश्यते मैवं णविधा शब्देन विहितं न तु णित्त्वेनेति नाऽतिदिश्यते यद्वा सामा
ल॰ भा॰ न्याऽतिदेशे विशेषो नाऽतिदिश्यते णविधा णित्त्वविशेषः यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यद्ब्राह्मणे गौतमे च तन्नातिदिश्यते किंतु ब्राह्मणसामान्यस्य तथात्रापि
१२ णितीति यद्दृष्टं कार्यं तदतिदिश्यते अत्यस्य नामिनः उपधाया अत अ वृद्धिर्भवति अकारान्तस्यानुपत इति परत्वाल्लोपः आतश्च सत्यामसत्यां वा वृद्धौ नास्ति विशेषः संध्य
क्षरं त्वेकं त्वं नास्ति अवोढाम वोढेत्यादौ तु वृद्धिं कृत्वो द्विधीयते इति सकृत्प्रवृत्त्या चरितार्थो वृद्धिः पुनर्न प्रवर्तते नाम धातूनां तु केषांचिद्विकल्पेन वृद्धिरिष्यते कविरिवा चारित
अकनवयीरक वायीत् भूरिव अभवीत् अभावीत् अगवीत् अगावीत् अतो हसादेर्लघोर्वेति व्रजिल्लां तभिन्नस्य सेटि सौ परे वृद्धिं वेच्छंति अगदीत् अगादीत् अरदीत् अरा
दीत् अतः किं अदेवीत् हसादेः किं माभवान् तीत् लघोः किं अतक्षीत् सेटि किं अनात्सीत् सौ किं गदिता परे किं अनभिषुवदीत्यादि किं अवादीत् अव्राजीत् ॥ अफा
लीत् अचारीत् त्वं तक्षणश्वसजागृश्व्येदितां वृद्धिं सेटि सौ परे नेच्छंति अरहीत् अचमीत् अहयात् अक्षणीत् अश्वसीत् अजागरीत् अश्वयात् अकटीत् चानुवृत्त्या

॥ अनिटोनामिवतः ॥ ३४ ॥

इदं सर्वं आत्त्वं शास्त्रातिदेशपक्षेपि धातोर्नामिनः अन उपधाया इत्यनयोरतिदेशादुक्तलक्ष्यसिद्धिर्निबाधैवेति दिक् ३३ अनिटः अनामिवत इति छेदः द्वयमिदं धातो
विशेषणं यद्यपि धातुः सर्वोप्यनिडेव तस्येड्विधानाभावात् तथापि न इट् यस्मात्परस्य प्रत्ययस्येति व्याख्येयं णादेरनिट्त्वं न आत्त्वं कार्यं चाप्यो भिन्नात्परस्य तस्य
सेड्वात् तस्मात्तादिषु अनिट्त्वं आत्त्वं अश्च नामी चानामिनौ तयोऽस्य द्वंद्वांते श्रूयमाणो वतुः प्रत्येकं संबध्यते अवतो नामिवत इति अवत्वं इति चाऽनुपधाकारेण ग्राह्यं उ
पधाया अतः पूर्वत्रासिद्धत्वादंत्यस्य पत इति लोपविधानात् अस्कांत्सीत् अप्राक्षीत् अभ्राक्षीत् अचिकीर्षीदित्यत्र अत्वऽलोपः अनैक्षीत् अरौत्सीत् अवैक्षीत् अ
तैषीदिति तु पूर्वेणाऽपि सिध्यति न च परत्वादनेन विधेयस्यैकेन विरोधाऽभावात् परेणैतस्या प्रवृत्तेः ननु वतुग्रहणं मास्तु अनामिन इत्येवोच्यतां विधानवृ
लाच्च पूर्वस्याविषयेऽस्य प्रवृत्तिर्भविष्यति न च नञ्समास भ्रमः स्यात् अनिटो धातोः सिणीदित्युक्ते नामिवतोऽपि प्रसक्तावनामिन इति निषेधः स्यादिति वाच्यं राम॰
अनिटोऽत इति वतुः शाकपत्वात् मैवं अचिकीर्षीदित्यादौ लोपं बाधित्वाऽतो वृद्धिप्रसंगात् अकारांतस्य धातोरिति संभवति सामानाधिकरण्ये वैयधिकरण्यस्याऽन्या १२

प्यत्वात् अंतस्यतुनामिनः पूर्वेणापि सिद्धत्वात् तद्वतो ग्रहणं भविष्यति नन्वत्र वतुर्न प्राप्नोति मांतोपधात्तद्विधानादिति चेन्न क्वचिदमांतोपधादपि वत्विनोस्तु इत्यनेनज्ञाप नात् तेन तडित्वानित्यादिसिद्धं यद्वा यत्र मोपधत्वं भावि तत्र वतुर्भवतीत्यनेन ज्ञाप्यते तेन शमोऽस्यास्तीति शमी शमोऽस्यास्तीति शमिवान् इत्यादि सिद्धं क्षामिमानित्या दौतु मत्वस्यासिद्धत्वेन भाविनोपि मोपधत्वस्याभावान्न वतुः मतोरेव वतुरादेश इति पक्षेतु नामिवत इत्यत्र युक्त एव वतुः नलोपे कृते मोपधत्वस्य सत्वात् ननु ज्वल नवद्वानित्यादौ मत्वर्थीयात् मत्वर्थीयो नास्तीत्युक्तत्वादिन्नेतात्कथं वतुरिति चेन्न अनामिवत इति समुदायस्येन्नंतत्वाऽभावात् यद्वा मत्वर्थीयाद्विरूपो मत्वर्थीयो भ वतीत्यनेन ज्ञाप्यते तेन दंडिमती शाला कुंजरवान् ग्राम इत्यादिसिद्धये इत्येवनेह अरंक अस्वतक वेटा मनिड्भाव पक्षे ग्रहणं भवति अक्षासीदित्यादि अकारप्रश्लेषा ऽभावे तत्विदं न सिध्येत् नामिवत एव ग्रहणात् नन्वनिट इत्येवास्तु मास्तु नामिवत इति स्वरादेरित्यतः स्वर इत्यनुवर्त्यते न च मत्वर्थे लक्षणाग्रात्याततत अस्वरवतोऽनि टोधातोः सिर्णित् कार्यं स्यादित्यर्थः इति चेन्नामिवत इत्यस्योत्तरार्थत्वात् एवं तर्हि अनिट इत्यस्याप्युत्तरार्थत्वसत्वाद्योगविभागो मास्तु अनिटो नामिवतो हशषां

॥ हषांतात्सक् ॥ ३५ ॥

तात्सं गित्येक एव योगोस्तु णित्ये इत्यपंतु सामान्येनोपधाऽनुपधाकारस्यांत्यानंत्यानामिनश्च णित्कार्यातिदेशार्थो व्याख्यायतामिति चेन्न अतौत्सीत् अनैक्षीदित्यत्रैव प्राप्नोति अमेधीदित्यत्राऽपि नामिनो वृद्धिप्रसंगान्नत्वनिटो धातोर्वृद्धिर्न सेट इति नियामकमस्ति अस्तु तर्हि योगविभागः स च नियमार्थो व्याख्येयः नामिवतश्चेदनिट एवेति सेटो न भविष्यति इति चेन्न अजैषीत् असैषीदित्यादिर्न सिध्येत् विपरीतनियमस्यापि सत्वे अनिटश्चेन्नामिवत एवेत्यराङ्क्षीदित्यादौ न स्यात् विधिनिय मसंभवे विधिरेव ज्यायानित्युक्तत्वाच्च अतो णित्ये इति योग उक्तार्थ एव अनिट इत्यत्र स्वरानुवृत्तौ नामिवत इत्युत्तरार्थमेव अकारप्रश्लेषश्च न कार्यः प्रयोजनाऽभावा त् स्वराऽननुवृत्तौ तु नामिवत इत्यस्यात्रापि संबंधः कार्यः अकारप्रश्लेषश्चेति दिक् अथ हश्च षश्च शश्च ते अंते यस्य तस्मात् अत्रांतग्रहणं चिंत्यं हशषादिति पाठ्यं तेन धातोर्विशेषणात्तदंतलाभः हांतात् शांतात् षांतादनिटो नामिवतो धातोः परः सक् प्रत्ययः स्यात् भूतमात्रार्थे दिवादौ परे सेरपवादः अमिक्षत् अधुक्षत् हृतं हु हिंसायां अजुक्षत् वेटोपीडभावे अनिट्त्वात् ग्रहणं अदिक्षत् अक्रुक्षत् अमृक्षत् अद्विक्षत् अक्रुक्षत् हसेषेति किं अरौत्सीत् अनैक्षीत् अनिटः किं अग्रहीत्

अभैशीत् अभोषीत् नामिवतः किं अथासीत् अराड॰सीत् दिवादौ किं द्वेष्टिलेट्द्धि भूतमात्रार्थे किं अलेट् अद्विष्टां अनद्यतनत्वस्यापि सत्वात् भूतमात्रार्थता पेइतीहनसंव
ध्यते न्य विस्तनेत्याद्य सिद्धि प्रसंगात् दुह दिह लिह गुहूभ्यः तुवपोर्नीतिसक् अधुक्षत् अदुग्ध अदुग्धाः अधुक्षथाः अधुग्ध्वं अधुक्षध्वं अदुहुवहि अधुक्षावहि एतच्चा
नुवृत्त्यावोध्यं चेह्नितोपमनुवृत्यत्वपृशस्पृशातृपृदृपां वासम्विधेयः को गुणप्रतिषेधार्थः ननुतं हेः इड्भावे सक् प्राप्नोतिनामिवत्त्वात्पाणिनीयमतेतुनप्राप्नोतिशलइगुप
धादितीगुपधत्वाभावादिति चेन्न तेषामपी गुपधत्वादलात्यादित्यत्रालग्रहणो जातिग्रहणात् अत्रतत्रएकाल्प्रत्ययइत्यत्रएकग्रहणेनैततत्ताप्यतेवर्णग्रहणेजातिग्रहणमिति
यथाविद्वांसावित्यत्रसातसंयोगस्योपधायादीर्घो भवतितथेदमपि शलइगुपधादित्यत्रशलइग्वतइतिसूत्रयितुमुचितमित्यभिप्रायेणभगवत्यानामिवत्इतिसूत्रितंयदि
तुज्ञापकसिद्धं नसर्वत्रेति जातिग्रहणं नेष्यते तदानामिवतइतिसामान्यशब्दस्य विशेषपरत्वं लक्षणीयं नामिवत्त्वंहि आदिमध्यांतनामिनाभवतीति सामान्यशब्दःनामुपध
त्वेतू पधांनामिनैव भवतीविशेषः तदा अतांक्षीदितिरूपमितिदिक् श्लिष आलिंगनेइत्यस्य पुषादित्वादङ् प्राप्नोतितद्बाधकः सको विधानार्थे श्लिषइतिवचनं कर्तव्यं सचालिं

॥ ञेरङ् द्विस्त्र ॥ ३६ ॥

गनेअनालिंगने चङ् स्यवाधकः प्राप्तः इष्यते च आलिङ्गने सक् अन्यत्र ङः आततु पूर्वेणासर्वत्रसगेवप्राप्तोनसिरत आलिंगनेइतिनियमार्थं वचनांतरंकर्तव्यं आलिंगनएवसक्
नान्यत्रेति आश्लिक्षत्रामः सीतां अनालिंगनेतु समश्लिषज्जतु काष्ठं नचेरामप्य पंबांधेतेतिवाच्यं पुरस्तादपवादाअनंतरान्विधीन्वाधंतेनोत्तरानितिपरिभाषणात् उपस्थि
तलाघवमूलकं चेदं वाधकस्यानंतरेणैव बाध्याकांक्षा पूर्तौ व्यवहितग्रहणं नन्याय्यं आश्लेषि सीतारामेण आश्लिक्षातां आश्लिक्षंतसि पक्षे आश्लेषि आश्लिक्षातां आश्लि
क्षत आश्लिक्षाः आश्लिक्षिषुमादिपाठस्त्वनालिंगनेङ् विधानार्थः ३५ ञेरिति प्रत्ययो गृह्यते प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदंतस्यग्रहणमिति अंता द्धातोः क
र्तरि भूतमात्रार्थे दिवादौ परे ङ् प्रत्ययो भवति सेरपवादः अचीकरत् अजिग्रपत् कतिरिकिं अकारिषातां घटौ कुलालेन अपकर्तरि इत्यतो मंडूकप्लुत्या कर्तरी
त्यनुवर्तते भूतमात्रार्थे किं अकारयत् दिवादौ किं कारयति ङ्कारो ङ्लघाविति विशेषणार्थः द्विरितिवाक्यांतरं अत्रादि त्यनुवर्तते सप्तम्याविपरिणम्यते क्रि
याग्रतिमत्तानार्थात् द्विशब्दात्सुः तेन गण्यमानावचनरूपा क्रियाऽऽसिप्यते ततश्चाऽङ्डि परे अयं तस्य धातोर्द्विर्वचनं भवतीत्यर्थः तच्च नित्यत्वात् णिलोपेकृते

प्रवर्त्तते उदाहरणं तु प्राग्उक्तं वाक्यद्वयबलेन अङ् द्विर्वचनयोः समावेशस्य सिद्धत्वाच्चोव्यर्थः अत एवेति वाक्यांतरं श्विदुस्तुकमिभ्यो ऽन्यं तेभ्यो ष्यङ् कर्त्तरि भूतमात्रार्थे दिवा
दौ द्विश्च अशिश्वियत् अदुद्रुवत् असुस्तुवत् अस्मादेव चकारादनुवर्त्तिताद्वाधेट्श्विभ्यां वाङ् अदधत् अशिश्वियत् ॥ ईर्लृदित्यस्य असलित् पुष आदिर्यस्य स पुषादिः अ
न्तर्भूतावयवः समुदायोऽन्यपदार्थ इत्येकवचनं लिच्च पुषादिश्चानयोः समाहारः लित्पुषादि क्लीबत्वस्यानित्यत्वान्नुमो वा पुंस्त्वं लितो धातोः पुषादेश्च ङः प्रत्ययो भवति
भूतमात्रार्थे दिवादौ परे अगमत् अपिषत् अपपत् अशमत् भूते इति किं अगच्छत् दिवादौ किं गच्छति पिकिं समगत अविस्रतत्पुतादेरित्यपि वक्तव्यमेवं द्युतादयो
लित एव पाठ्याः अनुदात्तेत्वार्थकश्चिदनुबंधः पठनीय एव सलृकार एव पाठ्यः यत्रापि वृतसंज्ञादौ इड्विकल्पार्थ उवर्णः पठितस्तत्रापि ङार्थः लृकारो पि पाठ्यः यद्वा अ
ङः तु इति सत्वे ङविधानं योगविभागार्थं न चाङि सति द्विर्वचनप्रसंग इति वाच्यं सन्नियोगशिष्टन्यायेन जेरङि सति द्विर्वचनं न तस्मिन् यथा परोक्षार्थणादियोगे द्विर्वच
नं भवति न तु विद्योनवानाभिप्रायादिविहिते योगेन चाऽङि लघो ह्रस्व उपधाया इत्यस्य प्रसंगः लित्पुषादेत्यर्थोपधाचाभावात् द्वित्वाऽभावेन पूर्वस्येत्वाऽप्रसंगाच्च अतो धातो

॥ लित्पुषादेर्ङः ॥ ३७ ॥ इरितो वा ॥ ३८ ॥ इणातन्यः कर्त्तरि ३९ ॥

ङ इत्यनेन सूत्रेण अलस्य स्पर्शनात् पुतादेर्ङो विधीयते न धातुमात्रात् किं चाऽस्यतिवक्तिख्यातीनां लित्वेन न निर्वाहः आतिङ स्याप्रसंगात् निरास्थत ब्रूञ् अवोचत् अख्य
त् किं च लिपिसिचिह्वां लित्वेन येनिर्वाहे ष्याऽऽतिविकल्पार्थवचनारंभप्रसंगात् ङ इति योगविभागेन सिद्धमिष्टं उषादिर्दिवाद्यंतर्गणो आत्यः लित्साहचर्य्यात् लितो हि प्रा
येणानिटस्तत्साहचर्यात् पुषोप्यनिट् आत्यः सच दिवादिसुदादिर्गणो यात्यः नभ्यादिः न सेट्त्वात् न क्र्यादिः न चुरादिर्जिनाव्यवधानाच्च ३७ ॥ इरित् यस्य स तस्मात् इ
रितो धातो र्वा ङ प्रत्ययो भवति मात्रार्थे दिवादौ परे सेरपवादः अरुधत् अरौत्सीत् अविजत् अवेक्षीत् भूतमात्रार्थे किं अवेवेक् अवेविक्तां दिवादौ किम् रुणाद्धि वेवेक्ति अ
त्र वर्त्तमानसमीपे भूते तिवादि विधानादस्ति भूतमात्रार्थता पे किं अरुद्ध अविक्त इरितः किं अचेतीत् ननु न्हस्तं मुच्चुम्लुचुग्रुचुग्लुचु ग्लुंचु श्विभ्यो ङो विधेय इरि
त्वाभावात् इति चेत् सत्यं न्हस्वरदु वोश्विरृदित्यादि पाठे एव लाघवं न तु वचनारंभे यद्वा हिश्चेति चमनुवर्त्यैतमनुक्तसमुच्चयार्थे व्याख्यायते ऽप्रियात्त्वा इति दिक्
३८ अत्र त्रीणि वाक्यानि विधेयस्यादौ पाठात् प्रथममिरिणातितत्र सीदेत्यादि तेत्यादि स्यप्सीति चानुवर्त्य सप्तम्याविपरिणामनीयं उत्तरसूत्रात् कर्त्तरीत्य ऽपकृष्यभाव

कर्मणोग्रात्वे ततश्च सीतास्य पृसिपरेखुभावे कर्मणिचार्थे धातोर्णप्रत्ययः धातोरित्यनेन स्वरांतानां हन् ग्रह दृशां च ग्रहणं योगविभागादिष्टसिद्धिरिति स्वीकारात् भावि
षीष्ट भविषीष्ट भाविता भविता भाविष्यते भविष्यते कारिषीष्ट कृषीष्ट कारिषीयास्तां कृषीयास्तां कारिता कर्ता कारिष्यते करिष्यते अकारिष्यत अकरिष्यत अकारिषातां अकृषा
तां घानिषीष्ट वधिषीष्ट घानिताहंता घानिष्यते हनिष्यते अघानि अवधिग्राहिषीष्ट ग्रहिषीष्ट ग्राहिष्यते ग्रहिष्यते अग्राहिषातां अग्रहिषातां दर्शिषीष्ट दृक्षीष्ट कारिषि
ष्ट कारयिषीष्ट स्वरांतेत्यादि किं पक्षीष्ट पक्ता भावे कर्मणीति किं करिष्यति अकार्षीत् सीष्टेत्यादि किंच रूपं चकृद्वे शिश्यिद्वे तनीति द्वितीयं वाक्यं धातोरिणप्रत्ययो
वा भवति तनि परे उत्तरवाक्ये अकर्तरीति पर्युदासादिह कर्तरीति लभ्यते वेत्यनुवर्तते व्यवस्थितविकल्पत्वात् दे रिणनित्यं दीपजनबुधपूरितायिप्यायिभ्यो वा अपा
दि अदीपि अदीपिष्ट अजनि अजनिष्ट अबोधि अबुद्ध अपूरि अपूरिष्ट अतायि अतायिष्ट अप्यायि आप्यायिष्ट अकर्तरीति तृतीयेवाक्ये कर्तुरन्योऽकर्ता तस्मिन् धातो
रिणप्रत्ययो भवति भावे कर्मणि चार्थे तनि परे अभावि अपाचि भिस्सा॥ अकारि घटः तनि किं अकृषातां भाव इति किं अकृत घटं कुलालः नकारं विना ते इत्युक्तौ तु तेत्यादौ

॥ लोपः ॥ ४० ॥ दिस्योर्हसात् ॥ ४१ ॥

मध्यमेऽतिप्रसंगः स्यात् ३९ तनीत्यनुवृत्तं षष्ठ्या परिणमनीयं इणीति तु पंचम्या इणः परस्य तनो लोपः उदाहृ सांतु प्रागेवोक्तं ननु तन इति षष्ठीनिर्देशेंत्यस्य लोपः स्यादिति चेन्न
आदेरित्यनुवृत्त्याऽऽदेरपि लोपविधानात् यद्वा लोपो ह्रस्वाक्षसइत्यतो लोप इत्यपकृष्यते तेन ह्योर्लोपः यद्वा लुप्यते इति लोपः कर्मणि घञ् तनीति तु प्रथमया विपरिण
म्यते तेन तन् लुप्यते इत्यर्थः षष्ठ्यभावात् सर्वस्य लोपः क्वचित्तु लुगिति पाठः तत्र सर्वस्य तनो लुग्भवति इणः किं अभविष्ट तनः किं भाविषीष्ट ४० हसात्परयोः दि
स्योर्लोपः अहन् अनेनेक्"हसात्किं अभवत् दिस्योः किं अतिदिस्सहचरितस्य सेर्ग्रहणान्नेह अस्ति ननु संयोगांतलोपेनेवगतार्थमिदं सत्यं इदमेव ज्ञापयति रास्त
स्येति सूत्रमस्ति तेनाविभर्भवानित्यादौ संयोगांतलोपो न स्यादित्यस्यारंभः सिग्रहसांतूतरार्थं ननु अरोदीन् अरोदद्दित्यत्रातिप्रसंगः हसात्परत्वात् अडीटोः सतोरपि
दिसित्वानपायात् परागमास्तद्ग्रहणेन गृह्यंते इति न्यायात् मैवं अर्थवत्ताभावात् कर्तृसंख्यार्थयोर्दिस्योर्ग्रहणात् अडीटोः सतोः समुदायस्याऽर्थवत्त्वेन दिसो
रानर्थक्यात् यद्वा परागमाइति न्यायेन विभक्तित्वं प्रत्ययत्वं गृह्यते तेन हि दित्वं सित्वं इरुच्चारणार्थः वत्वसत्वजातिवत्त्वस्य समुदायेऽभावात् दिस्योस्तु हसात्परत्वाऽ

रुद् आदिर्यस्य स्वादेश्च रुदादिस्तयोः समाहारः अतेः रुदादेश्च परयोर्दिस्सिपोरडागमः आदत् आदः अरोदत् अरोदः स्वप् श्वस् अनजक्षा एवं अदिति किं अयोत् दिस्सोः
किं अतिरोदिति माधवस्तु दिवादावडित्यस्मात्परमदो दिस्योरिति सूत्रमस्तीत्याह तन्न गौरवात् अत्र त्वट्मात्रं निरतं रुदादेरडिति तु त्वयापि वक्तव्यमेव दिस्सोरिति त्वनुरति
लभ्यं ४२ रुदादेरित्यनुवर्तते अट्ग्रहणं तु निरतं कचिदेकदेशोऽप्यनुवर्तते इति सीकारात् अस्तेरिति तु तत्रादिना व्याख्येयं तेन विद्यमानादस्तेरिति लभ्यते रुदादेश्च परयो
र्दिस्योरीडागमः आसीत् आसीः अरोदीत् अरोदीः एवं स्वप् श्वस् अन् जक्षाः विद्यमानात्किं अस्तेर्भूरित्यादेशे माभूत् अभूत् दिश्योः किं अस्ति अस्तेः किं अदात् ४३ अ
त्राऽस्तेरित्यनुवर्तते तच्च सेर्विशेषणं विद्यमानात् सिप्रत्ययात्परयोर्दिस्योरीडागमः अचेतीः विद्यमानात् किं अदात् अत्र प्रत्ययलक्षणेन सेः परत्वमस्ति विद्यमानादि
ति विशेषणान्नेट् सेः किं अरुधत् डात्परयोर्माभूत् दिस्योः किं अचेतिष्टां योगविभाग उत्तरार्थः ४४ ह्रस्वात्परस्य सेर्लोपो भवति झसे अकृत अहृत ह्रस्वात् किं अनैष्टां झसे किं
अकृषातां सेः किं अशिश्वियत् अत्र लोप इति योगो विभज्यते सगितिस्वरेति चानुवर्तते सकोलोपो भवति स्वरे परे अधुक्षत अधुक्षातां अधुक्षंत केचित्त्वत्र स्वरेणानुव

॥ अट्रुदादेरट् ॥ ४२ ॥ अस्तेरीट् ॥ ४३ ॥ सेः ४४ ॥ लोपो ह्रस्वाज्झसे ॥ ४५ ॥ इट ईटि ॥ ४६ झसात् ॥ ४७ ॥ दादेः पे ॥ ४८ ॥ मेऽटः ॥ ४९ ॥ ६

र्तयंति लोप इति चानुवर्तयंति केचित्सर्वस्य सको लोपः तु वयोरात्येव अदुग्ध अधुक्षत अदुग्धाः अधुक्षथाः अदुग्ध्वं अधुक्षध्वं अदुह्वहि अधुक्षावहि अधुक्षामहि इ
त्यादि सिध्यतीत्याहुः ४५ इटः परस्य सेर्लोपो स्यादीटि अचेतीत् अलावीत् इटः किं अचैषीत् ईटि किं अलाविष्टां ४६ झसात्परस्य सेर्लोपो झसे अरौद्धां अगोप्तां झसा
त् किं अचेष्ट झसे किं अरौत्सुः सेः किं अरुध तां डः स्य माभूत् लोपो ह्रस्वझसाज्झसे इति पठितुं युक्तं पृथक्करणं चित्यफलं ४७ दा आदिर्यस्य स दादिः तस्मात्सेर्लोपः पे
परे डुदाञ् दाण् दो इत्येते धा दा शब्देन ग्रहणं दाप् दैपोस्तु न लक्षणानुसारात् अदात् धाञ् अधात् अस्थात् इण् अगात् पिबति अपात् अभूत् शा छा सा घा धेट् भ्य
स्तु वा शो अशात् अशासीत् छो अच्छात् अच्छासीत् षो असात् असासीत् अघ्रात् अघासीत् दादेः किं गे अगासीत् पे किं अदित अधित से किं दास्यति ४८ मे
इति योगो विभजनीयः सिरित्यनुवर्तनीयं माशब्दे प्रयुज्यमाने सिर्भवति स च दिवादिपरो ह्यशोदिवादिपर एवात्र भवति ननु भूते सिरिति सिर्विहित एव किं पुनर्वि
धानेनेति चेत् सत्यं स भूते विहितः कालांतरे त्वनेन विधीयते तेन सर्वेषामाख्यातानां विषये सिर्भवति मा शब्दयोगे मा शब्दोऽव्ययं नास्तीति माशब्दोऽत्र त्यते प्रयोगे ड·

च·आ·
ल·भा·
१५

काराऽश्रवणात् ङि· दङि· इत्याकरणांतराऽनुरोधात् ङि· देववाग्रात्यः श्रदइतिद्वितीयोयोगः मेइतिलोपइतिचानुवर्ततेमाशब्देप्रयुज्यमानेसत्यटोलोपःमाभवान्
भूत्माभवान् भवत् मेकिं नाभवत् अटः किंमाप्रभूत् प्रस्यलोपोन ५० उवर्णात्यस्स्य हेर्लोपः वेतिनविकल्पार्थं किंतुप्रत्ययसंबंधिनोऽसंयोगपूर्वादित्यस्याऽर्थस्यप्रतिपा
दनार्थं उकारश्चप्रत्ययावयवः प्रत्ययरूपश्च गृह्यते सुनुतनुप्रत्ययसंबंधिनः किं युहिरुहि असंयोगपूर्वात् किं शक्नुहि ओः किं क्रीणीहि हेः किं ननुयः ५० हेर्लोपःभव
अतः किं युहिरुहितिपरः किं याहिहेः किंभवतः तातङोपिस्यानिवद्भावेनहित्वात् प्राप्तोलोपावत्यनुवृत्त्याव्यवस्थितविकल्पाश्रयणान्नयद्वातङ्भावोन्यायसिद्धोज्ञाप
कसिद्धोवोभयथाप्यनित्यत्वात् तातङि· हित्वंनाऽऽयातियद्वासकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेतिनतातङोलोपः तातङोऽवकाशस्तु अतात् हिलोपस्यावकाशः
प्रेरयार्थेतातङ्भावपक्षे आशिषोऽर्थेतातङ्पक्षेनूभयप्रसंगेपरत्वात् पूर्वविप्रतिषेधाद्वातातङ् ५१ अच्चएवेतिष्टयक् पदेवाऽनुकार्याऽनुकरणयोरभेदविवक्ष
याविभक्त्यनुत्पत्तिः अतइतीहाऽनुवर्ततेषष्ठ्याविपरिणम्यते अतोलोपोऽतिएतिच पचंतिपचेअतः किं ब्रुवंति ब्रुवेतपरः किं यातिगेच्यवंतेच्यवेइत्यत्र च्युअंतेएङ्

॥ओर्वाहेः॥५०॥अतः॥५१॥अदे॥५२॥कोरा॥५३॥आदायइः॥५४॥या॥५५॥

तिचस्थितेलोपात्परत्वाच्चयपिगुणः प्राप्तस्तथापिनित्यत्वादलोपेकृतेङि· त्परत्वाद्गुणोनस्यात् मैवं प्रत्ययलक्षणेनगुणासंभवात् एतद्यत्यादौनुलुकिननन्नि
मित्तमितिनगुणः यद्वाप्रकृतिप्रत्ययाश्रितत्वेनपूर्वंपूर्वमंतरंगमितिवांतरंगत्वेनगुणः अदेकिंभवति आख्यातप्रकरणात्पूर्वोत्तरत्राऽऽख्यातस्यादेशविधानाच्चा
ऽदादिरेदादिश्चाख्यातप्रत्ययएवग्राह्योनेहदेवाव्रदेवैषायनुमाधवेनोक्तंधातुप्रत्ययेपुयस्यलोपइत्यऽस्याऽप्रवृत्तिरेनेनज्ञाप्यतइतितन्नतद्धितप्रकरणादेवत
स्याऽत्राप्रवृत्तेः सिद्धत्वात् ५२ वृचम्चश्चौतयोः परयोरतआभवति भवामिभवावःभवामःअतः किंचिनुवः चिनुमः वमोः किंभवथः भवथउक्तरीत्यानेह
रामवायुः ५३ आच्चआचआदात् तस्यआतेआतां आथेआथां इत्येतेषांटिंविहायाऽनुकरणं अतः परस्यआतः आयश्चात् इर्भवतिएधेतेएधेतां एधेथांआदायः
किंभवावभवाम आर्किं अंत्यस्यमाभूत् अतः किं ब्रुवातेब्रुवाथेतपरः किंगाते अंतरंगत्वाद्पः सवर्णेदीर्घेकृतेपुनः सवर्णेदीर्घः ५४ अनुकार्याऽनुकरणयोर राम·
भेदविवक्षयाऽविभक्तिकोनिर्देशः अतः परोयाइर्भवतिभवेत् भवेतां मध्यऽभावान्नोत्पादेशः जसीतिवत् अतः किं पुयात् तपरः किंपायात् याकिंभवतां ५५ १५

अतः परो यामियं भवति भवेयं अतः किं युयांतपरः किं यायां पाम् किं भवति ५६ अतः परस्य उस इडागमः भवेयुः इत्वादयमा ऽऽगमो ऽन्यथा इरित्येवा ऽनुवर्तयेत् इड्ग्रहणं च
ना ऽकरिष्यत् ५७ उकारप्रत्ययस्य उकारांतप्रत्ययस्य चा ऽसंयोगपूर्वस्य वा लोपः वमोः परतः ओर्वा हेरित्यतो वेत्यनुवर्तते तेतस्य चा ऽसंयोगपूर्वस्य प्रत्ययस्येत्यर्थः सुन्वः सु
नुवः सुन्मः सुनुमः तन्वः तनुवः तन्मः तनुमः सुनोमि तनोमीत्यत्र तु परत्वाद्गुणो भवति प्रत्ययस्य किं युवः युमः असंयोगपूर्वस्य किं शक्नुवः तक्ष्णुवः वमोः किं सुनुतः
ओः किं अकुर्वहि ५८ कृञः परस्योप्रत्ययस्य लोपो वमोश्च कुर्यात् कुर्वः कुर्मः अत्र वमोरित्यनुवृत्ति सामर्थ्यान्नित्यो लोपः माधवस्तु कृञो ये इत्यत्र कृञ इति योगविभागः
कर्तव्यः तत्र ओर्वमोर्लोप इत्यनुवर्तते न विकल्पो योगविभागसामर्थ्यादित्याह ये किं कुरुतः कृञः किं सुनुयात् ओः किं अकुर्वहि ५९ कृञो तङ्स्यादिङिति उपि परे गुणो कृ
ते कुत्रो ऽग्लप्स्यते कुरुतः कुर्वंति अत्र य्वोर्विहसे इति दीर्घो न संज्ञापूर्वकत्वात् कृञः किं भवतः ङिति किं अकरवं अत् किं अत्र तः गुणो कृते रेफस्य वा मा भूत् तपरः किं अकार्षं कुरु
त इत्यादौ यथा द्वाभ्यां व्यवधाने भवति तथा ऽत्रापि स्यात् किं च तपरत्वमुकारार्थमपि उकारे इ निकृते मितो गुणो मा भूत् ओरित्यनुवृत्तौ तूकरणं तपरत्वार्थमेव तपरत्व

मानियं ॥ ५६ ॥ उत इड् ॥ ५७ ॥ ओर्वमोर्वा लोपः ॥ ५८ ॥ कृञो ऽये ॥ ५९ ॥ ङित्यदुः ॥ ६० ॥ नातः ॥ ६१ ॥ ईहसे ॥ ६२ ॥ हेस्तौ ॥ ६३ ॥ छ्

मसंदेहार्थमिति माधवः तन्त्र ङित्युरिति पाठे पि संदेहाभावात् ६० ना आते इति च्छेदः येति वन्नेत्यविभक्तिकं ना प्रत्ययस्या ऽऽतो लोपो ङिति हसे ई विधानात् परिशेषात् स्वरे
लोपः क्रीणंति क्रीणाते ना किं यांति ङिति किं अक्रीणां आतः किं येति ईकारवत्सर्वस्य मा भूत् यदि तु नेति षष्ठी व्याख्यायते तर्हि हेरित्यत्रा ऽर्थेस्य षष्ठ्यर्थमिहैव स्तुतं आत इति षष्ठी
व्याख्याने क्लेशो मा भूत ६१ ना प्रत्ययस्या ऽऽत ई स्यात् ङिति हसे क्रीणीतः क्रीणीहि ङिति किं क्रीणासि हसे किं क्रीणंतु ना किं यातः ६२ हेरुच्चारणे स्तोमस्येति हिरस्मादेव ज्ञा
पकान्मत्वर्थीयः इः यस्य लोपः यद्वा द्विवचनमस्यास्तीति मत्वर्थीय इः अव्ययस्य तद्धितपरस्वरयोष्टिलोप इति लोपः कृत्वोर्थसुप्रत्ययांतस्या ऽव्ययत्वात् एतस्य वचनस्य सत्त्वे
ये चनिर्देशो लिंगं वा हि भवो वा ह्यः सौवः इत्यादीनि च सिध्यंति यद्वा द्विरकारि निङ्ङित्कारणे सति तस्य टिलोपः औणादिके इ प्रत्यये टिलोपः यद्वा द्व्येकयोरित्यत्र संख्यामात्र वच
नो द्विशब्दो ऽस्ति संख्येयार्थत्वे तु द्व्येकधितिस्यात्तस्य च मत्वर्थलक्षणया द्वित्ववान् धातुरेत्युच्यते द्वित्वं चोच्चारणं विना न संभवतीति तदाक्षिप्यते तत्पदाचत्वं तु न भवति गौणत्वात्
द्विरुच्चारितस्य धातोरातः ई लोपो ङिति मिमीते मिमते जिहीते जिहते द्विः किं वातः वांति ङिति किं जहाति अजहाम् धातोः किं हाहो माधवस्तु देरुपे विच्छेते यस्या सो द्वि

चं· भ्वा· ल· भा· ९६

स्तस्मात् द्वेरिति सह्वारेरितिद्विमत् शब्दस्याऽस्त्यर्थे मत्वं तस्याऽतएव लिंगात् द्विरादेश इत्याह यत्तु यथा शुक्लो गुणवान् शुक्ल इति शुक्लवत् शब्दस्य शुक्लादेश इत्याह तन्न अ
मेदोपचारेणाश्वइकाविति अप्रत्ययेनत्वासि द्धत्वात् ताविति किमर्थं ईलोपयोरवृत्तेः सत्वात् मैवं अनंतरत्वादीरनुवर्तते तेन लोपः ननु तर्हि द्वे श्वेति पाठ्यं अनंतरत्वादीश्वा लो
पोऽनुवर्तते मैवं डितिह सेलोपः डितिस्वरे ईरिति विपर्ययस्यापि संभवात् ताविस्युक्तेनु याद्दृशोपूर्वं तद्दृशौ ताविवानस्त इति न दोषः ९२ नम्‌च अस्‌च अनयोः समाहा
रो नमस् तस्य नमिति प्रत्ययो गृह्यते प्रतिपदोक्तत्वात् न धातुर्लाक्षणिकत्वात् तस्य हि आः दः स्स इति कृते नमिति रूपं प्रतिपदोक्तं शीघ्रं बुद्ध्यारूढं भवति लाक्षणिकं तु ल
क्ष्याणानुस्मरणद्वारेणेति विलंबोपस्थितिकत्वान्न गृह्यते प्रत्ययाऽप्रत्यययोर्ग्रहणे संभवति सति प्रत्ययग्रहणस्यन्याय्यत्वात् तस्य प्राधान्यात् असिति प्रत्यय औणादि
को न गृह्यते उणादीनां तु कचिद्युत्पत्तिकार्याऽभावात् अतएव वक्तुं सेनपयइति न भवति धातुरपि असदीतो असुक्षेपणे न गृह्यते विकरणाव्यवधाने न डित्परत्वाभावात् न
मो विकरणस्य डितोऽसंभवात् यथातिवादेर्डितो ग्रहणं तथाऽस धातोरप्येतादृशोऽसभुव्येव नन्वस्तेरपि कथं ग्रहणं लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव स्वीकारा

॥ ७ ॥ नमसोऽस्तु ॥ ९४ ॥ ७ ॥

दिति चेन्नुएतद्वचनस्यन्यायस्य वात्राभावात् असस्यैव साक्षान्डित्परत्वसंभवाच्च यद्वा अस्तेरीडित्यत अस्तेरित्यऽनुवर्त्य अस्तेरिति रूपस्य प्रकृतिभूतो योऽसिति व्याख्यानात् माथवस्तु
ननु किमर्थं नमिति निर्नेत्यर्थो धातुर्गृह्यते विकरणो वा उक्तं तत्रास्ति धातुसाहचर्याद्धातुग्रहणमिति तन्न असधातोर्ग्रहणमिति निर्णयाऽभावात् अस प्रत्ययग्रहणस्याऽपि संभवात्
दपि सत्यं अस्तेस्तु न पि भादेशेन प्रयोगाभावाद् विषयो विभक्ति चतुष्टयमस्य सूत्रस्य निमित्तमनुमीयते इत्युक्तं तदपि न भविता भविष्यति इत्यादौ स्यानिवद्भावेनास्तित्वादऽ
कारस्य च श्रूयमाणत्वात् शास्त्रप्रवृत्तिसंभवात् डित्परत्वाभावादितिवक्तुं युक्तत्वात् राज्ञादिया दाचोः किंत्वं न डित्वं सिस्योरुतादिपर्युदासात् न डित्वं स्वपक्षपितत्वात् यदपि न चात्र
डित्यनंतरो नमतिः संभवति अपाव्यवधानात् नमंतीत्यादावप्यल्लोपस्यतद्भावातदवस्थमेव व्यवधानमित्युक्तं एवमेवास्तेरपि वक्तुमुचितं यदपि नापि येन नाव्यवधानमिति न्यायस्या राम·
प्ययं विषयः वचनस्य विकरणाग्रहणे नापि चरितार्थत्वादित्युक्तं तदपि न धातुग्रहणहेतुत्वेनोक्तस्य साहचर्यस्याऽदूषितत्वात् प्रत्ययग्रहणे हेतोरप्रतिपादनाच्च यदपि न चात्रापि १६
धात्वक्षरेणाव्यवायइत्याशंक्य विधिकाले एवमस्येत्संज्ञातः प्राग्‌लोपात् पश्चाच्चमित्वेनांत्यस्वरात्परत्वमित्युक्तं तदपि न विधिकाले इत्यस्य सूत्रे एवेत्यर्थः प्रयोगे वानाद्यः सूत्रे

त्वासंभवात् मस्येत्संज्ञातः प्रागल्लोपविधानेमकारव्यवस्थानस्याऽपरिहरणीयत्वाच्चनांत्यः मस्येत्संज्ञाभावेनांत्यस्यात्परत्वाऽसंभवात् धातोः परत्वप्रसंगात् अक्षरेणेत्यस्य स्वमतेन हसहितस्यस्वरस्याक्षरत्वांगीकारात् द्वात्रिंशदक्षराअनुष्टुबिति व्यवहारात् धातुवर्णेनेति वक्तुंयुक्तत्वाच्च यद्यपि सूत्रेप्येवंनमस इति मकारनिर्देश उपपद्यते अन्यथा नामस इत्येववाच्यस्यादित्युक्तं तदपि न नामस धातोर्यहरा प्रसंगात् किंच धानार्य इत्यादौ नामत्ययाऽकारस्यापि लोप प्रसंगात् न आस इतिच्छेदेन आसेः परस्य नस्य नस्याप्रसी नायेत्यादौ अल्लोपस्यसंभवात् रुंधः रुंधंति सः संति नमसः किं भवतः अपोनलोपः ङितिकिं रुणद्धि अस्ति अस्य किं अस्तेरंत्यस्यमाभूत् अत्राऽस्येति चिंत्यंनात इत्यत्र नास्येति पठितं युक्तं अस्येत्यस्योतरत्रानुवृत्तिसंभवात् एवंचधात्ववयवेनव्यवधानात्वन्मते कथं नमो ङित्परत्वमेवंनमः ङित्परत्वाविवक्षणान्नमः प्रकृतिभूतस्यधातोर्ङित्यरत्वस्याविवक्षणात् धातोर्ङितिपरे इति दिक् ६४ अस्यग्रहणमनुवर्तते ननमस्काराभावादस्तेः सस्यलोपे सकारे असिव्यतिसे अत्रोर्वाहेरित्यतो हे रित्यनुवर्त्तते शब्दाधिकारश्चाऽयंहस्वरितिच्छेदः अस्तेः एकारसंबंधिनः सस्यहः स्यादिति वाक्यभेदेनव्याख्येयं एकारसंबंधश्चततो व्यवहितपूर्वत्वं तेनव्यतिहे इति सिद्धं अस्तेः किं वस्ते सि किं

॥ तिसः ॥ ६५ ॥ धातोंऽतोदनतः ॥ ६६ ॥ द्वेः ॥ ६७ ॥ अनउस् ॥ ६८ ॥ स्याविटः ॥ ६९ ॥

असिसः किं अस्यमाभूत् नवाऽस्य पूर्वेणैव सिद्धेः पित्यसिद्धत्वादिति दिक् ६५ अंति अंते अंतां अंतेत्येतेषां पंचानां टिं विहाय प्रागभावस्यानुकरणं आदितिनु अंत्यानां नवानां संज्ञेत्युक्तं आत् संबंधिनोऽनकारान्तं परस्यांतो भवति रुंधते सुन्वता आतः किं युवंति अंतः किं रुंधाता अनतः किं एधेते तपरः किं गाते गा अ अंते इति स्थिते प्रकृत्यासहांतरंगत्वादयः सवर्णे दीर्घः पश्चादत् अनत् इति पर्युदासो लाघवात् प्रसज्यप्रतिषेधेत्वऽनन्वितसमासो वाक्यभेदश्चाऽऽश्रितः स्यात् ६६ पूर्ववत्प्रक्रियादिरुक्ताद्धातोः परस्यांतो द्भवति पार्थमिदं आतितु पूर्वेण सिद्धं जुह्वति जहति नेनिजति द्वेः किं युवंति अंतः किं जुहुतः ६७ द्विरुक्तात्परस्याऽनउस् भवति अजुहवुः अनेनिजुः द्विरुक्तात् किं अब्रुवन् अनः किं अजुहवं उसित्यावर्तनीयं लोपश्चात इति चाऽनुवर्तनीयं उस्याकारस्य लोपः अदुः अधुः ६८ शिश्च आश्च विच्च एषां समाहारः स्याविट् तस्मात् अनवाक्यत्रयं सेरित्याऽद्यं वाक्यं तत्र सि प्रत्ययो गृह्यते प्रत्ययाऽप्रत्यययोरिति न्यायात् विकरणव्यवधानाद्धातोः परस्याऽनो संभवाच्च अश्नेचेति शुः अनाग्सेरित्यनुवृत्यविद्यमाना त्सेरिति व्याख्यानान्नेह अभूवन् प्रत्ययलक्षणेन सेः परत्वात्यामि सेः किं यतन्वन् अनः किं अचेति ष्टां आ इति द्वितीयं वाक्यं आकारात्परस्याऽनउस् अदुः यदित्वत्र वा

क्वेसिग्रहणमनुवर्त्ततेसेः आकाराच्चपरस्याऽनउसप्रत्ययलक्षणेनसेः परत्वंश्रुत्याचाऽऽकारात्य रत्वंतदेदंनियमार्थंभवतिप्रत्ययलक्षणेनसेः परस्ययदिभवतितर्ह्योद
तादेवेति अत्रपसेऽनद्यतनेनभवतिप्रथमवाक्यरीत्यानुभवतितेनविकल्पः फलितः अयुः अपान् चेत्यनुवृत्त्याद्विषोऽपिसंग्रहः अद्विषुः अद्विषन् आतः किं अदुहन् अ
नः किं अदात विद इति तनीयवाक्यं विदेः परस्याऽनउस् अविदुः भूतमात्रेतुसेरित्यनेनैवसिद्धे पुनः विद्ग्रहणं अनद्यतने अनउसविधानार्थम् विदेः किं अद्विहन् अन
किं अवेदं अत्रसिविदः इति सूत्रणीयं तत्र आत इति सूत्रणीयं ततो राज्ञाविति इत्थं चाकारग्रहणं न कर्त्तव्यमिति लाघवं एवं कुतो न कृतमिति चिंत्यं ७१ आत इत्यनेन धातोर्वि
शेषणात दंतविधिः आदंताद्धाऽऽकाररूपाच्च धातोः परोणड्डौभवति ददौ औ अइ वा च चार इति विग्रहे अणविति स्थिते अस्य द्वित्वं आम्वोरित्यात्वं सवर्णेदीर्घः अनेन औ आ
तः किं निनाय तपरः किं कइ वा च चारचकः आदित्युक्ते तु स्यात् अत्र आ इति पंचमीनिर्देशः उक्तोव्यर्थः सः चकेत्यादौ पदिपरत्वाल्लोपस्तदाऽऽदितिर्दिशेपिनक्षतिः सार्थकं
दत्ताथ अत्रौ इत्येवास्तु तर्हि मध्यमपुरुषबहुवचने एव स्यात् निरनुबंधकग्रहणेनसानुबंधकस्येतिन्यायात् तर्हि णा इत्येवाऽस्तु तर्हि ज्वलादेर्णप्रत्यये अवश्याय अवस्याय इ

॥ आतोणल्डौ ॥ ७१ ॥ आदनुदात्तङितः ॥ ७२ ॥

त्यादावेवस्यात् एकानुबंधग्रहणे न द्व्यनुबंधकस्येतिन्यायात् तर्हि अवित्येवास्तु न च गातेइत्यादावेवस्यात् गा अते इति स्थिते अपः सवर्णेदीर्घो जायते एकानुबंधकन्या
यात् अतोऽणावित्युक्ते न च पकारादन्ये न द्वितीयाऽनुबंधेन सिद्धिः उत्तमपुरुषे णित्वाभावे कित्कार्यप्रसंगात् चकरेत्यादौ चक्रेत्यादि स्यात् अथ उकारः किमर्थं औरेवविधी
यतां आविति कृते आतोयुक् प्रसंगः न च णित्वाभावान्नसः स्यानिवद्भावात्स्यानिवत्त्वे चेदं उग्रहणमपि ज्ञापकं इत्थं आतोयुगिति सूत्रे चिण्कृतोरिति व्यर्थे तस्मिन्नेव
कृते औ एतस्यांडित्वेनैव सिद्धत्वात् ७२ अनुदात्तश्च ङ् चानुदात्तङौ तौ इतौ यस्य धातोः सोऽनुदात्तङित् तस्मात् द्वंद्वांते श्रूयमाण इत् शब्दः प्रत्येकमभिसंबध्यते एनुमाध
वः निर्देशस्य सौत्रत्वादल्पस्वरस्याऽपि ङ् शब्दस्य परनिपात इत्याह तन्नङ् स्यहसांतत्वात् स्वरांतत्वे तु एत्वेऽनुदात्तङेत इति स्यात् स्वरितेत इति वत् द्वयोः स्वरांतयोर्मध्येऽल्प
स्वरस्यग्रहणात् तथा यन्ताणित्यादि ज्ञापकसिद्धं हितत् ज्ञापकसिद्धं न सर्वत्रेति देवतेदमर्थे इत्यादिना च तस्या नित्यत्वाच्च अनुदात्तेतो ङितश्च धातोरात् राधते शेते अ
नुदात्तङितः इति किं भवति अन्यपरार्थत्वेन धातोरात्मयणं किं अगमत् आशिश्रियत् इनऽङोर्ङित्वेपि धातुत्वाऽभावादात्मनेयत्नमाधवः न चैवं पडः नादपि न स्यादिति

वाच्यं ङि॰ त्वस्य ङि॰ कृतार्थत्वेनाऽसमुदायार्थत्वात् अवयवे हि चरितार्थं लिंगं समुदायस्य विशेषकं न भवतीत्याह तन्नयइं॰ तस्याऽपि धातुत्वेन पूर्वपक्षस्योक्तिसंभवाभा
वात् यद्यप्येवं तर्हि प्रायो विवक्षया धातोरित्युक्तमित्युक्तमतरपि नयइं॰ तस्य धातुत्वेन प्रायो विवक्षयेत्यस्य असंभवात् यदपि ङानुऽक्षोक्तु परस्मैपदप्रवृत्त्यनंतरं प्रवृत्तेन
ङि॰ त्वेन ङि॰ त्वेपि आत्मनेपदं न भवतिइत्युक्तं तदपि न ङानुक्षो धातुत्वाभावेन तदंतादातः प्राप्तेरेवाऽभावात् यदपि सूत्रे चाऽऽदिति नाम्नेकदेशेनाऽपि स्वर्वनामवत्स्यते भामा सत्य
भामा भीमो भीमसेन इतिवदित्युक्तं तदपि न आत्मशब्दयोरेवंसंज्ञात्वेन विधानात् तयोरेव सर्वत्राऽऽवृत्तिदर्शनात् आत्मनेपदपरस्मैपदशब्दयोः क्वचिदप्यऽदर्शनाच्च दृष्टांतो
ऽपि विषमः भीमभीमसेनशब्दयोर्द्वयोरपि पृथक्संज्ञात्वेन विनियोगात् समुदायस्य विनियोगे पि पूर्वोत्तरपदयोर्लोपविधानाच्च पचपि अनुदात्तङित आदिति वक्तुं युक्तं
लाघवाद्विधेयस्य पश्चाद्ग्रहणस्य युक्तत्वाच्च तथापि योगविभागार्थं विपरीतग्रहणं धातोः क्वचिदाद्भवति कोजानीते मुंडो भीषयते इत्यादिसिद्धं अथ किमर्थमिदमारभ्य
ते वर्तमानेति तित्यादिनादशविधा आख्याता विहिता एवतेषामाड्ढ्वीत्यादिनाऽर्थोऽप्रयुक्ता एवेति चेत् उच्यते आड्ढ्वीत्यादिनाऽख्यातानामर्थे नियमः कृतः धातुमात्राद्ध

॥ निविशादेः ॥ ७२ ॥ ञित्स्वरितेतउभे ॥ ७३ ॥ ६ ॥

वकर्मणो वादेवेति तेन धातोर्भावकर्मणोः पनेत्यर्थनियमः सिद्धः कर्तरि पं चेत्यनेन कर्तरि आत्पे विहिते तत्र किं धातुमात्रात् कर्तरि भवतः किं वा कस्माच्चिदिति संदेहः तत्र
प्रकृतिनियमार्थं पचतु सू॰ आऽऽरभ्यते अनुदात्तङित आदेवेति निविशादेरादेवेति यत एवकारस्ततोऽन्यत्रावऽधारणमिति प्रकृतिनियमः फलितो भवति तेनेभ्यः पं
न ७२ निपूर्वो विशःनेः पर इति वा विशेश्च इत्युच्चारणार्थः निविश आदिर्यस्य तस्मात् असंदेहार्थं वा पदकार्यस्य वारणमन्यथा निविड्डादेदित्युक्ते विशिरित्युक्तो विड्भेद
न इति वा संदेहः स्यात् आदिशब्दः प्रकारे तेन निविशप्रकाराः निविशसदृशा उपसर्गपूर्वा धातवो गृह्यंते व्यवस्था वा चिग्रहणं तन्न निविशादिगणाभावात् विविशते अत्र
निरुपसर्गो गृह्यते धातोः पूर्वोच्चारणात् नेह नयति यत्कुलं तन्निविशति विजयते नेह वेति यत्कुलं तत् विजयति पराजयते नेह पराजयति दूरामानोतमाः पराः आदेते
नेह आयच्छति अयति अततीति अतेर्डः अः स्त्रियामपि आशक्ति ददातिवाक्यस्मरणयोर्वाऽऽकारः अनुक्रीडते संक्रीडते नेह बालमनुक्रीडति बालेन सह क्रीडतीत्यर्थः ७४
इ इत यस्य स ञित् स्वरित इत् यस्य स स्वरितेत् ञिच्च स्वरितेच्चानयोः समाहारः ञित्स्वरितेत् तस्मात् उभे पदे आत्मसन्निहितमेव पंतुरित्ये इत्यतः परामृश्यते यद्वा ओदित्यनेनैव प धा॰

चं॰ आ॰ र्थं परस्य पूर्वीयेऽसत्वात् पूर्वास्यव पसंज्ञानीत्याशिष्यते माधवस्तु क्रमस्तु न भवति जित आत्मनेपदं स्वरितेतः परस्मैपदमिति सूत्रारंभसामर्थ्यात् अन्यथाहि ञितां नःस्था
ल॰ भा॰ नेङ्कारोपदेशेन ङितः इत्येव सिद्धमात्मनेपदं स्वरितेतस्तु परतोऽन्यदित्येव परस्मैपदमपि सिद्धं किमस्यारंभेण यदि तु ञितां यः स्वरितेत आदिति क्रम उच्यते तर्हि ञितां त्र
१८ कारत्यागेन ये सिद्धे स्वरितेतामनुदात्तेत्वपाठेनापि सिद्धे किं सूत्रेणेत्याह इदं चार्थसाम्यपक्षे उक्तं उभयशब्दस्य द्व्यर्थाभिधायित्वात् शब्दतः साम्यपक्षे तु यथासंख्यप्राप्तिरेव नास्ति उभेर
त्येकः शब्दः ञित्स्वरितेत इति द्वौ यद्वा नाऽत्र यथासंख्यवचनमस्ति किंतु ज्ञापकसिद्धं ज्ञापकसिद्धं न सर्वत्रेति न भविष्यति यद्वा सूत्रेणोपस्थितस्य क्रमस्य बाधकं विना बाधो न यु
क्तोऽनुकूलस्यासिद्धिर्वा धात्यज्यते अत्र चाऽनुबंधद्वयेत्याज्यं एकेनैव निर्वाहात् ञितोऽपि स्वरितेत एव पाठ्याः स्वरितेत उभ इति च सूत्रणीयमिति चेन्न इङ्कृञित्यस्य स्थाने इङ्कृञ्इ
त्यादि पाठे गौरवप्रसंगात् तर्हि स्वरितेतोऽपि ञित एव पाठ्या ञित उभ इति सूत्रणीयमिति चेत् न रुधिरित्यादौ रुधिर् ञ्रुत् तनुञ् इति पाठे गौरवप्रसंगात् न चेरितित्युकुंशाकयः ङार्थं
तस्याऽवश्यकत्वात् उकारस्य उदितो वेति इड्विकल्पार्थस्याऽवश्यकः एवं पूर्वसूत्रेऽपि ङितोऽनुदात्तानपठित्वा शक्याः शीङ् त्यादौ शीङ् इत्यादिपाठे गौरवप्रसंगात् न चानुदात्ताङि
त पाठ्याः स्पर्धङित्यादौ गौरवात् अकारस्योच्चारणार्थस्यावश्यकत्वात् न चाऽकारेण पाठ्य एधङित्येव पाठ्यं एवं तर्हि ङित्वेनैव सिद्धे यदनुदात्तेत्वं करोति तज्ज्ञापयत्यस्ति चेहानुदा
त्तेत्वप्रयुक्तं कार्यमितरमपि तच्चानुदात्तेतश्च हलादेरिति युच् शीलेरति तेन विचक्षणा इत्यादि सिद्धं चक्षिङोऽनुदात्तेत्वात् न चैवं चक्षिङो ङित्वं व्यर्थं अनुदात्तेत् प्रयुक्तं कार्यमनित्यमिति
ज्ञापनार्थत्वात् तेनायमज्ञासीत्यादेरप्यतीत्यादि सिद्धं क्वचित् चक्षिङित्येकारविशिष्टः पाठः सोऽयुक्तः नुमप्रसंगात् न चानिदितो नुम्विधीयते इदितश्च नु इत्यन्वाख्यातग्रहणाऽभावात् गृ
हीते वा तस्मिन् चितोत्पत्त्यसंभवात् आद्युच्चारणार्थोऽत इति पाठे तु गौरवदोषः अतोऽकारविशिष्ट एव पाठो युक्तः अत्र चानुदात्तङित इति वत् स्वरितञित इति पाठे सति लाघवा
त् [illegible] आत्मनेपदपरस्मैपदाभ्यामन्वर्थाभ्यामात्मनेपदपरस्मैपदसंज्ञे इत्युच्यते चाऽन्वर्थे आत्मने कर्त्रे फलबोधकं परमात्मनेपदं परस्मै कर्त्रे फलबोधकपदं परस्मैपदं तेन
कर्तृगामिनि फले आत्मनेपदं परगामिनि फले परस्मैपदमित्याह तन्न उभयग्रहणवैयर्थ्यप्रसंगात् यथाहि ञित्स्वरितेत एतावदेव सूत्रमस्तु आदिति चाऽनुवर्तनीयं तेन कर्तृगा राम॰
मिनि क्रियाफले आत्मनेपदं अन्यत्र परतोऽन्यदिति परस्मैपदं किमुभयग्रहणेन परत इति तस्य निर्देशोऽर्थद्वयसंग्रहार्थः परस्माद्धातोः परस्मिन्नर्थे इति अन्यथा प १८
रादित्येव ब्रूयात् किं तस्याऽन्वर्थता च परेषामपि न सम्मता स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्याहुः अन्यथाऽन्वर्थत्वादेव तत्सिद्धौ किं कर्त्रभिप्राये क्रियाफले इत्यने

तेन च क्रियाफलस्य कर्तृगामित्वं शास्त्रबोधे भासते प्रतीतीत्यस्य हि एकाश्रितो विक्रीत्यनुकूलो व्यापार इति हि बोधः न चात्र फलस्य कर्तृगामित्वं परगामित्वं वा बुभुत्स्यते तेन संभ
वत्यपि तत् करोति कुरुते वा घटमित्यत्र घटनिर्माणफलस्य कुलालान्यगामित्वस्यासंभवात् एवं सृष्टिं चकार चक्रे वा ईश्वर इत्यत्र जगन्निर्माणफलस्येश्वरेऽसंभवाच्चन
न्वेवं यष्टा यजते ऋत्विग् यजतीत्यादिप्रयोगा न स्युः कथमिति चेत् शृणु श्रुतिबलात् तथा हि ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रुत्या यजमाने आत्मनेपदं प्रयुक्तं होता यजेति
श्रुत्या ऋत्विजि परस्मैपदं प्रयुक्तं तदनुयायी लोकोऽपि तथैव प्रयुंक्ते तस्माद्यजोऽन्यत्र पदद्वयं यथेष्टं प्रयोक्तव्यमिति दिक् ७४ परस्मादिति परतः तत्रादिर्विभक्त्यर्थे इति पं
चम्यन्तात्तसप्रत्ययस्य विरितुक्तेऽपि मात्रालाघवं नास्ति परत्वस्य सावधित्वात् अवध्यपेक्षायामनुदात्तङित इत्यादयः संबध्यंते अन्यत्वस्यापि सापेक्षत्वात् आदुभे चेति संब
ध्यते अनुदात्तेतो ङितो नि विशादः जितः स्वरितेतश्च धातोः परतोऽन्यस्माद्धातोः केवलाद्दातः आत्याभ्यां च केवलं पं भवतीत्यर्थः भवति अति अनुदात्तेत इत्यादि किं स्य
ईते च्यवते आत्राऽनुदात्तेतः जित्स्वरितेतश्चेत्यनवत्यैवा क्यभेदेन तेभ्योऽपि पृथिधेयं कश्चित् अनुक्तमप्यूहति पंडितो जनः अनुकरोति पराकरोति अभिक्षियति परिमृष्य

॥ परतोऽन्यत् ॥ ७४ ॥ अपितादिर्ङित् ॥ ७५ ॥

ति प्रवहतीत्यादि सिद्धं अत्रेदमवधेयं आद्रु विकर्मणोत्पत्तितस्याग्रे कर्तरि पमिति सूत्रणीयं तस्याग्रेऽनुदात्तङित इति निविशादेरिति स्वरित इति सूत्रणीयं पमिति वन चाऽ
नुदात्तङित इत्यत्र पमित्येवानुवर्तत इति वाच्यं तस्य पूर्वेण प्राप्तस्य पस्याऽपवादत्वात् स्वरितेत्यत्र तु आत्येऽनुवर्तितेन च यमात्रमेवानुवर्तते इति वाच्यं सूत्रारंभस्य वैयर्थ्यप्रसं
गात् कर्तरीत्यनेनैव तस्य सिद्धत्वात् न चाऽऽदित्येवानुवर्ततेति सूत्रारंभस्य वैयर्थ्यप्रसंगात् स्वरितञितामपि अनुदात्तेत्त्वस्य सुपठत्वात् पमित्यनेनैव तु हतीत्यादि सिद्धं एवं च कार
ग्रहणमाद्यग्रहणमुभयहरणं न कर्तव्यं भवतीति कुतो न कृतमिति चिंत्यमिति दिक् ७५ इ इत्पस्य सपित् ता आदिर्यस्य स तादिः पिच्च तादिश्च पिता दी ताभ्यामन्योऽपितादिः
नञ् इति समासः ङि ङित् ङिदित्यर्थः अङित् ङिदिता हङि इदिति गम्यते अत्र ब्रह्मदत्त इत्याह ब्रह्मदत्तवदिति गम्यते यथा अत्र पर्वुरासवलात्पिता दिभिन्नः प्रत्ययः एव शत्वातेन
धातः तेन दप्रदापृनि प्रत्ययभिन्नस्य धातोर्ङित्त्वं न सति ङित्त्वे आत्स्यात् यद्वा एधशीङादेरनुदात्तेत्वङि त्वकरणान्न धातोर्ग्रहः अन्यथाऽस्मादेवङित्वाद्दातिसिद्धे किं ङि
त्वादिनानुङि दितिमानुकि दिति पाठ उत्तरसूत्रे न कर्तव्या मति लाघवगुणादिनिषेधस्तूभयत्र तुल्य इति चेन्न स्वपितः वक्तृ इत्यत्र यजादित्वाकिति संप्रसारणप्रसंगात् तर्कुं

चं॰ आ॰ नइत्यत्रङि॰ त्वद्दरित्यस्याप्रसंगात् अन्यथाचक्कतुरित्यारावतिप्रसंगात् कुरुतइत्यत्रैवोभयव्यवधानसत्वात् नन्वात्रादिग्रहणं व्यर्थं अपितादिर्ङि॰ दितेवउक्तं सिसतासीत्य

स॰ भा॰ त्रैवननत्रानांग्रहणंभविष्यति नचसिस्योर्ग्रहणार्थंतदितिवाच्यंसिस्योरितिलिंगात्तयोर्ङि॰ त्वाभावात् एवंतत्युतरार्थंतत् अपिदित्यऽयंपर्युदासोनञ् नन्वोक्तमनित्यमितिखीका

१९ रात् सचाऽनित्यः तत्रच कुटादेः कुटत्यात्परः त्रित् णिञ्ज्निः प्रत्ययोङि॰ त्विजेः परइडादिः प्रत्ययोङिद्वत्तिऊर्णोः परइडादिर्वाउद्विजिताकुटिष्यति और्णवीत् और्णुवी

दित्यादिसिद्धं ननुतआर्दिर्यस्येति कुतोनविग्रहः मैवंव्याख्यानाऽनुसारात् लस्यानुसाराद्धाकरणंतराऽनुसरणाच्च किंचतशब्देनविग्रहेतिपृतयोरऽनुवाददोषःस्या

त्यित्वेनसिद्धत्वात्ततीशब्देनविग्रहेतुनायंदोषः अथसारेः कृतांचाऽनेनङि॰ त्वंकुतोनेतिचेन्नमैवं यङ् नङोर्ङि॰ त्वकरणात् ज्ञापकात् नानिर्दिसेइतिसूत्राऽऽरंभाच्च अतः

परिशेषात्ततिवादीनां चतुर्विधानामाख्यातानां तद्धिकरणानांचानेनङि॰ त्वंनान्येषांतेनविभरांचकारेत्यादावामोनयनुमाधवः अपितादिरितितदन्यार्थेननञ्जासमासः

अतएवचप्रसज्यप्रतिषेधान्नञोपयेषसंबंधइत्याह तन्नपरस्परविरोधात् पर्युदासार्थेनञ् तत्युतरपदेनसंबंधोनक्रियायायदिप्रसज्यप्रतिषेधेननञ्तर्हिक्रियायासंबंधोतोतरप

॥ स्थादिः कित् ॥ ७६ ॥ ॥

दिनपरापिङि॰ त्विन्नभवतिपिच्चङि॰ न्नभवतीत्यर्थात् वृत्ताङ्भवानित्यत्रतानङि॰ स्यानिवद्भावप्राप्तपित्वनिषेधात्पिदाश्रयोऽवारावितीपभवतीत्याह तदपिनताङः ङि॰ त्वस्यत

द्दाकेनलब्धस्यज्ञापकसिद्धं नसर्वत्रेत्यनित्यत्वास्त्वानेमीकारात् किंचनातङोङि॰ त्वस्याऽनन्यार्थसमत्वेननहिरुद्धस्यपित्वस्याऽप्रवृत्तेः अतिदेशोहि उपदेशविरुद्धं स्वका

र्येन प्रवर्तयतियथाक्षत्रियेब्राह्मणकार्यातिदेशःक्षत्रियकार्यंननिवर्तयति किंचनातङोङि॰ त्वेनुन्यर्थमेवहोत्वनेनाऽतिदेशेनसिद्धंतत्कथंतत्रपित्कार्यप्रवृत्तिःसंहतेति

दिक् ॥ स्था आदिर्यस्याऽष्टादशानां कस्यसमुदायस्यसणादिः कितकिद्दत्पूर्वंवदतिदेशोऽयंपूर्वसूत्रादादिग्रहणमनुवर्त्यवा व्यभेदेनव्याख्येयं णाद्यादिः किदितिते

नपादादेरपिकित्वंसिद्धंनचसीष्टारावतिप्रसंगः शंक्यः सिस्योरितिज्ञापकात् ननुकिद्ग्रहणं किमर्थं पूर्वसूत्रान्ङि॰ तइत्यनुवृत्तिसत्वात् मैवंईजनुरित्यादौसंप्रसारणाभावप्र राम॰

प्रसंगात् चक्नुरित्यादौङि॰ त्वदुरित्युत्वापतेश्च अयणादिग्रहणेनन्नुवादेर्णत्वादयः कुतोनशुत्वंतेमैवं क्नुक्त्रियोः कित्वेपर्य्यप्रसंगात् वभूवियवभूवेत्यत्रपित्वात्कित्वाऽ १९

भावेपिनक्षतिःप्रतिपदोक्तेनउकागुणचञ्ज्ञोर्वाधसंभवात् ननुकादुपधानांकित्वात्परत्वाद्गुणःस्यात् मैवंप्रत्ययमात्रापेक्षत्वेनकित्वस्यांतरंगत्वात् धातुलघुनाप्युपधासां

ङिसंज्ञत्वात् शापशोरशपतामिडेतिकित्वेन गुणस्य बाधसंभवाच्चरेर्जत्रुः जुहुवत्रुः गत्यादिः किंस्वप्यात् अपिकिंङिइयपपादादौ इज्यात् अत्र केचित् गादिरितियोगं विभज्यादिश वंच प्र
कारार्थमाश्रित्य ङि रिति वाऽनुवर्त्याऽन्येषामपि प्रत्ययानां ङित्वं विधाय कुटितेत्यादि सिद्धमित्याहुः ऋत् श्रसंयोगश्च ऋत्संयोगं तस्मात्स्मादिः किन्न जजरतुः शशरतुः
ममर्यतुः वव्रश्वतुः गादिः किं मय्यात् शीर्य्यात् ऋत्संयोगात् किं उवतुः ऊपतुः केचित्तु अर्तिं प्रश्लिष्यंते ऋ ऋतुरिति स्थिते श्च कित्वाद्गुणोऽहते द्वित्वे च आरतुरित्यादि सिद्धपि
त्याहुः अन्ये त्वार्तिं न प्रश्लेष्य ऋ ऋतुरिति स्थिते द्वित्वे रत्यत्वे ऋ आरित्यादि च कृते तस्य पूर्ववद्ग्रहणेन ग्रहणाद्दाम्बोरित्याकारे सिद्ध्या रतुरित्याहुः अत्रादिग्रहणमनुवर्त्यतं
चेदादि द्वितीयोऽपि वाक्यार्थः कर्तव्यः ऋ दंतात्संयोगादेर्प्यादिर्नेकित्तस्समरतुः जह्वरतुरित्यादि सिद्धं न जोतम नित्यमिति शश्रतुः दद्रतुरित्यपि अत्र ऋहसादिति सूत्रयितुमुचितं
तेन कृ स्वहसौ च ऋहसं तस्मात् एवं संयोगात् तस्य लोपइत्यत्रापि हसां तस्य लोप इति सूत्रयितुमुचितं हसावंते यस्येति विग्रहः ७७ सेट्क्त्वा किन्न कित्कार्यं न करोतीत्यर्थः देवित्वाप
क्षिपित्वा किं इजि वङु विमसेट् किं मुत्वा गत्वा नेत्यनुवर्त्यवा क्यभेदेनव्याख्येयं सेट्क्त्वा किन्न काचित् भवतीत्यर्थः द्युतित्वा द्योतित्वा रुचित्वा रोचित्वा वचित्वा वचिंत्वा लुचि

॥ ऋहसंयोगान्न ॥ ७७ ॥ नक्त्वासेट् ॥ ७८ ॥ श्वतिशायेहसादेर्यङ्ङ्द्विश्च ॥ ७९ ॥

त्वालुंचित्वा इत्यादि सिद्धं क्तो वा नकारं कित्त्ववत्वे कदेशस्याऽग्युपलक्षणं यद्वा क इत्यनेन सोऽपि शत्यते नेच स्वार्थे वद्ग्रहणेन नानर्थकस्येति क्तवतोर्ग्रहणं नेति वाच्यं तस्या अनित्यत्व
स्य वहशा आवेदितत्वात् अत्र क्तग्रहणेन कितस्तशब्दस्य ग्रहणं विवक्षितं तेन क्तगपि शत्यते सेट्क्तो वा किन्न भवति विकल्पश्चायं व्यवस्थितः तेन शीङ्स्विदिक्ष्विदिमिदिधृष
मृषिभ्यो नित्यमकित्वं अन्येभ्यो वा शयितः शयितवान् स्वेदितः स्वेदितवान् स्वेदितः स्वेदितवान् धर्षितः धर्षितवान् मर्षितः मर्षितवान् रुचितः रोचितः द्युतितं द्योतितमि
त्यादितः किं रुरुचिषे सेट् किं गतं श्वतिशायनमतिशयः अतिशर्वात् शीङोभावे स्वरादइतिः यद्यपि कर्नेकर्मो द्वयोप्यति शयशब्दोऽस्ति तथापि सनेह शत्यते कर्तक
र्मसोरास्यात्ते नोक्तत्वात् करणादेरप्रतीतेश्च अतिशयो द्विविधः पौनः पुन्यं भृशार्थश्च आद्यो यथा कस्यचिद्गुह शोताडनेदंडे च जाते लोका आहुरस्य दंडातिशयो जात इ
ति तत्र पौनः पुन्यं गम्यते द्वितीयो यथा पूर्वेन महाभाग तथाऽतिशये इत्यत्र भक्त्या पूर्वीति कायराणां नाम भक्तेर्भृशीभावः भक्त्या भृशो भवसीति गम्यते स चाऽतिशयः प्रकृत्यर्थ
विशेषणम् अतिशयविशिष्टक्रियावचनादिति एवं चातिशयो यङो द्योत्योऽर्थः भृशातर इत्यादौ प्रकर्षस्तरवादेर्यथेति मिश्राः एके तु अतिशयो यङो वाच्योऽर्थः स स्वेच्छाय यथाऽणा

सि॰

चे॰ भा॰ द्यर्थोयथासंचव्यापारस्यविशेषणमविशेषणोवाक्रियाप्राधान्यस्यधात्वर्थप्रधानस्यवानिर्वाहात् यङंतस्यापिधातुत्वात् हसआदिर्येसस्सहसाहिस्तस्माद्धातोर्यङित्येकोवाक्या
ल॰ भा॰ र्थःद्विरित्यऽपरंवाक्यंतत्रधातोरित्यनुवर्ततेसनयङः प्रकृतिभूतोप्यात्वः अराख्यतेइत्याचामिद्विप्रसंगात् किंतुयङंतोधातुर्गृह्यतेतत्रहसादेराद्यस्यैकस्वरस्यद्विर्वचनंस्वरादे
२० गुणद्वितीयस्यचेतितत्रीयंवाक्यं सनिशयेरवसादेर्यङ् द्विर्वचनंसूचितत्रिभ्योऽनेनयङ् किमर्थमिदंपूर्वेणैवसिद्धत्वादितिचेत्सत्यंनियमार्थमिदंअनेकस्वरेभ्योयदिभव
तितर्हिभ्यएवतेनजागर्तिदरिद्राति चिकीर्षतीत्यादिभ्योनतंत्रादिना पूर्ववाक्याभ्यामपिचशब्दः संबध्यते अतिशयेचेति चशब्दस्याऽयंस्वभावोयस्याऽग्रेपठ्यतेतादृशं द्वितीय
गुणंमनुतेवासमुच्चिनोति अत्रत्वनुक्तसमुच्चयार्थगत्यऽर्थेभ्यः कौटिल्यएवलुपसदचरजपजभदहदशगृभ्योधात्वर्थगर्हायामेवनातिशयेहसादिभ्यस्त्वत्राऽनुक्तंधात्वंतरंसमु
च्चिनोति अरूयर्त्यश्रृणुभ्योयङिति नैधत्यादिभ्यः कात्यायनसंवादात् पापठ्यतेवेदंचैत्रः वेदाभ्यासग्रहणाऽनुकूलः एकचैत्राभिन्नाश्रयकोवर्तमानोऽतिशयविशिष्टोव्यापारःव्याप
रातिशयोवेतिबोधः जाजायतेसुधीः ब्रह्मज्ञानाऽज्ञाननिवृत्त्यनुकूलएकसुधीअभिन्नाश्रयकोवर्तमानोऽतिशयविशिष्टोव्यापारःव्यापारातिशयोवेतिबोधः अटाट्यतेबालःबा
लाभिन्नाश्रयकोवक्रगत्यनुकूलोवर्तमानोव्यापारःक्रियेतिस्थिते नज्ञोक्तमनित्यमितिनिषेधाभावाद्गुणेकृतेयशब्दस्यद्वित्वेहसादिशेषेआत्तइतिदीर्घेअरार्यते अराट्यते अ
शाश्यतेऊर्णोतेर्गुणेकृतेत्वाभावात्तस्यासिद्धत्वान्नशब्दस्यद्वित्वेयङीतिगुणः ऊर्णोनूयतेसोसूच्यतेसोसूच्यतेमोमूत्र्यते अतिशये किं पठतिहसादेः किं भृशमीक्षतेधातोः किं प्र
पठतिभृशेउपसर्गविशिष्टान्माभूत् उपसर्गस्याद्वित्वात्स्यात्ताधातोरेकाचोहलादेः क्रियासमभिहारेयङित्यत्रएकाच्ग्रहणंसुत्याज्यंसूच्यादिग्रहणस्यनियमार्थत्वसंभवात् अ
थहलादेरित्यपित्याज्यमस्यादिग्रहणस्यनियमार्थत्वात् क्रियासमभिहारेइत्यस्यस्थानेऽतिशयेइतिपाठ्यंलाघवात् एकार्थीभावेऽन्वयेनवृत्तिर्व्ययेस्थायांतुवाक्यमितिव्यवस्था
अत्रविशेषः अयंकथं यङं तादात्मनेपदं भवति कथंचनस्यात्ङितोधातोरात्मनेपदमुच्यते यस्मात्ऽत्रधातुः नसङितनचाऽयंसमुदायस्यानुबंधः यश्चङित्प्रत्ययोनासौधातुः
यत्रचावयवेकृतंलिंगमचरितार्थंतत्रसमुदायस्यविशेषकंभवति अयंङकारस्तुवेभिद्यतेइत्यादौगुणनिषेधादौचरितार्थः कश्चिदाह क्रियासमभिहारेऽयङित्यकारोऽत्रप्रश्लि
ष्यतेसचानुदात्तोऽनुनासिकश्चेतिज्ञायतेतत्रानुदात्तेत्त्वमवयवेऽचरितार्थंसमुदायस्यविशेषकंभवति अनुदात्तेतश्चहलादेरितिचयुच्नभवतिजुचंक्रम्येत्यत्रचंक्रम्यदंद्रम्य राम॰
हणाद्धिंगादितिसवक्तव्यः अयंकथंकजेरीयङं तादात्मनेपदंभवति सोपिहिङकाराग्गुणनिवृत्तौचरितार्थइतिसचेत् ब्रूयात्तस्याप्यादित्इकारईकारोवाऽनुदात्तःप्रश्लिष्य २०
तेइति प्रतिब्रूयादितिचेन्नइकारेनुमप्रसज्येत ईकारेश्वीदितोनिष्ठायामितीडिन्निषेधः स्यादिति नैषदोषः अनुम्विधौगोःपादांतेइति अतोऽनग्रहणमनुवर्ततेनाते ॥ ०

इकार इत्संज्ञको येषां तेषां नुम् श्वीदितो निष्ठायामित्यत्राप्येकाच इति अनुवर्तते सत्यं प्रतिविदितमायुष्मतां मुधा पुनरयं प्रयासः तथाहि अनुदात्त इत्यत्र न धातुग्रहणमस्ति न
तः किं इदंतत्तो भवति प्रत्ययमेव ङि·तमाश्रित्यात्मनेपदं सिद्धं भवति न चैवमशिश्रियदवोचदित्यादौ चङ्ङ्भ्यामपि प्रसंगः प्रागेव विकरणेभ्योऽनुदात्तङि·त इत्येतत्प्रव
र्तणा प्रवर्तते ऽन्यथा वर्तते इत्यादौ विकरणाव्यवधानान्नियमो न स्यात् यथा च प्रागेव विकरणेभ्यो ऽनुदात्तनियमः प्रवर्तते ऽत्र च तेऽनुनियमेभ्यो विकरण इति तथा तेनै
व प्रतिपादितमित्यलमियतेत्याहुः अत्रोच्यते ङि·तो धातोरित्युक्तं तत्र प्रष्टव्यं किमत्र नास्ति धातुत्वं ङि·त्वं वा नाद्यः सनाद्यंता धातव इति धातुत्वसंभवात् ङि·त्वस्य श्रूयमाण
त्वाच्च यच्चनायं समुदायस्येति तन्न उभयथानुबंधसंभवात् यथा सुपः पोरोऽसुपीति निर्देशादवयवानुबंधः सुप्तिङंतमिति समुदायानुबंधः तथा ङि·त्वस्याप्यवयवानु
बंधत्वाद्गुणनिषेधादिकार्यं समुदायानुबंधत्वादात्मनेपदं च सेत्स्यति यत्तु यङ्·कारस्त्विति तन्न मित्त्वेनापि तत्सिद्धेः ङ्कितीत्यत्र गकारप्रश्लेषात् न च ग्रहादेः संप्रसार
णार्थं ङि·त्वं स्यात् तत्रापि गकारप्रश्लेषात् यरोऽनुनासिक इति ङ·कारे कृते मात्यरत्वेन हलो यमां यमि लोप इति लोपात् यद्वा मगयोः संयोगसंज्ञामाश्रित्य संयोगांतलोपसंभवा
त् अंतर्वर्तिन्या विभक्त्या पदत्वसत्वात् संयोगांतस्य पदस्य लोप इत्यर्थसंभवाच्च सन्यङोरित्यत्र सन्यगोरिति सुवचत्वादित्थं प्रयोजनान्तराभावात् ङि·त्वमात्मनेपदार्थमे
व यथा क्यङ्·णिङोर्ङि·त्वं न च नः क्ये णेरनिटीत्यत्र द्व्यनुबंधकत्वेन सामान्यग्रहणार्थं तदिति वाच्यं अनुबन्धान्तरेणाऽपि तत्सिद्धेः इत्थमपङीत्यत्राकारप्रश्लेषेणाऽनु
दात्तत्वसंपादनं व्यर्थमेव यदपि क्नूयेरीप ङि·त्वादिति तदपि न ङि·त्वस्यात्मनेपदार्थत्वान्न च गुणनिषेधार्थं तत् कित्वेन गित्वेन वा तत्संभवात् इत्थमिकारप्रश्लेषोऽपि व्यर्थः
यदपि अनुदात्तङि·दित्यादित्रापि उच्यते प्रत्यये ङि·तमाश्रित्यात्मनेपदं प्रत्ययाद्भवति समुदायाद्वा नाद्यः

तस्यैवांतरंगत्वेन प्रत्ययात् पूर्वमट् प्रसंगात् यङ्· एव हि त
प्रसंगाच्च सन्यङोरितिवत् स्थान्याश्रयणात् नांत्यः समुदायस्य ङि·त्वाऽभावस्य त्वयैवोक्तत्वात् यदपि धातोरिति नास्ति तदपि न भूवादय इति तस्याऽनुवृत्तेः सत्वात् आङ्
शा इत्यत्राचीत्यस्य यथाऽननुवृत्तावपि तेन धातोराक्षेपसंभवात् इकोझलित्यत्र सनाय यथा यदपि अशिश्रियदित्याद्युक्तं तदपि न ङि·त्वभावित्वेन प्रथममेवात्मनेप
दप्रवृत्तिसंभवात् शादेः शित इत्यत्र भाविनं शितमाश्रित्याऽऽत्मनेपदं यथेति प्रत्ययस्यैव ङि·त्वमाश्रित्याऽऽत्मनेपदविधाने यत्न इवाऽऽचरति सत्वेवाचरति कृष्ण इवा
चरतीत्यत्रापि स्यात् नङन्तादेर्ङि·त्वात् मन्मते तु उपदेशे यो ङि·त् तदंताद्धातोरिति व्याख्यानान्न दोषः धातोः क्विबंतत्वेन ङि·दंतत्वाभावात् किंच कुरिवतीत्यत्रस्या

चै· आ· तकुटादित्वे नसनोङिः त्वात्मन्मतेसन औपदेशिकोङिः त्वंनास्तीतिरिकुगत्यर्थानांकौटिल्येयङिः त्युक्तंतत्कौटिल्यंफलस्यव्यापारस्यवाविशेषणंएवंलुंपादीनांगर्हा
ल· भा· यामपिजंगम्यतेऽस्योमार्गःअस्याभिन्नाश्रयकः मार्गाभिन्नाश्रितवक्रगत्यऽनुकूलोवर्तमानोव्यापारः मार्गाभिन्नाश्रयसंयोगानुकूलोवक्रोव्यापारइतिवालोलुप्यतेवनंचै
२९ त्रः चैत्राऽभिन्नाश्रयकोवनभिन्नाश्रयितत्कुत्सितछेदनानुकूलोवर्तमानोव्यापारः वनाभिन्नाश्रयछेदनानुकूलःकुत्सितोव्यापारइतिलुंपादिषुयोगत्यर्थस्तस्माद्गर्हा
यामेवयङ् कौटिल्यस्यावकाशोजंघन्यतेगर्हायामित्यस्यावकाशः सासद्यतत्त्वस्सः कुत्सितसाऽवयवविभागानुकूलएकवृक्षाभिन्नाश्रयकोवर्तमानोव्यापारः सासद्यतेमार्गं
चैत्रइत्यन्नोभयप्रसंगेपरत्वाद्गर्हायांयङ् एवमन्यदपिबोध्यं इषिरिच्छाइहैवसूत्रेनिपातनाद्भावेइपरः छत्वंतादेशःइतिकर्मार्थवाचकाद्धातोरिच्छायांसप्रत्ययः
तच्चेरिष्यमाणमिच्छाकर्तुरात्मसंबंध्येवभवतिद्विरित्यऽनुवर्ततेभिन्नंवाक्यं धातोरित्यऽनुवर्ततेधातुस्थानसप्रकृतिर्दृश्यतेकिंतुसांतः पत्येतुमिच्छतिप्रतीषिषतिइणःसः
सधातुरितिधातुसंज्ञास्वरादेःपरइतिसस्यद्वित्वंयःसेइति पूर्वस्यैत्वंनतुइषिकर्मार्थेतिकस्मात्तल्लब्धं शृणुइच्छायाःकर्मनिपतनादिषिकर्मेतिलब्धंधातोःप्रत्ययविधानात
दर्थत्वंचलब्धं पठितुमिच्छतिपिपठिषतितुमन्तुस्वार्थिकःसाध्यावस्थांक्रियामाहसचलौकिकेवाक्येप्रयुज्यते केवलस्यधातोःप्रयोगानर्हत्वात् अलौकिकेतुधातुमात्रंप्रयुज्यतेत

॥ इच्छायामात्मनः सः ॥ ८० ॥

तत्सुपः कथंलोपइतिनाशंक्यं पचनेनेच्छतीत्यत्राऽपिसोऽस्तुकरणस्याऽपिक्रियायामपेक्षणादितिचेन्नवैषम्यात्कर्महिप्रथममपेक्षणादंतरंगमव्यभिचाराच्चकरणंतुवि
परीतं अंतरंगेत्वौचविधेराकांक्षाइतौवहिरंगेप्रवृत्तिरयुक्ता किंचाऽनभिधानादपिनपियस्तीत्युक्तेपचेरिच्छाकर्मत्वेनप्रतीयतेनकरणतायथाराजपुत्रइत्युक्तेराजन्यएवपु
त्रः प्रतीयतेनतत्समीपवर्त्यन्यदीयः केचित्तुडुविकर्मणीत्यतः कर्मणीत्यनुवर्त्यपंचम्याविपरिणम्यकर्मणोधातोरित्याहुः यत्तुयेनहेतुनापचनेनेच्छतीतिवाक्यंभवति
तेनैवहेतुनावृत्तिःप्राप्नोतीत्युक्तंतन्न ऋद्धस्यराज्ञः पुरुषइतिवाक्यवत् वृत्तेरपिप्राप्तेः धात्वर्थस्यकर्मत्वंतुफलावच्छिन्नस्यव्यापारसहितस्यफलस्यवा आत्मशब्दस्तुनचेतन
द्रव्यवाचीतथासतिआत्मनइतीच्छाशब्दयोगेकर्तरिषष्ठीस्यात् ततश्चात्मकर्तृकायामिच्छायामित्यर्थःस्यात्तथाचात्मग्रहणंव्यर्थंस्यात् इच्छाया आत्मकर्तृकत्वाऽभि राम·
चारात् व्यर्थविशेषणतायतेः कर्मणिषष्ठीइतिप्रसेतु असंभवः स्यात् नस्याऽऽत्मनोद्रव्यस्यासाध्यत्वाद्धात्वर्थत्वंकुत्रापिसंभवतिक्रियायाएवतत्संभवात् अतःय २९
रव्याख्यात्यर्थः स्वशब्दस्यपर्यायमात्मशब्दः संबंधसामान्येचषष्ठी आत्मनःस्वस्येत्यर्थः स्वशब्देनात्रेषिकर्तैवगृह्यते इच्छायाः क्रियारूपत्वेनकर्तारंविनाऽनुपप

न्तत्वात् कर्त्तुराक्षेपात् इच्छाकर्त्रैष्यमाणं वस्तु परि स्वसंबंधित्वेनैवेच्छतितराधातोः सप्रत्यय इत्यर्थः शिष्याणां पठनमिच्छतिगुरुरित्यादौ सो न शिष्याणां स्वसंबंधित्वेपि पठन
स्यसाक्षात्स्वसंबंधित्वाभावात् इच्छायांकिं भोक्तुं जानातिधातोः किं प्रतिष्ठासते अत्र हि प्रशब्दसमभिहारेण गतिः प्रतीयते गतिश्च धातोरेवार्थे यद्यपि प्रशब्दं विनागतेरप्रतीतेर्द्योतक
त्वेनाऽस्यापेक्षत्वात् विशिष्टस्य कर्मत्वाद्विशिष्टात्प्रत्ययोपपत्तिः स्यात् तथाचाऽऽइ द्वित्वयोर्दोषः स्यात् तन्निवृत्त्यर्थं धातुग्रहणं धातोः कर्मणः समानकर्तृकादिच्छायां वेति स
त्रे कर्मणा इतिव्यर्थं उक्तरीत्या तल्लाभसंभवात् समानकर्तृकादित्यपि व्यर्थं आत्मन इत्यनेनैव तल्लाभात् उत्तरसूत्रे च तन्न पारूप्यमिति लाघवाच्चेवेत्यपि व्यर्थं एकार्थीभावेन
तिः व्यपेक्षायां तु वाक्यमिति तत्फलस्य सिद्धत्वात् अथ पूर्वसूत्राच्चोऽनुवर्त्तते स इच्छायामित्यस्याग्रेयोज्यः अनुक्तसमुच्चयार्थस्तेनाऽऽशंकायामपि सप्रत्ययः नदी कूलम्
कूलं पिपतिषति शुश्रूषति जिगमिषति अन्येतु चेतनत्वारोपात्सः पापारणादीनां संबोधनवदित्याहुः तन्मते चकारो भिन्नवाक्यं नत्वेत्यतो नेति इच्छायां स इति चानुवर्त्तते प्रत्यय अ
हणानपरिभाषया स शब्देन सोऽत्तरस्यातैतेनेच्छा सोऽत्तातः पूर्वोक्तं नेत्यर्थः चिकीर्षितुमिच्छतिस्वार्थे सोऽत्तातु इच्छायां सो भवत्येव जुगुप्सिषति मीमांसिषते इति अत्रणादिः किरित्यतः
किदिति चानुवर्त्य वाक्यभेदेन व्याख्येयः सः कि इव तिनच भवति लक्ष्यानुसाराच्च व्यवस्था तेन रुरुदिषति विविदिषति मुमुषिषति जिघृक्षति सुषुप्सति यिपृच्छिषति तं हूति

॥ [illegible]॥ ~२॥ [illegible]॥ ~२॥ नाग्नोय:॥ ~२॥

तस्सतीत्यादौ गुणाऽभावसंप्रसारणनलोपाः सिध्यंतीतिदिक् ~ बहुवचनमाद्यर्थं गुपतिज् कितमान् बधदान् शान्भ्यः सप्रत्ययः धातोश्चद्विः इच्छायां पूर्वेण सिद्धत्वादर्था
तरानभिधानाच्च स्वार्थे विधिरयं गुप्तिज मान बधाश्च अनुदात्तेतः दानशानौ स्वरितेतौ अवयवेऽचरितार्थं लिंगं समुदाया त्स प्रवर्त्तकं जुगुप्सते आगमजमनित्यमिति ने
ड्नानिटि सेड्इति नगुणः तितिक्षते चिकित्सति मीमांसते बीभत्सते दीदांसति शीशांसति ~ गुप्त्य इत्यनुवर्त्तते शराधिकारश्चायं तेन गुपूधूपविच्छिपणिपनिभ्य आयः
अनिर्दिष्टार्थत्वात्स्वार्थे परिपणिपन्योरनुदात्तेत्वं आयाऽभावे चरितार्थमित्यायां तान्ताऽप्रवर्त्तते इति आभ्यां चाऽयः स्तुतावेवेष्यते गोपायति धूपायति विच्छायति पणायति प
नायति अत्राऽनुक्तसमुच्चयार्थश्चोऽनुवर्त्तते तेन ऋतेरीयङ् ऋतीयते कमेर्णिङ् कामयते वाऽनव्यायादिः गोपायांचकार जुगोप ऋतीयांचक्रे आनर्त्त कामयांचक्रे चकमे इति
सिद्धं ~ इषिकर्मा यः कान्नाम इच्छायां यः प्रत्ययः तदिष्यमाणं यदीच्छाकर्त्तुः स्वसंबंधि भवति पुत्रीयति घटीयति न तु कर्म इति कस्मान्न लभ्यमिति चेत् शृणु इच्छायाः स
कर्मकत्वेनाऽऽक्षिप्तस्य कर्मणो नामार्थेनाऽभेदसंबंधाल्लभ्यं न तु पुत्रेण पुत्रापुत्राविच्छतीत्यादावपि कुतो न तेषामयीच्छायामन्वयस्य संभवादिति चेन्न बहिरंगत्वात्कर्महि

चै· आ· व्यभिचारित्वकरणादित्र पश्चाद्यपेक्षितत्वाद् बहिरंगं व्यभिचारि च न हि सर्वत्रेच्छापाकरणादिरस्तीति नियमोऽस्ति अंतरंगे कर्मणि चरितार्थे बहिरंगे करणादौ प्रवर्तितुं नार्हतीति श्व
ल· भा· प्रतीते श्च न हि पुत्रीयतीत्युक्ते करणादिः कश्चित्प्रत्येति यद्वा आङ्कुर्वीत्यतः कर्मणीत्यनुवर्त्य कर्मणि वर्तमानान्नाम्न इति व्याख्यानाल्लब्धं आत्मन इत्यनुवर्तते स च चेतनद्र
२२ व्यवचनो न यात्यः घटीयतीत्यादावप्रसंगात् घटादेरचेतनत्वात् परव्यावृत्त्यर्थः स्वशब्दपर्यायो इत्युच्यते इच्छायाश्च क्रियात्वेन तस्याश्रयः कर्ताऽऽक्षिप्तः स चेदिष्यमाणेन स्व
स्वसंबंधित्वेनाऽपेक्षितस्तदाऽऽत्मनः स्वसंबंधित्वं च साक्षाद्भाव्यं यजमानस्य पुत्रमिच्छति पुरोधा इत्यत्र न यः यजमानपुत्रस्य साक्षात्स्वसंबंधित्वाभावात् न तु स्वस्य पुत्रं प
रस्य दासमिच्छतीत्यत्र कुतो पुत्रस्य स्वसंबंधित्वादिति चेन्न इष्यमाणेन रूपेण स्वसंबंधित्वस्य विवक्षणात् तच्चात्र दासत्वं न तत्स्वसंबंधि न तु नाम्न इति किमर्थं धातोः
पूर्वेणासविधानात्परिशेषान्नाम्नो लाभात् न च सिवंतादप्याऽऽयास्यतीति वाच्यं क्सत्यऽभावात् न च वाच्यतिमरुत्यतीत्यादौ कुत्वजवादिप्रसंग इति वाच्यं वक्ष्यपोरादित्य
त्र जत्वाऽकरणेन येपदकार्याभावस्य ज्ञापितत्वात् राजीयतीत्यत्र तु ज्ञापकसिद्धं न सर्वत्रेति नलोपः सिध्यति नान्नोपः पक्षे तु कुत्वाद्यभावो युक्त एव न चात्र पक्षे राजीय
तीत्यत्र नलोपाप्रसंगः ओर्गुणोऽस्त्यतो लोप इति क्व चो येइत्यतो य इति [illegible]योगादित्यतो नेति चानुवर्त्य वाक्यभेदेन व्याख्येयं नेति स्वरूपपरं शब्दाधिकारात् षष्ठ्या विपरिण
मयितव्यं तेन नाम्नो वस्य लोपो येइ इति लाभात् इत्थं च्यर्थे नाम्न इति चेत् उच्यते एकत्वस्य विवक्षणार्थं नामग्रहणं तेनाऽनेकस्मान्नाम्नः पट्वाद्वादन्यः महान्तं पुत्रमिच्छतीति इ
ति किं च महापुत्रीयतीति स्यात् तच्चेष्टमेव यद्यपि विग्रहः महान्पुत्रो महापुत्र इति महान्तं पुत्रमिच्छतीति विग्रहे तु नेष्टं नन्वत्र कर्मत्वाभावादेव न भविष्यति मैवं कर्मत्वस
त्वात् क्रियाजन्यफलाश्रयः कर्म क्रिया चात्रेच्छा तज्जन्यं फलमिष्टत्वं तच्च समुदायाश्रितं न हि पुत्रमात्रमिच्छति नापि महत्त्वमात्रं किंतु विशिष्टं एवं तर्हि सविशेषणानां
वृत्तिर्न चेत् तस्य विशेषणयोगो नेति वचनात् न समुदायाच्च इदं च न्यायसिद्धानुवादकं न त्वऽपूर्ववचनं तथा हि पुत्रस्य प्रत्ययार्थेन सह एकार्थीभावरूपोऽन्वयो विशेष
णेन तु व्यपेक्षारूपः न चैकस्य विरुद्धमन्वयद्वयं संभवति ऋद्धस्य राज्ञः पुरुष इत्यत्र राज्ञो यथा पुत्रीयतीत्यत्र तु समुदायशक्तौ प्रविष्टस्य विशेषणीभूतस्य पुत्रस्य न
विशेषणाऽन्वयः संभवति पदार्थः पदार्थेनान्वीयते न त्वेकदेशेनेति सर्वतंत्रसम्मतं न तु नाम पक्षे कर्मत्वे सत्यपि तद्वाचकविभक्त्यऽभावात्प्रत्ययो न भविष्यतीति चेत् राम·
न त्विकपक्षे तथात्वेऽपि पचकं नामार्थ इति पक्षे नाम्नैव कर्मणोऽभिधानाद्विभक्त्यनपेक्षणात् ननु द्योतकत्वेन विभक्तिरपेक्षिता चेत् न यत्रानेककारकसंभवस्तत्र कार २२
कविशेषद्योतनार्थं विभक्तेरपेक्षणात् अत्र तु कर्मैव कारकं यथापि पचतीत्यत्र विक्लित्तिरेव कर्म पश्य मृगो धावतीत्यत्र मृगकर्तृकं सरणं दर्शने कर्म न कारकांतरमस्ति

अतो विभक्त्या विनापि निर्वाहः तथाऽत्रापि एवं तर्हि उत्तरार्थेनाप्नुइति इच्छायां किं पुत्रं जानाति आत्मनः किं शत्रोः पुत्रमिच्छति कर्मणः किं पुत्रस्येच्छति ८३ यइत्यनुवृत्तं
समर्थ्याविपरिणम्यते येपरे वर्णोस्य ईर्भवतीनेत्यनुवृत्त्या क्वचिन्न भवति पुत्रीयति गंगीयति अशनमिच्छति अशनायति अशनीयति धनायति धनीयति उदकीयति उ
दक पर्यायउदन शब्दोप्यऽस्ति तस्योदन्यति सुडागम इत्यन्न सुडिति योगविभागात्क्वचिदन्यत्रापि सुड् अश्वस्यति वडवा क्षीरस्यति बालः वृषस्यति गौः लवणस्यत्युष्ट्र
इति सिद्धं डे रकु इत्यत्र योगविभागादऽन्यत्राप्यऽग्भवतीत्युक्तं क्वचिदकु सुटोः सहप्रयोगो भवति यद्वा हृशपांतादित्यतः सकमनुवृत्त्य दिवादावद् इत्यतोऽटमनुवृत्त्य ना
म्नः सकुसकोऽद् शब्दाधिकारमाश्रित्य सगाऽऽगमो वोध्यो व्याख्यानात् दध्यस्यति दधिस्यति मध्वस्यति मधुस्यति षः सः इति विपरीतनिर्देशान्नषः चोऽनुक्तसमुच्चयार्थः
ते नमांतात्व्ययाभ्यां योनकिमिच्छति स्वरिच्छति क्वचित्काम्य प्रत्ययो भवति पुत्रकाम्यति स्वः काम्यति किं काम्यति एकार्थीभावरूपेऽन्वये वृत्तिर्व्यपेक्षायां तु वाक्यमिति व्यव
स्थया रूपद्वयसिद्धौ पाणिनीये सूत्रेऽनुवृत्तं वेति व्यर्थं पश्य पुत्रमिच्छति घटमिति प्रत्युदाहरणं तु द्विविधस्याप्यऽन्वयस्याऽभावद्योतनाय च सु ः स्तु वाकामेनप्रत्युदाहरणमेका

॥ ईयाऽस्य ॥ ८४ ॥

र्थीभावाभावात् यकाम्यांतात्तु न कर्मणि प्रत्ययः कर्मणो धात्वर्थोतरभावेनाऽकर्मकत्वात् ननु पुत्रीयति शिष्यमित्यादाविवेच्छायेऽपि सकर्मकता कुतो नेति चेन्न इऽ
च्छायास्त्वप्रतीतेः नहि शिष्यं पुत्रीयतीत्युक्ते इच्छागम्यते किं त्वाचार एव ननु तात्पर्ये सति इच्छा संगंस्यते इति चेन्न तात्पर्यज्ञानस्य शाब्दबोधाऽहेतुत्वात न नहि वक्तुस्तात्प
र्यं श्रोत्रा वगंतुं शक्यं परवुद्धेरप्रत्यक्षत्वात् अर्थप्रकरणादिना तात्पर्यज्ञानांगीकरणं तु न युक्तं अर्थादिना शाब्दबोध एवांगीकर्तुमुचितः किं तेर्नाकिं च सुत्रोन्मत्तशुकादि
वाक्ये व्यभिचाराच्च नहि वक्तुस्तत्र तात्पर्यमस्ति तत्रेश्वरतात्पर्यं ग्राह्यमिति चेन्न वक्तुस्तात्पर्यमित्यस्यैव पर्यप्रसंगात् आवश्यके न तेनैव निर्वाहात् किं चेश्वरतात्पर्य
मप्यऽज्ञातं हेतुर्ज्ञातं वा नाऽद्यः तस्य सर्वत्र साम्येन कुत्रास्ति नास्ति वेति वक्तुमशक्यत्वात् चैत्रस्य तु तात्पर्यज्ञाने सति मैत्रस्याऽपि बोधप्रसंगान्नांत्यः अस्माकमीश्वरतात्प
र्यज्ञानाऽसंभवात् कार्येणा तदनुमास्यतीति चेत् न परस्पराश्रयप्रसंगात् शाब्दबोधे सति तस्य कारणत्वग्रहः कारणत्वे गृहीते च शाब्दबोध इति किं चेश्वरानं
गीकर्तॄणां सांख्यमीमांसकादीनां शाब्दबोधो न स्यात् तेषामीश्वर एव नास्ति तात्पर्यज्ञानं तु दूरापास्तमिति दिक् ॥ ८४ ॥ ॐ ॥ छ ॥

च. आ त. भा २३ आचरतां आचारः चरेर्भावे घञ् ज्ञानं व्यवहारो वा उपमीयतेऽनेनेत्युपमानं माङः साधने ल्युट् कर्मणउपमानादाचारे यस्तस्मिंश्च प्रत्यये परे पूर्वस्मात्सुपः इति वाक्यभेदेनैव

त. भा द्वयोः समावेशो सिद्धे चोऽनुक्तसमुच्चयार्थः तेनाऽऽचारस्याप्युपमानाच्च पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः हरीयति विप्रं राजा भानूयति चंद्रं विरहिणी प्रासादी

२३ यति कुट्यां भिक्षुः कुटीयति प्रासादे न्यपः गंगीयति पल्वले मूर्खः अत्र नाम्नः सिवंता द्वाप आच्चे लोप इत्यादच्यनुवृत्तान लोपः कार्यः अंत्यपेऽप्यपो रितिज्ञापकात्परकार्या

भावः साध्यः ज्ञापकसिद्धं न सर्वत्रेति नस्य लोपः राजानमिवाचरति राजीयति आढ्यभिक्षुः पुत्रविषयकं यद्ज्ञानं व्यवहारो वा तत्सदृशं शिष्याऽभिन्नाश्रयं ज्ञानं व्यवहा

रो वा तत्र कुलो वर्तमानस्य गर्व भिन्नाश्रयको व्यापारः प्रासादाभिन्नाश्रयकं यद्ज्ञानं व्यवहारो वा तत्सदृशं कुट्याभिन्नाश्रयं यद्ज्ञानं व्यवहारो वा तद्नुकूलस्तकभिक्षाश्रयो

वर्तमानो व्यापारः ॥ कर्तुः क्यङ् सलोपश्च इति योगो विभज्यते कर्तुरुपमानान्नाम्न इति वर्तते चोऽनुक्तसमुच्चयार्थः तेनाऽनुक्तः क्विप्प्रत्ययः समुच्चीयते नामत्वाऽसिवंतं तस्मात्त्वं न सिवंतं

विभक्तिकार्यप्रसंगात् कर्तुरुपमानान्नाम्न आचारेऽर्थे क्विप्प्रत्ययः कृष्णस्वाचरति कृष्णति अश्ववादिकृष्णांचकारयत इत्यऽलोपः कृष्यात् कवयति कृष्णयति अश्वाचरति

॥ आचारउपमानात् ॥ ॥ कर्तुर्यङ् ॥ ॥

अति क्विब्दीर्घत्वं सवर्णे दीर्घः णत्वे औ अतुः काइवाचरति काति चकाके चितु आ अत इति क्विप्त्वा आरंताद्ऽपिणायो डाऽऽदेश उतः तन्मते चकौ मालाइवाचरति मालाति सर्प इवाचरति

नरवि पथिन तिन मांत स्येति दीर्घः नन्विनां शावित्य नेनो पधा दीर्घमात्रस्य सौ नियतत्वान्नायमत्र दीर्घः मैवं प्रवर्तमाने हि तत्सूत्रे दीर्घे नियच्छति पथ्यादिषत्वऽप्रवर्तमानं कथं

दीर्घं नियच्छेत् के चित्वऽत्वाऽऽत्वाभ्यां बाधितत्वान्न प्रवर्तते यदित्वऽत्वाऽऽत्वेन विधीयेते तदाऽऽचापि प्रवर्तेतेति योग्यतामात्रेण नियमप्रवृत्तिमाहुस्तन्मते पथन तिरत्रह

नतीत्यत्रतु नियमप्रवर्तनान्न दीर्घः राजानति इदामति कीमति सजुषति आशिषतीत्यादौ न परकार्ये नाम्नो विधानात् कर्तुः किं पुत्रीयति शिष्यं कर्मोपमानमिदं उपमानात्किं

पुत्र आचरति कृष्ण निष्ठज्ञानव्यवहारसदृशः उद्रकानिष्ठो वर्तमानो ज्ञानव्यवहारः मालानिष्ठवर्तमानव्यवहारसदृशः सर्पनिष्ठो वर्तमानो व्यवहारः उपमानस्य कर्तुः धात्व राम.

र्थतर्भावेऽपि उपमेयेन कर्त्रा सकर्तृकत्वात् कर्तरि प्रत्ययः यथा पूर्वसूत्रे उपमानस्य कर्मणो धात्वर्थांतर्भावोऽपि उपमेयस्य कर्मणः सत्वात् कर्मणि अपि प्रत्ययाः द्वयो २३

रपि आचारक्रियापेक्षया कर्तृत्व कर्मत्वे बोध्ये अवगल्भ क्लीव होडभ्योः क्विबंतेभ्यः येप्राप्ते आरब्धदातेत्यत्र आदिति योगविभागादाऽऽद्वौ ध्यःणादौ त्वनेकस्वरत्वादाऽऽमन्त्र

चक्रे किं वेतानां नु भवजगल्भे चिक्लिवे जुहोडे इति विशेषः ततः पद्ङ् उपमानात्कर्तुर्नाम्न आचारेऽर्थे यङ् हंस इवाचरति हंसायते गरुडायते हंस निष्ठव्यवहारस्य दृशो वक निष्ठो व
र्तमानो व्यवहारः अत्र हंसे इति चाऽनुवर्त्य वाक्यभेदेन व्याख्येयं हंसस्य लोपो यङि नस्य नित्यं लोपः सस्य व्यवस्थितः ओजसोऽप्सरसो नित्यमन्येषां तु विकल्पनात् अन्य हंसस्य तु
न लोपः राजायते तक्षायते पथीयते दण्डीयते अत्र नलोपे ये इति दीर्घः तस्याऽनुपधादीर्घत्वे न निषमाभावात् अत्राऽऽदीत्यतो भवीत्यनुवर्त्य वाक्यभेदेन व्याख्येयं भ
वत्यर्थे नाम्नो यङ् तस्मिंश्च नित्यं हंसस्य लोपः योगविभागादिष्टसिद्धिरिति भवत्यर्थो च्व्यर्थविशिष्टो ग्राह्यः अशुभ्यन् शुभ्र इव भवति शुभ्रायते सुमनायते अत्र धातुसंज्ञा
हेतौ प्रत्यये विकीर्षिते उपसर्गसमानाकार पूर्वपदं पृथक्क्रियते चुरादिषु संग्रामयद्ध इति विशिष्टपाठात् ज्ञापकात् अन्यथा संग्रामयुद्ध इत्येव पठिष्यत् अतो मनःश
ब्दात्पूर्वोऽ सुमनायते नाम्न अकृतेति समासे अप्रसुमनायसुमिमनापिषते इति द्वित्वं च सिध्यति अत्र चकारो इत्यतरसूत्रादपकृष्य वाक्यभेदेन व्याख्येयं नाम्नो ययङ्
तः करोत्यर्थे करोत्यर्थ स्वद्विधा उत्पादनरूपः एकः ततद्धात्वर्थोऽपरः करोत्यर्थस्य सर्वधात्वर्थेष्वनुगतत्वात्सर्वधात्वर्थाः करोत्यर्थाः अपि भवति वरिवः शुश्रूषां क

॥ निर्डितकरणे ॥ ८७ ॥

रोति वरिवस्यति नमस्यति देवान् अत्र न चतुर्थी जहत्स्वार्थायां वृत्तौ नमः शब्दस्याऽनर्थकत्वात् अजहत्स्वार्थायां तु प्रत्ययार्थे उपसर्जनत्वात् तपश्चरति तपस्यति शब्दं करो
ति शब्दायते वैरायते कलहायते वाष्पमुद्वमति वाष्पायते ऊष्माणमुद्वमति ऊष्मायते कष्टाय क्रमते कष्टायते कक्षायते गहनायते इति वृत्तिविषये पापार्थाः पापं कर्तुं
मुत्सहते इत्यर्थः सुखं वेदयते सुखायते दुःखायते सुखं दुःखं चानुभवतीत्यर्थः लक्ष्यानुसाराद् इति प्रसंगो नोद्भाव्यः नाम्नो णिङ् प्रत्ययो भवति द्विविधे करोत्यर्थे स
चाडित यदिडित् संज्ञाविधीयते तर्हि डिति टेरित्यादावस्यैव ग्रहणं स्यात् कृत्रिमत्वात् ड इत् यस्य तस्य तु ग्रहणं न स्यादकृत्रिमत्वादतोऽतिदेशोऽयं परत्र प्रयुज्यमानः परशब्दो
विनाऽपि वर्तितं वत्यर्थं गमयति अडित्तदित्याह डिद्वदिति गम्यते यद्यपि डिदिति सामान्यशब्दस्तथापि लक्ष्यानुसाराद्व्याख्यानाद्विशेषपरो बोध्यः पद्यादिडिति वचनसाम
र्थ्याद्विशेषपरः अन्यथा जिडिङ्करणात्येवाऽवक्ष्यत् न चैवमुत्तरयोगयोरपि डिद्विधाने टिलोप इति वाच्यं धातोर्णिः प्रेरणा इति गौरवाभावात्सुपठितत्वात् न चैवं जेरित्यादा
वस्यैव ग्रहणं स्यादेकानुबन्धकत्वादिति वाच्यं एकानुबन्धग्रहणेति परिभाषाया अनित्यत्वात् तत्र शसः शित्वं ज्ञापकं शसीत्यस्य स्थाने असीति पाठ्यं तत्राऽननुबन्धकस्यैवा

च॰ आ॰ ग्रहणं भविष्यतिनप्रसादेः किंशित्वेनतज्ज्ञापयतितेनसुराशित्यत्रनतनोर्ग्रहणंभवतियथातथाजेरित्यादौजिजिडोर्ग्रहणंभविष्यतितेनउद्द्दिस्त्यस्येश्ववदित्यर्थः तेनेष्टेप
ल॰ भा॰ त्कार्येदृष्टंसंभावितंचतत्त्वाम्नोजावतिदिश्यतेटिलोपः इष्टेयथापदिष्टः एवंपटुमाचष्टेपटयति वृद्धौसत्यांपूर्ववाटिलोपः अपीपटदपपटद्वाविन् मतुवतुलोपोयथास्त्रग्वि
२४ णमाचष्टेस्रजयति अग्निमंतमग्नयतिदंडवंतंदंडयतिगुरुमाचष्टेगरयति युवानमल्पंवायवयतिकनयति अल्पयति अंतिकंवाढंवानेदयतिसाधयति प्रियंस्थिरंस्फिरंप्राप
यतिस्थापयतिस्फापयति अत्रजिडिदितियोगंविभज्यसापेक्षादपिनाम्नोजिर्विधेयः माणवकंमुंडंकरोतिमुंडयतिगुडंमिश्रंकरोतिमिश्रयति कार्ष्णंश्लक्ष्णंकरोतिश्लक्ष्णा
यति पयोभोक्तुं व्रतंकरोतिव्रतयति शूद्राऽन्नंभोक्तुंव्रतयति अनयोर्योगयोर्नाम्नः प्रत्ययविधिः तेनपरकार्येनसजूरिवाचरतिसजुष्यतेमरुत्वत्पतेवाच्यतेस्रजयतिपततीति
तिपत् तमाचष्टेपतयतिजकारउभयपदार्थोवृद्ध्यर्थश्च नतुवृद्धौचरितार्थः कथंपाऽऽतोर्हेतुरितिमैवं उच्चारणसामर्थ्यात् वृद्धिमात्रार्थत्वेनुणितिरित्येवपठेत् तेनणिरिति
सूत्रेककर्तव्यंभवतिअत्राऽऽदादेर्लुगित्यतोलुगित्यनुवृत्यवाक्यभेदेनव्याख्येयंनाम्नोऽवयवस्यकृत्प्रत्ययस्यलुक् औकंसवधमाचष्टेजिप्रत्ययेमदामित्यऽप्रत्ययस्यलुग्

॥धातोः प्रेरणे॥८८

अकृतव्यूहेतिनिमित्तापायेतिन्यायेनवावधादेशाऽभावइहपूर्वपदंपृथक्क्रियतेसंग्राममुद्ध इतिसामान्यापेक्षज्ञापकात् तस्यचहंत्यर्थेकर्मत्वात्ततोद्वितीयाहनोघदि
ति घदादेशः कंसंघातयति एवंबलिंबंधंराजानागमनंचाऽऽचष्टेबलिंबंधयति राजानमागमयति यद्वाव्यवस्थितविकल्पन्यायेननाम्नोविग्रहएवहनादेर्धातोः प्रेरणेजिप्रत्ययद्
तिवक्ष्यते धातोरितियोगोविभजनीयः पश्चात्तुर्णिञ्त्यतोणिगित्यऽनुवर्त्यधातोर्णिगितिव्याख्येयंसचकंड्वादिभ्यएवलक्ष्यानुसारात् कंड्वादयोद्विविधाःधातवोना
मानिचकंडूञ्गात्रविघर्षणेनाम्नांतुविग्रहएवकंडूंकरोति प्रेरणोकरणइत्यनुवर्ततेतेक्रियाविषयकेप्रेरणेवाच्येधातोर्जिः प्रत्ययःस्यात् प्रेरणंचाऽनेकविधंभृत्यादेर्नि
कृष्टस्यप्रवर्तनाप्रेषणंआज्ञागुर्वादेराऽऽराध्यस्यप्रवर्तनाऽध्येषणांप्रार्थनायस्याऽनुमतिमंतरेणाऽर्थोनप्रवर्ततेतस्यराजादेरनुमत्याप्रेरकत्वंवैद्यादेस्तुमुस्तापर्पटकं राम॰
पिबेत् ज्वरशांतइत्याद्युपदेशेनप्रेरकत्वंयः पुनःकेनचिज्जिघांसितंपलायमानंनिरुणद्धिनिरुद्धश्चहन्यतेतत्रनिरोद्धाहंतुरऽनुग्रहंकरोतीत्यनुग्रहेणतस्यप्रेरकत्वं २४
त्वं एवंचोरस्यवासान्नादिप्रदस्याऽप्यनुकूलाचरणेनप्रेरकत्वंसर्वत्रायंविशेषः प्रकरणादिगम्यः स ॥ ॥ ०८८ ॥ ॥

चैत्रानुमतं प्रेरणमात्रं ण्यर्थः ननु प्रेरणे इति धातोर्विशेषणमस्तु प्रेरणे वर्त्तमानाद्धातोर्णिरिति अथ पचति पाचयतीत्युक्ते व्यक्तमर्थान्तरं गम्यते तत्कथमयं स्वार्थिकः इ
हरिकः पचेरर्थः पाकः सो तण्डुलानां विक्लित्तिः अधिश्रयणादीनां तु तादर्थ्यात् तदवच्छेदेन च पच्यर्थता यो हि पानार्थमुदकमाहरति विक्रियार्थं च काष्ठानि आहरति शी
ते चापनेतुमग्निं समिन्द्धे येषु च तण्डुलान् प्रक्षालयति नासौ पचतीत्युच्यते तत्कस्य हेतोर्विक्लित्तिं प्रति साधनत्वाभावात् तदवच्छेदाभावाच्च अतस्तादर्थ्यादेवाधि
श्रयणादीनां पच्यर्थता तद्वत् प्रेरकव्यापारोऽपि तादर्थ्यादेव पच्यादिवाच्यो भविष्यति णिच्प्रत्ययस्तु द्योतकः तथा च योप्येकान्ते तूष्णीमासीनो भक्तबीजं वलीवर्दैः प्रतिविधत्ते
स उच्यते पञ्चभिर्हलैः कृषतीति तदेवं द्योतकपक्षोऽपि संभवति न च यथा प्रकृत्याऽभिहिते णिर्भवति एवमुक्तप्रेषितादिशब्दाभिहितेऽपि स्यात् उक्तः करोति प्रेषितः करोति प्रेर
णाविषयार्थत्वात् करोत्यर्थस्य प्रत्ययार्थत्वात् णेरभाव इति वाच्यं उक्तार्थत्वात् प्रेरकव्यापारद्योतनार्थं णिः प्रयुज्यते तस्य स्वशब्देनैव द्योतितत्वात् इह तर्हि पाचयत्योदनं
चैत्रो मैत्रेणेति अनयोः कर्त्रोः प्रत्ययेनाभिधानं प्राप्नोति पाचयते चैत्रो मैत्र इति प्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्य ण्यर्थस्य प्राधान्यात् तस्यैव कर्तरि प्रत्यय इति दोषान्न
द्योतकतापक्षोऽप्यत्यः किं च अन्वयव्यतिरेकाभ्यां शब्दार्थावसायः न च पचति पठति गच्छतीत्यादावन्तरेण णिचं कश्चिदपि प्रयोजकव्यापारोऽवसीयते उत्पन्ने तु णौ प्रतीय
ते अतस्तदर्थत्वमेव युक्तं किं च एवं च सति अणादेरप्यपत्याद्यर्थद्योतत्वमेव स्यात् पञ्चभिर्हलैः कृषतीत्यत्र त्वनेकार्थत्वाद्धातूनां कृषिरेव प्रतिविधानेऽपि प्रवर्तते इति युक्तं
नवनस्तद्दर्शनेन सर्वत्र प्रकृत्यर्थत्वं नन्वत्र पक्षे भेदिकाविभित्सादेव देतस्यय ज्ञरतस्य काष्ठानामिति कृद्योगलक्षणा षष्ठी न प्राप्नोति अप्रधानत्वात् मैवं तृतीयावद्व वि
क्षति तद्यथा पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्तर्यप्रधानेऽपि तृतीया भवति व्याप्तेः ननु भिक्षा वासयति कारीषोऽग्निरध्यापयतीति णिर्न स्यात् प्रवर्तनस्य
चेतनधर्मत्वादिति चेन्न अचेतनस्यापि तत्संभवात् नाऽवश्यं स एव वा संप्रयोजयति पश्चाहोष्यतामिति यो पि तूष्णीमासीनस्तत्सदर्थमाचरयति सोऽपि वा संप्र
युङ्क्ते भिक्षा प्रचुरा अप्यञ्जनवत्य अलभ्यमाना वा संप्रयोजयन्ति तथा कारीषोऽग्निर्निवातः एकान्ते सुप्रज्वालितः शीतकृतमध्ययनविरोधिनमुपद्रवमपनयन् अ
ध्ययनेऽनुकूलो भवति तत्र यथाऽनुमतिकृपदेशोऽनुग्रह इत्येतेषु णिर्भवति तथाऽत्रापि भविष्यति यद्यनुमत्यादिषु प्रयोज्यव्यापारोपदेशेन प्रवृत्तिः इह तु न तथा त
थाप्याऽऽनुकूल्याचरणमेव प्रयोजकव्यापारत्वेनाध्यारोप्यते अथ कश्चित्त्वां कंचिदाह एवं छन्तु मां भवान् अनुयुङ्क्तां मा भवानिति तत्र प्रेषप्रयोज्यः तस्य प्रेरकः प्र

वे॰ भा॰ योजकः इतितद्व्यापारे णिः प्राप्नोति एकविषयत्वाच्चनेसुवादीनां चपर्यायप्रसंगः उच्यते प्रयोज्यप्रवृत्त्युपहितप्रवृत्तिर्ण्यर्थः केवलानुत्वाद्यर्थ इति तदुक्तं द्रव्यमात्रस्यतु
ल॰ भा॰ प्रैषप्रेषणादेर्लोड्विधीयते सक्रियस्य परा प्रैषस्तदासविषयो णिचः इति वासुदेवेन कंसंघातयति काथिकः इत्येवं कथं णिः उच्यते ये कंसाद्यनुकारिणां नटानां
२५ व्याख्यानोपाध्यायाः ते कंसाद्यनुकारिणं नरं सामाजिकैः कंसवधाय गृहीतं तादृशेनैव वासुदेवेन घातयंति ये पि चित्रे व्याचक्षते र्यं मथुरा अयं प्रासादः अयं कंसः अयं भग
वान्वासुदेवः प्रविष्टः एताः कंसकर्षिण्यो रज्जवः एते उग्रनिपाताश्च प्रहाराः अयं हतः कंसः अयमाकृष्ट इति तेपि चित्रगतं कंसं तादृशेनैव वासुदेवेन घातयंति चित्रे पिहि
तदुद्दिश्य पश्यतां एतेन चित्रलेखका व्याख्याताः ये पि ग्रंथं वाचयंतः कंसवधमाचक्षते काथिकानां मते प्युत्पत्तिप्रभृत्याविनाशात्कंसादीन् वर्णयंति ते पि वर्ण्यमानाः
श्रोतृणां बुद्धिस्थाः प्रत्यक्षवद्भवंति चितमपि च तेषां तादात्म्यकमिव भवति अत एव नानापक्षमाश्रिता भवंति केचित्कंसभक्ताः केचिद्वासुदेवभक्ताः वर्णान्यत्वं खल्व
पि पश्यंति केचिद्रक्तमुखाः केचित्कालमुखाः त्रैकाल्यमपि लोके लक्ष्यते कथायां वाच्यमानायां हि वक्तारो भवंति गच्छ हन्यते कंसः गच्छ घातिष्यते किं गतेन हतः कंसः

॥ तुरादेः ॥ २२ ॥ समाप्तः ९० ॥

तदेवं काथिकोऽपि बुद्धिसंस्थं कंसं बुद्धिस्थेन वासुदेवेन घातयति श्रोताऽपि शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते एवं ब
लिं बंधयति राजानमागमयतीत्यादावपि द्रष्टव्यं २५ चुरआदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः अनुद्भूतावयवभेदसमुदायस्याऽन्यपदार्थत्वेनाऽऽश्रयणादेक
वचनं चुरादेर्धातोर्णिः प्रत्ययः चोरयति चोरयते चुरादौ यानि नामानि पठितानि तेभ्यस्तु वचनसामर्थ्याण्णिः हस्तिनाऽतिक्रामति हस्तयति २६ अनाऽनंतरोपि णिर्नेप
रामृश्यते तस्य हणा चैपर्थ्यप्रसंगात् आनंतर्यादेव तदनुवृत्तिसंभवात् नापि व्यवहितस्तिबादिः आदेशादिविधायकप्रकरणेन विच्छेदात् अतो यङादिरेव परामृश्य
ते यङादिना च प्रत्ययग्रहणपरिभाषया तदंतं गृह्यते तेषां केवलानां संज्ञाप्रयोजनाभावाद्बोभूयते इत्यादि प्रागुदाहृतं यत्तु सनाद्यंता धातव इति सूत्रे तन्तु सधातुरिति राम॰
कर्तुं शक्यं तच्छब्देन सनादयः परामृश्यंते पूर्वं विहितत्वेन प्राधान्यात् सर्वादेरुत्सर्गतः प्रधानपरामर्शित्वात् न तु सनादिपरामर्शे पि तदंतस्य संज्ञा न स्यात् संज्ञाविधौ २५
प्रत्ययग्रहणे तदंतग्रहणाभावादिति चेन्न सुप्तिङंतमिति ज्ञापकसिद्धस्य तस्याऽसार्वत्रिकत्वेनाऽत्राऽनाश्रयणात् केवलानां धातुसंज्ञाप्रयोजना ॥

भावा च न व सन्यङोरिति द्वित्वप्रयोजनमस्ति क्वा आदेस्तत्स्भावात् स्तौति एयोरेव षएयभासात् सः सिदिस्वदि सहीनां च गुणो यङ्लुकोरित्यादि सूत्रे वैयर्थ्यप्रसंगाच्चय
हाभ्वादयो धातव इत्यस्याऽनेन रसडिङ् ति सूत्रणीयं सनः सकारादारभ्य णिङोङ्कारेण प्रत्याहारः यत्तु चङ् ङोङ्कारेणाऽपि प्रत्याहारः संभाव्येतेत्युक्तं तन्न व्याख्यान
तो विशेषप्रतिपत्तिसंभवात् अन्यथा रोः सुपीत्यादौ डाप्स्त्रापो वा पकारेण सुप्प्रत्याहारः स्यात् यद्वा सणिङिति सूत्रमस्तु आद्यंताभ्यामवयवाभ्यां संदंशन्यायेना
प्रिमस्तरेतः समुदायो धातुसंज्ञ इति तस्याऽर्थः भवनं भूः क्रियासामान्यं संपद्यादिः अदर्तींद्रियेणावभाति अर्थमित्याऽऽदिः आगमजमनित्यमिति नत्रुम् यद्वा अं
चतेस वद्वा आदीयते शत्यतेऽर्थोऽनेन आङः परा दान्तः किः शब्द इति यावत् भुवः क्रियासामान्यस्य आदिर्वाचकः शब्दो धातुसंज्ञः एवं सत्याऽऽणवयेत्यादावपभ्रंशे
हिरू कृ
नानेत्यादावव्ययेवभूववमूवेड्त्यादावाख्यातांतेवाऽतिप्रसंगसंहारणार्थं भ्वादिरित्याऽवर्त्य भूरादिर्यस्येति बहुव्रीहिर्व्याख्येयः आवृत्यादौ च भ्वादिरिति पाठ एव

॥भ्वादिगणः१॥

मानमन्यथा भ्वर्थ इत्येवाऽवस्यत् आदिशब्द अव्यवस्थायां तेन भूशब्दादाऽऽरभ्य ये पठितास्ते ग्राह्याः तेन क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वम् नामधातूनां
तु सधातुरिति वचनाद्धातुत्वं सौत्राणां गणे एव पाठ्याः भ्वादीनामुद्दिष्करणात एषां धातुत्वं ज्ञाप्यंते तद्धिस्तंभित्वाऽस्तघ्नेत्याद्विकल्पार्थं कृतमत्का च धातो र्भ
वतिधातुत्वाभावे त्वैव नास्ति यद्वा स इत्यनुवर्त्य सप्रसिद्धो यो भ्वादिः पठितो पलक्षितार्थविशिष्टः स धातुसंज्ञ इत्यर्थः यद्वा प्रायपाठात् यावादिष्वनातिप्रसंगः
॥भूसत्ता॥यस्यार्थानीदयः क्रियावाचकाः पठितास्तन्मध्यपतिताया वादयोऽपि क्रियावाचका एव गृहीतुमुचितानद्रव्यविकल्पवाचकाः यद्वा या शब्दस्य न धातुसंज्ञाला
क्षणिकत्वात् परः स्यादौ त्यदाद्यत्वे आपि च येतिसिद्धं लाक्षणिकस्याऽपि ग्रहणे गामादाग्रहणेष्वविशेष इति व्यर्थं स्यात् वा शब्दस्य धातुत्वे किं स्याद्विकल्पार्थे
ऽधनाद्याविवातीति रूपं स्यादिति चेन्न अन्यपादिभक्तेर्लुगिति तिवादेर्लुक् संभवात् इत्थं च विभक्तिग्रहणस्यापि तत्र सार्थक्यं लभ्यते अन्यथा सिपः स्यादेवाऽ
वस्यत् सर्वादिपठितस्य उभशब्दस्य धातुसंज्ञा प्राप्नोति उभउभेत्यत्र पाठादिति चेन्न पाठेऽकारस्योच्चारणार्थत्वात् सर्वादौतु विवक्षितत्वात् रूपसामान्याऽभावात्

वै॰ भू॰ ल॰ भा॰ २६

सर्वादिगणमध्ये पाठसामर्थ्यान्नउभकाविस्यादिरूपसिद्ध्यर्थं हि पाठः धातुत्वे सति सनुसिध्येन् चोदिवाविति स्वर्गवाचकस्य न धातुत्वं अनुदितत्वात् गणेवोदितस्य पा
ठात् तदङ्गबंधकग्रहणेनाऽनदङ्गबंधकस्येति न्यायात् कुंडलिनं चैत्रमानयेत्यादौ अकुंडलिनमानयनाऽदर्शनाच्चाऽनयारीत्याऽन्यत्राऽप्यऽतिप्रसंगः परिहार्य्यः
यत्तु धातुरिति पूर्वाचार्यसंज्ञाग्रहणात् लंब्यपि तेषां क्रियावाचको शक्यते इति नाऽतिप्रसंग इति तन्न स्यं हि सूत्रं वैयर्थ्यापातात् प्रथममेत्यादिवत् तत्संज्ञयैव व्यवहार
संभवात् अत्र कश्चिदाऽऽह धातोः क्रियावाचिनः प्रत्यय इत्यत्र किं प्रमाणमिति उच्यते भगवतः पाणिनेर्वचनं भूवादय इति भ्वर्थीवादयो भूवादय इति हि तदर्थः यदि
तु गणपठितत्वमात्रं विवक्षितमभविष्यत् तदा भ्वादय इत्येवाऽवक्ष्यत् भुवो वार्थं वदंतीति भ्वर्थी वा वादयः स्मृताः इति कात्यायनवचनमपि मानं क्रियावाचका भ्वा
दय इति हि तस्यार्थः समानशब्दानां प्रतिषेध इति हि नामनार्थं वचनमपि मानं अक्रियावचनेष्वतिप्रसंगवारणार्थं हि तत् यास्कवचनमपि भावप्रधानमाऽऽख्यातं
सत्वप्रधानानि नामानीति भावः क्रिया आख्यातं धातुः आख्यायते फलभावने अनेनेति व्युत्पत्तेः ननु प्रसिद्धं प्रत्ययमाख्यातशब्दस्यार्थं विहाय एवकथं व्याख्यायते
इति चेत् शृणु सत्वप्रधानानि नामानीति साहचर्य्यात् अन्यथा सुप इत्येवाऽवक्ष्यत् अतः प्रकृतिसाहचर्य्याद्धातुरेव गृह्यते न तु प्रत्यय इति तथा पदजातानामाख्याऽऽ
तोपसर्गा इति तेनैवोक्तं अत्राऽपि प्रकृतिसाहचर्य्याद्धातुरेवाख्यातशब्देन गृहीतुमुचितः साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना सिद्धरूपस्तु यस्तस्याः सघञादिनिबं
धन इति हरिणाप्युक्तं धातुवाच्यायाः क्रियायाः साध्यत्वेपीदं वचनं मानमिति दिक् का पुनः क्रिया उच्यते करोत्यर्थभूता उत्पादनाऽपरपर्याया उत्पत्त्यनुकूलव्यापा
रसंतानरूपा भावनैव क्रिया तथा हि अभवतो गगनादेरक्रियमाणतया भवतश्च घटादेः क्रियमाणतया भवत्यर्थकर्तुः करोति कर्मत्वं तथा च करोत्यर्थकर्तुर्भवि
तृप्रयोजकतया भवतेरुत्पत्त्यपर्यायात् प्रयोजकव्यापारे णिरुत्पद्यमानः करोत्यर्थमवलंबते उक्तं च करोतिः क्रियमाणेन न कश्चित्कर्मणा विनाभवत्यर्थस्य कर्ता च
कथ्यते ॥ कर्म जायते करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः भविता तमऽपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते प्रयोज्यकर्तृकैकांतव्यापारप्रतिपादकाः ण्यंता एव प्रयु राम॰
ज्यते तत्प्रयोजककर्मसु तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः प्रयोजकक्रियामाहुर्भावनां भावनाविद इति सर्वे धातवो धातुत्वेन तस्या वाचकाः अतएव किं करो २६
तीति प्रश्ने पचति पठतीत्याद्युत्तरं संगच्छते प्रातिस्विकेन रूपेण पचित्वादिना विक्लित्यादेः फलस्य वाचकाः फलं तु प्रायेण व्यापारे साध्य ॥ ॥ ॥

त्वेनान्वेतिज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादौक्वचित्साधनत्वेनाऽन्वेतिक्रियाचव्यापारत्वेनधातोर्वाच्यानतुफूत्कारत्वयत्नत्वादिरूपेणपचतीत्युक्तेफूत्कारादेरप्रती
तेःक्वचित्प्रकरणादिनातत्प्रतीतावपिसमुदायेवृत्ताःशब्दाअवयवेऽपिवर्तन्तइतिन्यायोबोध्यःतदुक्तंगुणभूतैरवयवैःसमूहःक्रमजन्मनांबुद्ध्याप्रकल्पिताभेदःक्रियते
व्यपदिश्यतेनत्वाऽऽमीमांसकोक्तरीत्याऽऽख्यातवाच्यैवनास्तामितिवाच्यंभोक्तव्यमित्यादावाऽऽख्यातंविनाऽपितत्प्रतीतेःतथाचतत्राऽपिकारकाऽपेक्षादृश्यतेअस्तिचतत्रापिकृ
रोतिसामानाधिकरण्यंकिंकर्तव्यंभोक्तव्यंकिंकृतवान्भुक्तवानितिकिंचभावयतिघटमितिवत्वन्मतेभवतिघटमित्यपिस्यात्तुल्यार्थत्वात्दृष्टांतेहिकर्तुःकुंभकारस्यव्यापारंनिरा
चष्टेदार्ष्टांतिकेत्वाऽऽख्यातप्रत्ययःननुप्रयोजकव्यापारोऽन्यार्थःकर्तृव्यापारस्त्वाख्यातार्थइतिवैषम्यमितिचेत्कारकचक्रप्रयोक्तुःकर्तृत्वेघटस्याऽतथात्वात्यदितुधातु
नोक्तक्रियेनित्यंकारकेकर्तृतेष्यते इतिभर्तृहरिप्रतिपादितरीत्याप्राधान्येनधातूपात्तव्यापाराश्रयत्वरूपंकर्तृत्वंतत्राऽपिसंमतंकर्त्तुहीदानीमाख्यातार्थःव्यापारस्यधातु
नैवाऽभिहितत्वात् अपिचधातोःसकर्मकाऽकर्मकत्वविभागउच्छिद्येतननुसिद्धांतेऽपिक्रियायाःकर्मापेक्षानियमात्कथमकर्मकतेतिचेत्नफलव्यापारयोःसा॥
मानाधिकरण्यवैयधिकरण्याभ्यांसकर्मकाऽकर्मकाऽकर्मकत्वविभागस्यसंभवात्अयस्ववाच्यव्यापारव्यधिकरणफलवाचकत्वंसकर्मकत्वंस्ववाच्यव्यापारसमानाधिक
रणफलवाचकत्वमकर्मकत्वमितितवमतंमयातुस्वोत्तराख्यातवाच्यव्यापारव्यधिकरणफलवाचकत्वंसकर्मकत्वंस्वोत्तराख्यातवाच्यव्यापारसमानाधिकरणफलवाचक
त्वमकर्मकत्वंधातोःसेद्धाऽनिद्धवदितिवाच्यमितिचेत्नघटोभवतीत्यत्राऽतिप्रसंगस्यसत्वात्भावनायाःकुलालाश्रयत्वात्फलस्यचोत्पत्तेर्घटाश्रयत्वात्अथव्यापा
रव्यधिकरणसमानाधिकरणत्वमेवाऽकर्मकत्वादेर्लक्षणंब्रूषेतथाप्युक्तातिप्रसंगस्तदवस्थएवकारकचक्रप्रयोक्तुःकर्तृत्वाऽभ्युपगमात्किंचधातोःफलंआख्या
तस्यचकर्तावाच्यःभावनेवाऽऽक्षेपलभ्येतिस्वीकुर्वन्नचतथासतिप्राधान्यप्रतीतिर्नस्यादितिवाच्यंव्यक्तिवदुपपत्तेःतवमतेहिगवादिशब्दानांजातिरेववाच्याव्यक्तिस्त्वा
क्षेपलभ्यावाहदोहादौतस्याएवप्राधान्यंसाक्षादन्वयात्तद्वद्भावनायाअपिभविष्यति किंचआकृत्यधिकरणोक्तरीत्याभावनात्वमेववाच्यंस्यात्तवमतेनभावनात
स्याघटादिवदाऽऽक्षेपात्तनतुक्रियायाधात्वर्थत्वेपचतीत्यादौएककर्तृकावर्तमानापचिक्रियेतिक्रियाविशेष्यकोबोधोनस्यात् प्रत्ययार्थंप्रतिप्रकृत्यर्थस्यविशेषणता
याऔपगवादौक्लृप्तत्वादितिचेन्नअजागौरीत्यादौआग्नावीयोर्वाच्यंस्त्रीत्वमितिपक्षेस्त्रीत्वस्यैववैश्वदेवीत्यादौआमिक्षांदेवतायुक्तांवदत्येवैषतद्धितइतिभट्टपादोक्तेस्तद्धि

च·आ· तार्थस्यदेवतायाअविशेषणत्वांगीकारात् आख्यातार्थस्यकर्त्तुरपिविशेषणत्वोपपत्तेः किंचयुष्मदिसमानाधिकरणेमध्यमः अस्मद्युत्तमइत्यादिपुरुषव्यवस्थानन्न
ल·भा· तेनसंभवतियुष्मदस्तिवादिवाच्यकारकवाचित्वाऽभावात् उक्तेकर्त्तरिप्रथमेत्यादिवचनस्यात् कर्त्तुःप्रत्ययेनाऽनुक्तेः नचसमानाधिकरणेइत्यनेनसाभिधेयसंख्यान्व
२७ यित्वं अभिहितशब्देनचाभिहितसंख्याकत्वंविवक्षितमितिवाच्यंसूत्राऽननुगुणत्वात् कृतद्धितसमासैः संख्याया अनभिधानात्तदभिहितेतृतीयाप्रसंगात् नचकृ
त्यनभिधानमेवकर्त्तुरनभिधानमितिवाच्यंभावार्थप्रत्ययेऽपिकर्त्तरिप्रथमापत्तेरितिदिक् तार्किकास्तुप्रत्ययेतेदोषास्तुल्याः तेहीत्थमाहुः आख्यातस्ययत्नोऽर्थः यत्न
त्वस्यजातिरूपस्याऽवच्छेदकत्वलाभात् नकर्त्ताकृतिमतःकर्तृत्वेननतत्रशक्तौगौरवात् यत्नार्थककरोतिनासर्वाख्यातविवरणदर्शनाच्चरथोगच्छतीत्यादौयत्ना
भावाद्व्यापारेलक्षणायत्नोहिप्रथमांतार्थविशेषणमाश्रयत्वंचसंसर्गः पचतिचैत्रइत्यस्यपाकानुकूलकृतिमान्चैत्रइतिप्रथमांतविशेष्यकोबोधइतिअत्रोच्य
तेकृतिमान्करोतिनाऽस्मन्मतेलक्षणंकिंतुधातूपात्तव्यापाराश्रयःकर्तेतिव्यापारस्यधातुनैवोपादानात्नाऽऽख्यातस्यतदंशेशक्तिःकल्प्यायत्नस्यापिव्यापारविशेषत्वे
नधातुतएवलाभात् नतत्राख्यातस्यशक्तिः किंत्वाश्रयेआख्यातस्यशक्तिः आश्रयत्वेचशक्यतावच्छेदकंतच्चाऽखंडोपाधिरूपमितिनजातित्वेदोषः यद्वाआश्रयत्वमेव
वाच्यंतदेवतादात्म्येनाऽवच्छेदकंचरथोगच्छतीत्यत्रत्वयापितत्कल्प्यंशक्तिज्ञानमनुपपत्तिज्ञानंशक्यसंबंधज्ञानंचममनुशक्तिज्ञानमेवैकंकल्प्यमितिलाघवं अथ
यदिरूढलक्षणास्वीक्रियतेतर्हिसाशक्तितोनाममात्रेणाभिद्यतेनार्थः अनादित्वस्योभयोस्तुल्यत्वात् करोतिर्नयत्नार्थकोऽकर्मकताऽपत्तेः फलस्थानीययत्नवाचकाहियत्ना
दयोऽकर्मकाःदृष्टानहिभवंतिघटंयततेइतिएवंघटंकरोतीत्यपिनस्यात् करोतिनाऽऽख्यातविवरणमसिद्धंकरोतिर्हिधातोर्विवरणंनाऽऽख्यातस्यआख्यातस्यत्वाऽऽख्या
तएवकिमत्रविनिगमकमितिचेत् शृणु विनाप्याऽऽख्यातंकृतस्तुकरोतिनाविवरणंदृश्यंतेपक्तापाचकः कर्तापक्ववान्पाकंकृतवान्इतिधातुस्तूभयत्रानुगतोऽस्ति किंचकृञो
यत्नार्थकत्वेकर्मकर्त्तरिप्रयोगोनस्यात् अकर्मकाणांकर्मणोऽभावात्तस्यकर्तृत्वाऽसंभवात् अस्मन्मतेत्वाऽऽश्रयोऽर्थः तत्रसंख्याऽन्वेतिकर्तृप्रत्ययेसव्यापारेऽन्वेतिकर्म श्री·
प्रत्ययेतुफलेकालस्तूभयत्रव्यापारेओदनंपचतिस्थाल्यांचैत्रः एकौदनाभिन्नाश्रयकायाविक्लित्तिस्तदनुकूलैकचैत्राभिन्नाश्रयकस्थाल्यभिन्नाश्रयकोवर्तमानोव्या २७
पारः ओदनःपच्यतेचैत्रेणेत्यत्रएकौदनाऽभिन्नाश्रयकायाविक्लित्तिस्तदनुकूलएकचैत्राभिन्नाश्रयकोवर्तमानोव्यापारः अत्राऽऽश्रयस्तुतृतीयार्थइतिप्रथमांतविशे

स्थकेपक्षेपश्यमृगोधावतीतिनसिध्येत्पश्य

धावंतं मृगमिति स्यात् सरणक्रियाविशेषस्य मृगस्य दर्शने कर्मत्वात् द्वितीया स्यात् तत्सामानाधिकरण्यात्तत्तैरपि सत्ता स्यात् न च तमित्यध्याहार्य्यं गौरवाद्वा क्यभेदापत्तेश्च न चेदमेकं वाक्यं नेति वाच्यं नागना यादिभिरेकवाक्यत्वस्य स्वीकारात् न चात्र मृगादिदर्शयिषितः तथा सति मृगं पश्येत्पस्य सुवचत्वात् धावतीत्यस्य वैयर्थ्य प्रसंगात् तस्मिन् द्रुतं तेतु शीघ्रं सरणमेव दिदर्शयिषितं तस्य मृगाश्रयत्वात् मृगाश्रयोपादानेति वंतानुन द्वितीया नामत्वाऽभावात् भावनायाः प्रत्ययार्थत्वं वदन् प्रष्टव्यः यः प्रत्ययार्थः स प्रधानमित्युच्यते त्वया किं वा यः प्रधानं स प्रत्ययार्थ इति नाऽद्यः संख्याकालयोः प्रत्ययार्थयोरपि प्राधान्यादर्शनात् नांऽत्यः चित्रग्वादौ प्रधानस्याऽन्यपदार्थस्य प्रत्ययार्थत्वादर्शनात् तस्माद्धातुवाच्या क्रियाविशेष्येत्यत्र न कश्चिद्दोष इति दिक् नन्वस्ति भवति विद्यतिषु क्रियावाचित्वमव्याप्तं न हि तत्रोत्पादना प्रतीयते एवं तिष्ठताऽवपितथा जायते उत्पद्यते इत्यत्राऽपि उत्पत्तिर्हि आद्यक्षणसंबंधः तदनुकूलव्यापारश्चोत्पादना तदऽनुभवश्चास्मादिभ्यो नास्त्येव अत एव किं करोतीति प्रश्ने पचतीत्यादिवदस्तीति न प्रतिब्रुवते इति चेत् उच्यते अस्तीत्यादेः स्वरूपधारणं करोतीत्यर्थः धारणं चोत्तरकालसंबंधस्तथा सत्यऽपिकरोत्यऽर्थेन धात्वर्थान्तरगतेन धारणेनैव भाव्याकांक्षायाः पूरणाज्जीवति नृत्यतीत्यादिवदकर्मकता न्ह जा हि व्यापारव्यधिकरणेवोत्पत्तिरुच्यते अत एव तत्र घटादीनां कर्मतापरसमवेतव्यापारफलीभूतोत्पत्तिशालित्वात् जनिप्रभृतिभिस्तु व्यापारसमानाधिकरणैवोच्यते अत एवाऽकर्मकता तेषां स्वोत्पत्त्यऽनुकूलव्यापारभाजामपि ह स्वरूपापन्नघटादीनां परसमवेतत्वघटितकर्मताविरहात् तदुक्तं च हरिणा आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यत इति अन्ये त्वाहुः अस्त्यादावपि धर्म्यंशेऽभाव्ये स्त्येव हि भावनेति दिक् ॥ ॥ हाटकेशपुरस्थायी विनायकसुतोऽकरोत् रघुनाथाभिधो व्याख्यां तिवन्तस्य यथामति ॥ १ ॥ नत्वाभ्यर्थितसिद्धिं गणपतिं वाग्देवताभाषिते सत्रे श्रीरघुनाथनिर्मितमिदं भाष्यं लघु व्याकृतौ लोकानां हितमङ्गयामिमनसारामोद्य सारस्वतः पौत्रः श्रीमणिरामशर्मविदुषः श्रीरामदत्तात्मजः ॥ १ ॥ समाप्तं शुभं ॥ श्रीकाशीविनायपुरी महल्ला उंट्टानाराम्मुधानिवासघ्यापास्तानेमे चन्द्रिकाउत्तराईसहैलघुभाष्यटीकासंयुक्त रामकुमारमिसरकेइहांछपी वाः महीपनारायणपांडे काः ठाकुर जिस्कोलेनाहोयचानवीचौकमेकुंजगलीकेपश्चुतरफ कन्हैयामिलेके दुकानपरमिलेगा ॥ श्रीसम्वत् १९४२ मीती श्रावणसुदी १४ वारशोमवार ॥ ॥


॥ इतिचंद्रिकाउत्तरार्द्धसूत्रलघुभाष्यसहितः समाप्तः ॥

श्रीगणेशाय नमः प्रणम्य जगन्नाथं सदानंदेन सन्मुदा ॥ सिद्धांतचंद्रिकावृत्तिः क्रियते कृत्प्रकाशिका १ कृत्कर्त्तरि उत्सर्गतः कर्त्तरीति बोध्यम् तृवुणौ धातोरे
तौ स्तः कर्त्तरि तृप्रत्ययमाह पचतीति विग्रहे चोः कुरिति कः कृत्तद्धितेति नामसंज्ञायां स्यादिर्विभक्तिः सेराइ निसेरात्वं टिलोपश्च पक्ता पाकानुकूलकृतिमान् देव
दत्त इत्यर्थः कृतः धातोः परस्य वसादेः कृत्प्रत्ययस्येट् वसोत्र प्रत्याहारः भवतीति भविता कुट कौटिल्ये तुदादिः कुटादेर्ञ्णिणि द्वर्जे तृ इति प्रत्ययस्य ङित्त्वान्न गुणः कु
टतीति कुटिता एधते इति एधिता शुपूरक्षणे आयादयो नपीति वा ऽऽयः आयपक्षे इट् तद् इति नित्यमिट् अन्यत्र ऊदितो वेति वेट् गोपायतीति गोपायिता गोपिता गोप्ता षह मर्ष
णे इषुसहे ति वेट् सहते इति सहिता इड ऽभावे होढ इति हस्य ढः तथोर्धः इति तस्य धः ष्टुत्वं ढि ढ इति ढलोपः पूर्वदीर्घः सहिवहोरित्योत्वं सोढा इषु इच्छायाम् इषुसहे ति वेट्

श्रीगणेशाय नमः । कृत्कर्त्तरि वक्ष्यमाणाः ५ प्रत्ययाः कृत्संज्ञकास्ते च कर्त्तरि भवन्ति तृवुणौ धातोः । पक्ता । कृतः । वसादेः कृत इट् । कुटिता । एधते इति एधिता
गोपायिता । गोपिता । गोप्ता । सहिता । सोढा । एषिता । एष्टा । युवोरनाकौ । पाचकः । भावकः । आतो युक् । दायकः । घातकः । जनकः । घटकः । दरिद्रायकः । को
टकः । शमकः । नियामकः । क्रमेः कर्त्तर्य्याद्विषयात्कृत इण्न प्रक्रन्ता ११ ॥ इच्छतीति एषिता इड भावे ष्टुत्वं एष्टा वुण् प्रत्ययमाह णकारो वृद्ध्यर्थः युवोरनाकौ यु
श्च वुश्च युवू तयोर्युवोः वक्तीति वाचकः पचति पाचयतीति वा पाचकः भवति भावयतीति वा भावकः यदि ण्यंतान्न गुणविधिः तदा णेरिति णिलोपः ददातीति आतो यु
गिति युक् दायकः हन्तीति हनो घ इति घत् घातकः जनी प्रादुर्भावे दैवादिकः जन जनने जुहोत्यादिः जनयतीति जनिवध्योरिति न वृद्धिः णेरिति णिलोपः ज
नकः घटयतीति मितां ह्रस्व इति ह्रस्वः णेरिति णिलोपः घटकः दरिद्रातीति आतो युगिति युक् दरिद्रायकः तृप्रत्यये तु कृत इट् दरिद्रातेरनपीत्यालोपः दरि
द्रिता कुट कौटिल्ये कुटादेर्ञ्णिणि द्वर्ज इति वुणो ङित्त्वात् उपधायाल्लघोरिति गुणः कुटतीति कोटकः शमु उपशमे मांतस्य सेटो नेति न वृद्धिः शाम्यतीति शमकः यमु उपरमे
नियच्छतीति मांतस्य सेट इति वृद्धिनिषेधस्तु न प्रवर्त्तते अस्यानिट्त्वात् नियामकः क्रमेः कर्त्तर्य्याद्विषयात् कृत इण्न आत्मनेपदविषयात् क्रमेः परस्य कर्त्तरि ॥ ६ ॥

सि॰ चं॰ कृ॰ उ॰ १

हृस्य प्रत्ययस्येण न भवति प्रोपाभ्यां प्रारंभार्थाभ्यामिति क्रमेरात्मनेपदविषयता प्रक्रमते इति प्रक्रंता त्ट प्रत्ययः कर्तरि किम् प्रक्रम्यते इति प्रक्रमितव्यम् आत्मनेप
द इति किम् संक्रामतीति संक्रमिता ॥ ॥ नाम्युपधात्कः कप्रत्ययमाह प्रत्ययाद्यालश कवर्गाद्यसंज्ञका भवंति न हि नव र्ज्ञे किल्वाद्गुणो न बोधतीति बुधः क्षिपप्रे
क्षिपतीति क्षिपः त्र प्रत्यये तु क्षेप्ता वुणि तु क्षेपकः वर्तते इति वृत्तः प्रीकृज्ञाभ्यश्वरुभ्योपि कः प्रीञ् तर्पणे प्रीणातीति नु धातोरितो यप्रियः कृ विक्षेपे किरतीति कृ तृ इरितो र किर
ः जानातीति आतो न पोस्यालोपः ज्ञः उपसर्गेत्वादंतात्कः उपसर्गपूर्वपदे आदंताद्धातोः कः प्रद दातीति आतो न पोस्यालोपः प्रदः सुष्ठु जानातीति सुज्ञः ग्लै हर्षक्षये सुष्ठु

नाम्युपधात्कः क्षिपः बुधः वृत्तः प्रीकृज्ञाभ्यश्वरुधातोः प्रियः किरः ज्ञः उपसर्गे आदन्तात् प्रदः सुग्लः पचिनन्दिग्रहादेरयुणिनिपचादेरः
नन्द्यादेर्युः ग्रहादेर्णिनिः पचः वदः चलः पतः चरः चरिचलिपतिवदीनाम्वाद्वित्वं पूर्वस्याक् अप्रत्यये चराचरः चलाचलः पतापतः वदा
वदः हन्तेर्हस्य घत्वञ्च घनाघनः पाटेर्णिलुक् चोक् च दीर्घश्च पूर्वस्य पाटूपटः हनः पाटः नन्दनः वामनः क्रमणः दूषणः साधनः वर्द्ध
नः शोभनः रोचनः रावणः सहनः तपनः दमनः जल्पनं लवणम् णत्वनिपातम् कोचनः ॥

॥ ग्लायतीति सुग्लः पचिनंदिग्रहादेरयुणिनि द्वंद्वांते श्रू
यमाणः शब्दः प्रत्येकं संबध्यते इत्यादि शब्दः प्रत्येकं योज्यः पचादेर्धातोरप्रत्ययः नंद्यादेर्धातोर्यु प्रत्ययः ग्रहादेर्धातोर्णिनि प्रत्ययः अप्रत्ययमाह प
चतीति पचः वदतीति वदः चल संचलने चलतीति चलः पत्लृ पतने पततीति पतः चरतीति चरः चरिचलिपतिवदीनां वाद्वित्वं पूर्वस्याक् अप्रत्यये अत्र ह्रस्व
इति ह्रस्वः पूर्वस्य हसादिः शेष इत्यादि शेषश्च न भवति आगमस्य दीर्घत्वसामर्थ्यात् चराचर इत्यादि हन्तेर्हस्य घत्वं च हन्तेर्द्वित्वं पूर्वस्य हस्य घत्वं वा प्रत्यये च का
रात् पूर्वस्याक् उत्तरहस्य तु पूर्वाद्धंतेरिति घः घनाघनः पाटेर्णिलुक् चोक् च दीर्घश्च पूर्वस्य यद्यपि णेरित्यनेनैव णिलोपः सिद्धः तथापि प्रत्ययलक्षणेनोपधायाः वृ

राम
१

उगागमपूर्वदीर्घौल्लः पाटयतीति पाटू पटः इहापिद्वस्वः हसादिः शेषयोर भावः पक्षेहंतीति हनः ञेरितिञिलोपः पाटः युप्रस्य यमाह युवोरिस्सनादेशः इणादिसमृद्धौ नंदयतीति ञेरितिञिलोपः नंदनः टुवम् उद्गिरणे ग्लास्नावनुवमां चेतिवैकल्पिकमित्वाः भावेवामयतीतिवामनः दुषवैकृत्ये दुषेर्णौविति दीर्घः ञेरितिञिलोपः दूषयतीतिदूषणः साधसंसिद्धौसाध्यतिसाधयतीतिवासाधनः वधुवृद्धौवर्धतेइतिवर्धनः शोभतेइतिशोभनः रोचतेइतिरोचनः रुशब्देरावयतीतिञेरितिञिलोपः रावणः सहमर्षणेसहतेइतिसहनः तपऐश्वर्ये दैवादिकः तप्यतेइतितपनः दाम्यतीतिदमनः जल्पतीतिजल्पनः ॥ ॥ कुचशब्देकोचनः म्लेच्छअव्यक्तेशब्देम्लेच्छतीतिम्लेच्छनः लुनातीतिलवणं नंद्यादिगणेनिपातनाण्णत्वं णिनिप्रस्ययमाह प्रत्ययाद्यौचवर्गटवर्गौवितौस्त इतिणित्वादतउपधायाइतिरुद्धिः गृह्णातीतिइना

कुचशब्देचुरादिः म्लेच्छनः म्लेच्छअव्यक्तेशब्देग्राहीउत्साहीउद्भासीस्थायीमायीमंत्रीअयाचीअवाचीअपराधीदृशादेश्शः दृशपाघ्राध्माधेट्भ्यः शः शितिचतुर्वत्चतुर्षुतिवादिषुयत्कार्यमुक्तंतच्छिनिपरेभवतिपश्यः धयः धमः जिघ्रः पिबः प्रसज्ज्ञायान्नव्याघ्रः ॥

निनसौदीर्घः नाम्नोनइतिनलोपः ग्राहीषहमर्षणेउत्सहतेइतिउत्साहीउद्भासतेइतिउद्भासीतिष्ठतीतिआतोयुगितियुक्स्थायीछोछेदनेछ्यतीतिछायीपिबतीतिपायीमत्रिगुप्तपरिभाषणेचुरादिः मंत्रयतीतिञेरितिञिलोपः मंत्रीटुयाचृयाच्ञायाम् नयाचतेइतिनाइतिनञोऽदादेशः अयाचीनवदतीतिअवादीराधसंसिद्धौअपराध्यतीतिअपराधीदृशादेः शः दृशपाघ्राध्माधेट्भ्यः शप्रस्ययोभवतिशप्रस्ययमाहशस्संज्ञाशिनिचतुर्वत्चतुर्ष्विवेतिचतुर्वत्पश्यतीतिदृशादेरितिपश्यादेशः अपकर्तरीतिअप अदेइत्यलोपः पश्यः पापानेपारक्षणेइत्ययंतुनगृह्यतेलुग्विकरणालुग्विकरणस्यैवग्रहणमितिन्यायात्पिबतीतिपिबः घ्रागंधोपादानेजिघ्रतीतिजिघ्रः ध्माशब्दाग्निसंयोगयोः धमतीतिधमः धेट्पानेधयतीतिधयः घ्रः संज्ञायांनसंज्ञायांवाच्यायामस्माच्छोनविशेषेणजिघ्रतीतिउपसर्गे

सि.कौ. कृ.उ. २

अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः॥ लिप् उपदेहे विद्लृ लाभे तौदादिकौ विमौ भाविना मुमा निर्दिष्टौ तेन लाभार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थकस्य लिंपतीति लिंपः विंदतीति विंदः तुदादेरित्यस्य अदेरित्यलोपः लिंपः विंदः मुचादेरिति मुम् धृङ् धारणे धङ् अनवस्थाने ण्यंतयोर्द्वयोरपि ग्रहणं धारयतीति धारयः पारकर्मसमाप्तौ चुरादिः पॄ पालनपूरणयोः इति ण्यंतो वा पारयतीति पारयः विद चेतनादिषु चुरादिः ज्ञानाद्यर्थानामन्यतमो ण्यंतो वा वेदयतीति वेदयः उत्पूर्वः एजृ कंपने ण्यंतः उद्देजयतीति उद्देजयः चिती संचेतने चुरादिः चेतयतीति चेतयः सातिः सुखे सौत्रः सातयतीति सातयः षिञ् पूर्वकस्तु सातिः सरमालासातं विद्यते येषां ते सात्वंतो भक्ताः षह मर्षणे चुरादिः प्रयोजकण्यंतो वा साहयतीति साहयः अनुपसर्गेभ्यः इति किम् प्रलिपः नाम्युपधादिति कः नौ लिंपेः नौपूर्वं पदेशः निलिंपतीति निलिंपा देवाः गवादिषु विंदेः संज्ञा

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्शः॥ लिम्पः विन्दः धारयः पारयः वेदयः उद्देजयः चेतयः सातिः सुखे सातयः साहयः नौ लिम्पेः निलिम्पा देवाः गवादिषु विन्देस्संज्ञायाम् गोविन्दः अरविन्दः दाञ्धाञोर्वा ददः दधः ज्वलादेर्णः ज्वालः तापः श्यादेश्च अवश्यायः दायः धायः कार्य्येऽण् कर्मण्युपपदे धातोरण् कुम्भकारः॥

॥ याम् कार्येऽण् इत्यस्यापवादोयम् गां विन्दतीति गोविन्दः चक्रस्य नाभिनेम्योरंतराले स्थितानि काष्ठान्यराउच्यंते अराकाराणि दलानि तत्सादृश्यादरास्तान् विंदते लभते इत्यरविंदं दाञ् धाञो र्वा अनुपसर्गाभ्यामाभ्यां वा शः ददातीति दधातीति वा हादेरिति हित्वं श्नसाडिन्त्वात् हादेरित्यलोपः ददः दधः पक्षे ज्वलादेरिति णः आतोयुगिति युक् दायः धायः उपसर्गे किम् प्रदः प्रधः उपसर्गे इति कः ददतेर्दाने दध धारणे एतयोरपि ददः दधः इति ज्वलादेर्णः अनुपसर्गात् ज्वलादेर्वा णः णप्रत्ययमाहण कारो वृद्ध्यर्थः ज्वलतीति ज्वालः चलतीति चालः तप संतापे तपतीति तापः पक्षे पचादेरित्यः ज्वलः चलः तपः उपसर्गे किम् उज्ज्वलः कार्य्येऽण् अणप्रत्ययमाहण कारो वृद्ध्यर्थः कुंभं करोतीत्यत्राणि कृते कर्तृकार्ययोरिति षष्ठ्यंतस्य कुंभशब्दस्य नाम्नश्च राम २

गंगाधरभूधरादयः इति पदसंस्कारपक्षे धरतीति धरः गंगाया धरः गंगाधरः इति शेषे कृति वेति कर्म्मणि या षष्ठी तदंतेन समासः ॥ ७ ॥ त्वावामाभ्यश्च कर्मण्युपपदे एभ्यो ण्व
ण् अनोड इत्यस्यापवादः स्वर्गं ह्वयतीति संध्यक्षराणामित्यात्वे आतो युक् स्वर्गह्वायः वेञ् तंतुसंताने तंतुं वयतीति तंतुवायः माङ् माने मेङ् प्रणिदाने अनयोरिह ग्रहणं
न तु मा माने इत्यस्याकर्मकत्वात् धान्यं मिमीते इति धान्यमायः शीलिकामिभक्ष्याचरिस्मीक्षिभ्यो णः ण प्रत्ययमाह णो रुद्यर्थः शील समाधौ मांसं शीलतीति आवतः स्त्रि
यामित्याप् मांसशीला मांसं कामयते इति कमेर्णिङ् ङि ति णिङ् अेरिति णिलोपः मांसकामा भक्ष अदने चुरादिः मांसं भक्षयतीति मांसभक्षा कल्याणमाचरतीति कल्याणाचा
रा ईक्ष दर्शने आदौ सुखं प्रतीक्षते इति सुखप्रतीक्षा क्षमूष सहने बहून् क्षमते इति बहुक्षमा आतोडः अनुपसर्गादित्येव ड प्रत्ययमाह अणोऽपवादः डित्वाट्टिलोपः गांददा

त्वावामाभ्यश्च स्वर्गह्वायः तंतुवायः धान्यमायः शीलिकामिभक्ष्याचरिस्मीक्षिभ्यो णः मांसशीला मांसकामा मांसभक्षा कल्याणाचारा सु
खप्रतीक्षा बहुक्षमा आतोडः कर्म्मण्युपपदे आदन्ताड्डः गोदः धनदः पार्ष्णित्रः नाम्नि च नाम्न्युपपदे धातोर्डः द्विजः द्विपः गृहस्थः गिरिशः
पादपः शुचश्शृद्रे सु चन्द्रवतीति शृद्रः उरसो लोपो मुम्वा डान्ते गमौ उरगः उरंगः विहायसो विहो मुम्वा डान्ते गमौ विहगः विहङ्गः भुजतुरयो
मुम्वा डान्ते गमौ भुजगः भुजङ्गः तुरगः तुरङ्गः सम्प्रसारिणिभ्यो डः कापवादः प्रज्ञः आह्वः प्रह्वः ॥ ८ तीति गोदः धनं ददातीति धनदः पार्ष्णिं पञ्चासदं
त्रायते इति पार्ष्णित्रः अनुपसर्गे किं गोसंदायः अणप्रकृत नाम्नि च नाममात्र इत्यर्थः आदंतादित्येव ह्वाभ्यां सुखशुंडाभ्यां पिबतीति द्विपः गृहे तिष्ठतीति गृहस्थः गिरावुपपदे डः
छंदस्येव नान्यत्र भाष्याद्यनुक्तत्वात् गिरौ शेत इति गिरिशः पादैः पिबतीति पादपः कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सुकेशीति गिरिरस्यास्तीति गिरिशः लोमादि
त्वाच्छः शुचः शृद्रे च शुच् शब्दस्य शृ रादेशो द्रे परे चात् द्रु धातोर्ड प्रत्ययः द्रु गतौ सुचंद्रवतीति शृद्रः उरसः स लोपो मुम्वा डांते गमौ उरस शब्दस्य सस्य लोपः गमे
र्ड अवामुमागमः उरसा गच्छतीति उरगः विहायसोवि ॥

सि॰ चं॰ हो मुम् वा डाते गमौ विहायस् शब्दस्य विह आदेशः गमेर्डश्च वा मुम् विहायसा आकाशेन गच्छतीति विहगः विहंगः भुजतुरयोर्मुम् वा अनयोरुपपदयोर्गमे
कृ॰ ३॰ र्डः अनयोर्मुम् च वा भुजेन कौटिल्येन गच्छतीति भुजगः भुजंगः तुरेण वेगेन गच्छतीति तुरगः तुरंगः संप्रसारणिभ्यो वा डः उपसर्गे आदंतादिस्य स्यापवादः संप्रसारणं ये
३ षां धातूनामस्ति ते संप्रसारणिनस्तेभ्यो डः ज्यावयोहानौ प्रजिनातीति प्रज्यः ह्वेञ् स्पर्द्धायाम् आह्वयतीति आह्वः प्रह्वः ॥ ६ ॥ तुंद शोकयोः परिमृजापनुदोरालस्य
सुखाहरणयोः कः तुंद शोकयोः कर्मणोरुपपदयोराभ्यां कः आलस्यसुखाहरणयोरर्थयोः नुदोरिति पंचम्यर्थे षष्ठी पुनः कप्रत्ययमाह कित्वान्न गुणः मृजूष् शुद्धौ तुंदं
परिमार्ष्टीति तुंदपरिमृजोऽलसः अत्र मृजेर्वृद्धिरिति वैकल्पिकी वृद्धिर्न स्यात् के स्यादेवेत्यन्ये नुद प्रेरणे शोकमपनुदतीति शोकापनुदः सुखस्याहर्ता सुखाभिलाषी अलसा

तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः कः। तुन्दपरिमृजोऽलसः। शोकापनुदः। सुखस्याहर्ता। मूलविभुजादेः कः। मूलानि वि
भुजतीति मूलविभुजो रथः। कुध्रः। महीध्रः। गिरः। गिलः। गष्ठुक् सामगः। सामगी स्त्री। पिबतेः सुराशीध्वोः। सुरापी। शीधुपी। अटौ नाम्नि कार्ये च।
अकारस्कारौ प्रत्ययौ। अस्थिहरः श्वा। कवचहरः कुमारः। धनुर्धरः युवा। कुरुचरः। पुरस्सरः। अग्रेसरः। पार्श्वशयः। पृष्ठशयः। शक्तिग्रहः।

इत्यत्र तुंदपरिमार्जः यश्च संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः अयेव मूलविभुजादेः कः मूलानि विभुजतीति भुजो कौटिल्ये मूलविभुजः रथः धारणे महीं
धरतीति महीध्रः पर्वतः कुं धरतीति कुध्रः गॄ निगरणे गिलतीति अत्र नदीरिती इगिरनेः स्वरे इति वा लः गिलः गष्ठुक् कर्मण्युपपदे अनुपसर्गाद्धायतेः कृदक्प्रत्ययमाह टः ष्टित इति ई
वर्थः गै शब्दे न तु गाङ् गतौ गा स्तुना विस्तनयोर्ग्रहणमनभिधानात् सामगायतीति आतो न पीत्या लोपः सामगः स्त्री सामगी उपसर्गे किं सामसंगायः अणु युक् च पिबतेः सुराशीध्वोः
सुराशीध्वोरुपपदयोः पिबतेष्टक् सुरां पिबतीति सुरापी शीधुमद्यं पिबतीति शीधुपी अन्यत्र ड एव क्षीरपा ब्राह्मणी अटौ नाम्नि कार्ये च अप्रत्ययमाह अस्थि हरतीति अस्थिहरः राम
कवचं हरतीति कवचहरः धनुर्धरतीति धनुर्धरः पार्श्वाभ्यां शेन इति पार्श्वशयः पृष्ठेन शेते इति पृष्ठशयः शक्तिं गृह्णातीति शक्तिग्रहः ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ३

अर्ह पूजायां पूजामर्हतीति पूजार्हा ब्राह्मणी स्तंबेरमते इति सप्तम्या अलुक् स्तम्बेरमः कर्णेजपतीति सप्तम्या अलुक् कर्णेजपः सूचकः पिशुनः टप्रत्ययमाह ईबर्थः
कुरुषु देशेषु चरतीति कुरुचरः स्त्री कुरुचरी पुरः सरतीति पुरःसरः अग्रे सरतीति एदंतत्वं निपात्यते अग्रेसरः हेतुताच्छील्यानुलोम्येषु कृञः टः हेतौ यशः करोतीति
यशस्करी सहादिर्विद्या तत्सः ताच्छील्ये श्राद्धं करोतीति श्राद्धकरः आनुलोम्ये वचनं करोतीति वचनकरः एषु किं कुंभकारः अणेव कर्मशब्दपूर्वात् कृञो वेतनेनेटः कर्मकरो
तेनेति कर्मकरो भृतकः अन्यः कर्मकारः अणेव दिवा अव्ययं दिवसवाची दिवा करोतीति दिवाकरः इत्यत्र विस्तंबशकृत्पूर्वात् कृञ इन् व्रीहिवत्सयोरर्थयोः इप्रत्यय
माह स्तंबं करोतीति स्तंबकरिः व्रीहिः शकृत्सुरीषं करोतीति शकृत्करिर्वत्सः अनयोः किं स्तंबकारः शकृत्कारः अणेव फलानि गृह्णातीति एदंतत्वं निपात्यते फलेग्रहिः

पूजार्हा स्तम्बेरमो हस्ती कर्णेजपः सूचकः यशस्करी विद्या आढ्यंकरः वचनकरः कर्मकरः दिवाकरः निशाकरः इत्यत्र रविनाम्नि का
र्ये च रविनिपदस्य खिदन्ते परेऽनव्ययस्य पूर्वपदस्य मुम् शकृत्करिः स्तम्बकरिः फलानि गृह्णाति फलेग्रहिः फलस्यैदन्तत्वं निपातनात्
इति हरिः नाथहरिः देवापिः वातापिः सर्वंकषः कूलंकषः करीषंकषः वाचंयमादयो निपात्याः वाचंयमः पुरंदरः ॥ ६ ॥ ६ ॥ ॥

दृतिनाथपूर्वाद्धरतेरिः पशौ च दृतिरिति चर्ममयी खल्ली इति ख्यातानां नाम दृतिं हरतीति दृतिहरिः पशुः नाथं नासारज्जुं हरतीति नाथहरिः पशौ किं दृतिहारः नाथहारः अणेव आ
वृव्याप्नोतेर्देवान् आप्नोतीति देवापिः वातानाप्नोतीति वातापिः रविनिपदस्य खिदन्ते परे अनव्ययस्य पूर्वपदस्य मुम् खच्प्रत्ययमाह खिलाम्नुमः सर्वकूलाभ्रकरीषपूर्वात् कषः खः कष हिंसायाम् सर्वं कष
तीति सर्वंकषः खलः कूलं कषतीति कूलंकषा नदी अभ्रं कषतीति अभ्रंकषो वायुः करीषं गोमयं शुष्कमित्यमरः करीषं कषतीति करीषंकषा वात्या वाचंयमादयो नि
पात्याः वाच् पूर्वाद्यमः खो व्रते र्थ यम उपरमे वाचं यच्छतीति वाच्पुरोरदंतत्वं निपात्यते वाचंयमो मौनव्रती व्रते किं अशक्त्यादिना वाचं यच्छतीति वाग्यमः अ
णेव दॄ विदारणे पुरं दृणातीति पुरंदरः इन्द्रः आदरेणैतयोर्ग्रहणं न संप्रदायात् ॥

सि॰ कौ॰ ४

द्विषत्परपूर्वात्तापेः खः द्विषंतं परं वा तापयतीति अरिति णिलोपः उपधाह्रस्वत्वं निपात्यते मुमि कृते संयोगांतस्येति नलोपः द्विषंतपः परंतपः खिप्रत्ययमाह आत्मोदर
कुक्षिषु भृञः खिः आत्मानं बिभर्तीति मुमि कृते संयोगांतस्येति नलोपः आत्मंभरिः कुक्षिमुदरं च बिभर्तीति कुक्षिंभरिः उदरंभरिः पुनः खप्रत्ययमाह आशिते भुवो भावक
रणयोः खः आशितशब्दे उपपदे भवतेः खः भावे करणे च यावतौदनेनातिथ्यादिर्भोजितो भवति स ओदन आशितंभवस्तेन एजांः खश् एजादिभ्यः खश् खश्प्रत्यय
माह खित्वान्मुम् शित्वाच्चतुर्वत्कार्यम् एजृ कंपने जनमेजयतीति अपकर्तरी श्यप् अदृ ह्रस्वलोपो जनमेजयः पंडितमात्मानं मन्यते इति दिवादेरितियः पंडितंमन्यः णि
निप्रत्यये पंडितमानी मुंजंधयतीति अयादेशेन धेटो धयः मुंजंधयः खशंते पूर्वपदस्यानव्ययस्य ह्रस्वः मुष्टींधयतीति मुष्टिंधयः मुष्टीं धमतीति मुष्टिंधमः नाडीं धमतीति ना

द्विषन्तपः परन्तपः। कुक्षिम्भरिः। उदरम्भरिः। आत्मम्भरिः। आशिते भुवो भावकरणयोः खः। आशितेन भूयते आशितम्भवः। आशितो भव
त्यनेनेति वा। एजाः खश्। जनानेजयतीति जनमेजयः। आत्मानम्पण्डितम्मन्यते इति पण्डितम्मन्यः। मुंजन्धयतीति मुञ्जन्धयः। कूल
न्धयः। खशन्ते पूर्वपदस्यानव्ययस्य ह्रस्वः। मुष्टीन्धमतीति मुष्टिंधमः। नाडिन्धमः। नासिकन्धयः। अनव्ययस्य किम्। दिवामन्या रात्रिः। दोषा
मन्यमहः। कूलमुद्रुजः। कूलमुद्वहः। अरुन्तुदः। दारावाहनोऽणन्तस्य च टः संज्ञायाम्। हनो घन्। उवम्। दारु आहन्तीति दार्वाघाटः ॥ ६ ॥

डिंधमः नासिकां धयतीति नासिकंधयः नाडीमुष्टीनासिकानां ह्रस्वः इशादेरिति ध्माधातोर्धम् धेटोऽयादेशः अनव्ययस्य किं दिवामन्या रात्रिः दोषामन्यमहः रु
जभंगे कूलमुद्रुजतीति कूलमुद्रुजः तुदादेरित्यः कूलमुद्वहतीति कूलमुद्वहः अरुंतुदतीति अरुंतुदः मुमि कृते संयोगांतस्येति सलोपः व्रणोऽस्त्रियामीर्ममरुरिति रा॰ म॰ ४
अरुंतुदस्तु मर्मस्पृगिति चामरः दारावाहनोऽण् अंत्यस्य च टः संज्ञायाम् दारुशब्दे उपपदे आङ्पूर्वाद्धंतेरण् अंतस्य नस्य टः स्वस्यान् पुनरण्प्रत्ययमाह णि
त्वाद्वृद्धिः दारु आहंतीति हनो घ दिति घन् उवमितिवः दार्वाघाटः सूत्रे शब्दापेक्षया दाराविति पुंस्त्वं काष्टंदा

र्विधनंत्वे धइत्यमरः टकारविधानार्थमिदं सूत्रम् अण्तु कार्य्यैः णित्वनेनैव सिद्धः अंतग्रहणं स्पष्टार्थं ॥ ८ ॥ चारौ वा चारुशब्दे उपपदे आङ्पूर्वाद्धंतेरण्वाटः चारु
आहंतीति चार्वाघाटः चार्वाघातः कर्म्मणि संपूर्वाच्च कर्म्मण्युपपदे संपूर्वाद्धंतेरण्वाटः वर्णान्संहंतीति वर्णसंघाटः वर्णसंघातः एवं पदानि संहन्तीति पदसंघाटः प
दसंघातः जायापत्योश्च कुलक्षणवति कर्त्तरि हंतेष्टक् टक् प्रत्ययमाह टित्वात् स्त्रियामीः इतीप्मरणसूचकं पाणिरेखादिकं लक्षणमयस्यास्ति सलक्षणवान् तस्मिन् कर्तरि
सति जायां हन्तीति गमा स्वरे इत्युपधालोपः हनो घ्न इति घः जायाघ्नो नापति घ्नी स्त्री अमनुष्यकर्त्तृके च कर्म्मण्युपपदे हंतेष्टक् मनुष्यभिन्ने कर्तरि सति जायाघ्नस्तिलकालकः
पित्तघ्नं घृतम् अमनुष्येति किम् आखुघातः मूद्रोऽणेवकथंतर्हि बलभद्रः प्रलंबघ्न इति शत्रुघ्नः कृतघ्न इति च मूलविभुजादित्वात्कः पाणिघनाड घौ शिल्पिनि निपात्यौ पाणिताडयोः

चारौ वा चार्वाघाटः चार्वाघातः कर्म्मणि सम्पूर्वाच्च वर्णान् संहन्तीति वर्णसंघाटः वर्णसंघातः पदं संहन्तीति पदसंघाटः पदसंघातः जायापत्यो
श्च कुलक्षणवति कर्त्तरि गमा स्वरे हनो घ्नं जायां हन्तीति जायाघ्नो नापतिघ्नी स्त्री अमनुष्यकर्त्तृके च पतिघ्नी पाणिरेखा जायाघ्नस्तिलकालकः ।
पाणिघनाड घौ शिल्पिनि निपात्यौ पाणिघः ताडघः शिल्पिनि किम् पाणिघातः ताडघातः राजघश्च राजानं हन्तीति राजघः भजाम्विण् वेः वेर्लोपः
अर्द्धभाक् सुखभाक् तुराषाट् भारवाट् अभूततद्भावे कृभ्वस्ति योगे नाम्नश्च्विः ॥ पपदयोर्हंतेष्टक् टिलोप घत्वे निपात्येते इति पाणिं हंतीति पाणिघः ताडं हंतीति
ताडघः क्रियासु कौशल्यं शिल्पं तद्स्यास्तीति शिल्पी शिल्पिनि किम् पाणिघातस्ताडघातः कार्य्यैणित्यण् राजघश्च राज्ञि हंतेष्टक् टिलोपघत्वे च राजन्नुपपदाद्धंतेष्टक् टिलोप घत्वे निपा
त्येते राजानं हंतीति राजघः भजाम्विण् नाम्न्युपपदे भजादेर्विण् विण्प्रत्ययमाह णित्वाद्वृद्धिः वेरिति विलोपः अर्द्धं भजतीति अर्द्धभाक् चोः कुरिति कः सुखं भजतीति सुखभाक्
षहमर्षणे तुरां सहते इति सहेः साडिति षत्वम् तुराषाट् केचित्तुर शब्दमदंतमाहुः तन्मतेऽन्येषामपीति पूर्वपदस्य दीर्घः अभूततद्भावे कृभ्वस्ति योगे नाम्नश्च्विः नाम्नश्च्विप्र
त्ययः नप्राग्भूतमभूतं अभूतस्यतेन स्वात्मना भवनमभूततद्भावस्तस्मिन्नर्थे कृभू अस् एषां धातूनामन्वये सति च्विप्रत्ययमाह च्वौ दीर्घ ईचास्य च्वौ परे अवर्णस्य ईकारः ईद्तो च्वौ दी

र्घः च्वौ इति विशेषणार्थौ वेरिति विलोपः क्ताद्यंतं चेति च्वौतस्या
प्यत्वाद्धि भके र्लुक् अमिथुनं मिथुनं ॥

त्रियत इति मिथुनीकरणम् अशुक्लस्य शुक्लभवनमिति शुक्लीभावः असहायः सहायः स्यादिति सहायी स्यात् अहेतुना हेतुना कृतमिति हेतूकृतम् कृभ्वस्तियोगे इति
किम् अशुक्लः शुक्लो जायते च्वौ सलोपः अरुर्मनश्चक्षुश्चेतो रहोरजसां सस्य लोपः च्विप्रत्यये असुमनसः सुमनसो भवनमिति सुमनीभावः अनरु ररुः करोतीति अ
रूकरोति अचक्षु चक्षुः करोतीति चक्षूकरोति असुचेताः सुचेताः भवतीति सुचेतीभवति अरहो रहो भवतीति रहीभवति अविरजो विरजः करोतीति विरजीकरोति
क्वचिद् डाना स्योडाप्रत्ययः कृभ्वोयोगे दुःखात् प्रातिलोम्ये डाडाप्रत्ययमाह डित्वाट्टिलोपः डाचं तं चेति डाप्रत्ययान्तस्याव्ययत्वात् द्विर्भक्ते लुक् दुःखाकरोति स्वामिनं पी

च्वौ दीर्घ ईश्चास्य च्वौ परेऽवर्णस्य ईः इदुतोर्दीर्घः अमिथुनस्य करणम् मिथुनीकरणम् शुक्लीभावः शुचीभवति सहायी स्यात् हेतूकृतम् च्वौ सलो
पः सुमनीभावः अरूकरोति चक्षूकरोति सुचेतीभावः रहीभवति विरहीकरोति क्वचिड्डा सुखं करोतीति सुखाकरोति दुःखाकरोति शम्बाकरोति द्वि
गुणाकरोति बीजाकरोति अव्ययस्य च्वावीत्वन्न दोषाभूतमहः दिवाभूता रात्रिः हसात्स्यस्य यकारस्य लोपश्च्वौ अगार्ग्यो गार्ग्यो भवति गार्गीभवति री
ङ् ऋतः मात्रीकरोति च्विविषये साद्वासात्पदाद्योः सस्य षत्वन्न ॥ इयतीत्यर्थः सुखप्रियाभ्यामानुलोम्ये डा सुखाकरोति प्रियाकरोति गुरुं अनुकू
लाचरणेनानन्दयतीत्यर्थः शंबद्विगुणबीजेभ्यो डा कृषिवाच्ये शंबाकरोति शंबशब्दः प्रतिलोमेऽर्थेऽस्ति अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षतीत्यर्थः क्षेत्रं द्विगुणा
करोति क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः बीजाकरोति काशिकायां बीजशब्दो बीजवापनसहितविलेखने वर्त्तते बीजवापनसहितं विलेखनं करोतीत्यर्थः
अव्ययस्य च्वावीत्वन्न पुनः च्विप्रत्ययमाह अदोषाभूतमिति दोषाभूतमहो दिनं अदिवा दिवाभूतेति दिवाभूता रात्रिः ण्यायन णेय ण णी या इति ण्यः गार्ग्यः अगा
र्ग्यो गार्ग्यो भवति हसात्तद्धितस्येति यलोपे च्वावितीत्वे च गार्गी भवति रीङ् ऋतः ऋकारस्य रीङ् स्यात् च्वौ अमातरं मातरं करोतीति मात्रीकरोति च्विविषये साद्वा
नाम्नोः भूतनद्भावे एवं सात्व॥

स्य योवा स्यात् साकल्येऽर्थे सात्प्रत्ययमाह साव्ययसस्याव्ययत्वाद्विभक्तेर्लुक्॥ ः॥ सा सदा योः सात्प्रत्ययस्य पदादौ वर्त्तमानस्य च सस्य षत्वं न दधि सिंचति क्लिन्नादि
नि षत्वे प्राप्ते निषेधः अनग्निरग्निर्भवतीति अग्निसाद्भवति कृत्स्नं सर्वावयवोपेतं शस्त्रमग्नीभवतीत्यर्थः सात् भावपक्षे च्विरेव वा साकल्ये किम् एकदेशेन शु
क्लीभवति परः संपदा योगे च नाम्नः संपद्यानुयोगे सात्प्रत्ययो वा भवति अजलं जलं संपद्यते इति लवणं जलसात् संपद्यते पक्षे संपदा योगे वा कामेव अधीने च
नाम्नस्तदधीनेऽर्थे सात् स्यात् कृभ्वस्तिसंपद्योगे राजाधीनं संपद्यते इति नाम्नो नलोपः इति न लोपः राजसात् संपद्यते राजाधीनं करोतीति राजसात् करोति देये त्रा च नाम्नस्त
दधीने देयेऽर्थे त्रा प्रत्ययः स्यात् चात् सात् अपि कृभ्वस्तिसंपद्योगे त्रा प्रत्ययमाह अव्ययत्वाद्विभक्तेर्लुक् विप्राधीनं देयं करोतीति विप्रत्रा करोति विप्राधीनं देयं संपद्यते इति

अग्निसाद्भवति अग्नीभवति सम्पदा योगे च जलसात् सम्पद्यते अधीने च राजसात् सम्पद्यते देये त्रा च विप्राधीनं देयं करोति विप्रत्रा करोति॥
विप्रत्रा सम्पद्यते विप्रसात् करोति देवमनुष्यपुरुषपुरुमर्त्येभ्यो वा त्रा देवत्रा वन्दे देवम्वन्दे ख्युट् करणे आढ्यसुभगस्थूलपलितनग्नान्धप्रिये
षु च्व्यर्थेषूपपदेषु कृञः करणेऽर्थे ख्युट् प्रत्ययः अनाढ्यमाढ्यं करोत्यनेनाढ्यंकरणम् सुभगंकरणम् स्थूलंकरणम् दधिपलितंकरण
म् नग्नंकरणम् चूनम् अन्धंकरणम् प्रियंकरणम्॥ ३॥ ((विप्रत्रा संपद्यते देये किम् राजसाद्भवति राष्ट्रं देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यं

तेभ्यो वा त्रा द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्चैभ्यस्त्रा वा स्यात् देवान् इति देवत्रा वंदे देवेषु इति देवत्रा रेमे मनुष्यान् इति मनुष्यत्रा गच्छति मनुष्येषु इति मनुष्यत्रा व
सति पुरुषान् इति पुरुषत्रा गच्छति पुरुषेषु इति पुरुषत्रा वसति पुरून् इति पुरु शब्दोऽत्र बहुशब्दपर्यायः पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोरिति हेमः पुरुत्रा ग
च्छति पुरुषु इति पुरुत्रा वसति मर्त्यान् इति मर्त्यत्रा गच्छति मर्त्येषु इति मर्त्यत्रा वसति ख्युट् करणे ख्युट् प्रत्ययमाह ख्वः खित्पदस्येति सुमर्थः ट ईबर्थः यु वो रि
त्यनः आढ्यंकरणं एवं सुभगंकरणं स्थूलंकरणं पलितंकरणं नग्नंकरणं अन्धंकरणं प्रियंकरणं॥

सि॰ च॰ कौ॰ उ॰ ६

भुवः खिष्णुखुकञौ कर्तरि आढ्यादिषुच्व्यर्थेषूपपदेषु भवतेरेतौ स्तः खिष्णुप्रत्ययमाह खित्वान्मुम् आढ्यंभविष्णुः एवं सुभगंभविष्णुः स्थूलंभविष्णुः पलितंभविष्णुः
नग्नंभविष्णुः अंधंभविष्णुः प्रियंभविष्णुः खुकञ्प्रत्ययमाह खित्वान्मुम् ञित्वाद्वृद्धिः अनाढ्य आढ्यो भवतीति आढ्यंभावुकः एवं सुभगंभावुकः स्थूलंभावुकः पलि
तंभावुकः अंधंभावुकः प्रियंभावुकः आतो मनिप् क्वनिप् वनिपः प्रत्ययानाह पित्वा तुक् कित्वान्न गुणः इकार उच्चारणार्थः सुष्ठु ददातीति नोपधाया इति दीर्घः नाम्नो नो लोप
शितिनलोपः सुदामास्थामीदोऽवखंडने षोऽन्तकर्मणि मा माने माङ् माने मेङ् प्रणिदाने इति त्रयाणां ग्रहणं ष्ठा गतिनिवृत्तौ एषामित्वं स्यात् तादौ किति ईत्वदत्वयोर
पवादः शाच्छोर्वा शो तनूकरणे छो छेदने अनयोरित्वं वा तादौ किति अपिहाधागे हाक् पिबतीनामीः दो अवखंडने देङ् पालने दाण् दाने डुदाञ् दाने एषां चतुर्णां ग्र

भुवः खिष्णुखुकञौ कर्तरि अनाढ्य आढ्यो भवति आढ्यंभविष्णुः आढ्यंभावुकः आतो मनिप् क्वनिप् वनिपः ना सुप्युपपदे आदन्ताद्धातोरेते
प्रत्ययास्युः सुदामा अश्वेतिष्ठतीति अश्वत्थामा निपातनात्सस्य तः स्थामीनादौ किति दो सो मा स्था मिर्भवति शाच्छोर्वा अपि हा धागे हाक् पिबती
नामीः किति ह्रसे क्विपि वा नेतुक्यपि सुपीवा घृतपीवा भूरिदीवा अनादन्तादपि अपिशब्दान्निरुपपदेभ्योऽपि सुकर्मा ह्रस्वस्य पिति कृति तुक्
प्रातरित्वा वनिपि ञमस्यात्वम् विशेषेण जायते विजावा ओणृ ओणतीत्यवावा पारदृश्वा राजयुध्वा सुत्वा धीवा पीवा ॥ ६ ॥ ६ ॥

हणं धेट् पाने डुधाञ् धारणपोषणयोरित्युभयोर्ग्रहणं गै शब्दे ओहाक् त्यागे पा पाने एषामीत्वं स्यात् किति ह्रसे क्विपि तु ईत्वं वा क्यपि ईत्वं न सुष्ठु पिबतीति कित्वा
न्न गुणः सुपीवा घृतं पिबतीति घृतपीवा अनादन्तादपि एते प्रत्ययाः स्युः शॄ हिंसायां सुष्ठु शृणातीति ह्रस्वस्योरितो न सुशर्मा ह्रस्वस्य पिति कृति तुक् ह्रस्वस्य तुगागमः
स्यात् पिति कृति इण् गतौ प्रातरेतीति प्रातरित्वा वनिपि ञमस्यात्वं ञमानस्य धातोरात्वं स्यात् वनिपि षष्ठीनिर्दिष्टस्यैतन्न स्यादेशः जनी प्रादुर्भावे विजायते इति वि
जावा ओणृ अपनयने ओणतीति अनुनासिकस्यात्वे अवादेशे च अवावा कर्मण्युपपदे दृशेः क्वनिप् भूते इति केचित् पारं दृष्टवान् इति पारदृश्वा वर्तमा ॥ उम ६

नेपिस्यान् विश्वर श्वन यनाव यमिस्यत्र विश्वंपश्यंतीति विश्वदृश्वानि नयनानि येषां नेविश्वदृश्वनयना इति वर्नमानेन विग्रहे ऽपि नस्तानिः युधसंप्रहारे राजानं युध्य
नेइति राजयुध्वा कृञ् अभिषवे सुनोतीति हृस्वस्येति तुक् सुत्वा दधातीति अपि द्दाधेनो त्वं धीवा पिबतीति पीवा॥ ॥ क्विप्च सर्वधातुभ्यः क्विप्स्यात् क्विपप्रसयमाद्किला
न्यण: पित्वात्तुक् वेरिति विलोपः कर्मकरोतीति कर्मकृत् प्रशाम्यतीति अमांतस्येति दीर्घः मोनोधातोरिति नत्वम् प्रशान् सोमंसुनोतीति सोमसुत् अग्निं चिनोतीति अग्नि
चित् सोमं पिबतीति अपि द्दाधेति क्विपि वेत्वं सोमपाः सर्वंपश्यतीति सर्वदृक् दिशामिति कः दिश अतिसर्ज्जने दिशतीति दिक् क्विपि वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दी
र्घो संप्रसारणं च एषां दीर्घः संप्रसारणाभावश्च स्यात् क्विपि वचपरिभाषणे प्रच्छ ज्ञीप्सायां आयतपूर्वः स्तु कटपूर्वः प्रुङ् गतौ जुङ् गतौ श्रिञ् सेवायां वक्तीति वाः कुरि

क्विप् धातोः क्विप्स्यात् कर्मकृत् मोनोधातोः प्रशान् प्रदान् अग्निचित् सोमसुत् सोमपाः सर्वदृक् दिश अतिसर्ज्जने दिक् क्विपि वचिप्रच्छ्या
यतस्तुकटप्रुजुश्रीणां दीर्घो सम्प्रसारणञ्च वाक् ङ्कि निझसे क्वौ अमे चेति छस्य सोवस्य ऊः तत्व प्राट् तत्त्वप्राशौ आयतस्तूः कटप्रूः जुङ्गतौ
जूः श्रीः ध्यायतेः क्विपि सम्प्रसारणम् सुधीः गमादीनां अमस्य लोपः क्विपि क्वापि वा अङ्ग गतं परीततं संयत् सुनतं ऊङ् अग्रेगूः अग्रेभूः द्युतिग
मिजुहोतीनां क्विपि द्वित्वम् दिद्युत् जगत् ॥१॥ निकः वाकृतत्वं एच्छतीति ङ्कि निझसे क्वौ अमे चेति छस्य शः छशषेति षः षोडइति डः तत्व प्राड् आयतं स्तौ
तीति आयतस्तूः कटंप्रवते इति कटप्रूः जवतीति जूः हरिं श्रयतीति हरिश्रीः वचिप्रच्छ्योः संप्रसारणाऽभावः ध्यायतेः क्विपि संप्रसारणम् ध्यै चिंतायां सुष्ठु ध्यायतीति सु
धीः गमादीनां अमस्य लोपः क्विपि क्वापि वा गमन्तनुयमूणमइत्यादीनामनुनासिकस्य लोपः स्यात् क्विपि क्वापि तु वा अङ्गं गच्छतीति हृस्वस्यपितीति तुक् अगगत् परि
तनोतीति परीतत् न हि वृतिवृषिव्यधीति पूर्वस्य दीर्घः संयच्छतीति संयत् सुनमतीति सुनतत् ऊङ् च गम्यादीनां मूङा देशो अमस्य लोपश्च स्यात् क्विपि ङित्वादंत्य
स्यादेशः अग्रेगच्छतीति अग्रेगूः अग्रेभ्रमतीति अग्रेभ्रूः सप्तम्या अलुक् द्युतिगमिजुहोतीनां क्विपि द्वित्वं द्योनतेइति द्युतेः पूर्वस्येति संप्रसारणं दिद्युत् गच्छतीति ग

विदिनिसिलिमलोपः ङ्क्ष कृत जगत॥

सि॰ कौ॰ जुहोतेर्दीर्घः अस्य दीर्घः स्यात् क्विपि जुहोत्यनयेति जुहूः करणस्य कर्तृत्वविवक्षायां क्विप् पदान्तस्यानितेर्नस्य णत्वं उपसर्गस्थान्निमित्तात् परस्य पदान्तस्यानितेर्नस्य णत्वं स्या

हु॰ उ॰ त् अन प्राणने प्रकर्षेण अनितीति सम्बोधने हे प्राण् अत्र अमानस्येति दीर्घो नाम्नो नो लोपः शिति सूत्रे अधाविसुक्तत्वान्नलोपो न शासु अनुशिष्टौ क्विप् लोपे प्रत्ययलोपे प्र

७ त्ययलक्षणमिति न्यायेन हसादिकित्प्रत्ययपरत्वात् शासेरिदिती कारः घसादे रिति षः दोषामित्रः य्वोर्विहसे इति दीर्घः मित्रशीः आशासः क्वावुपधाया इत्वम् आ

ङः शासु इच्छायामित्यात्मनेपदी शासेरिदिति सूत्रेणेत्वे सिद्धे आशास उपधाया इत्वं क्वावेव नान्यत्रेति नियमार्थमिदं सूत्रं तेनाऽऽशास्ते इत्यत्रेत्वं न भवति आशास्ते इति

आशीः गॄ निगरणे गिरतीति ॠत इद्धातोरिति र्व्योर्विहसे इति दीर्घः गीः पॄ पालनादौ पिपर्तीति पोरुच्चरित्युः र्व्योर्विहसे इति दीर्घः पूः इस्मन्त्रन्क्विषु छादेर्ह्रस्वः छद अपवारणे न्यं

जुहोतेर्दीर्घः जुहूः पदान्तस्यानितेर्नस्य णत्वमुपसर्गस्थान्निमित्तात् अन प्राणने हे प्राण् मित्राणि शास्तीति मित्रशीः आशासः क्वावुपधाया इ

त्वम् आशीः गीः पूः इस्मन्त्रन्क्विषु छादेर्ह्रस्वः छद अपवारणे चुरादिः तनुं छादयतीति तनुच्छत् असयुः रा च्छो लोपः क्वौ झसादौ हे चप्र

त्यये मूः मुरौ धूः धुरौ दुहः को घोऽन्तादेशश्च कामदुघा दृशेष्टक्सकौ चोपमाने कार्ये उपमाने कर्मण्युपपदे दृशेष्टक्सकौ चात् क्विप् आ सर्वादेः

एषु परेषु सर्वादेरात्वम् अन्यादृशः अन्यादृक्षः अन्यादृक् तादृशः तादृक्षः तादृक् ॥ तस्य अस्य ह्रस्वः स्यात् एषु परेषु इति प्रत्यये छादिः मन् प्रत्यये छद्म त्रप्र

त्यये छत्रम् क्विपि तु तनुं छादयतीति णेरिनिटीति णिलोपः तनुच्छत् दिवु क्रीडादौ अक्षैर्दीव्यतीति क्विप् इति झसे च्छ्वो ऊ मे चेति वस्य ऊः अक्षद्यूः मूर्छा मोहसमुच्छ्राययोः मूर्छती

तिरेफात् छ्वोरिति छलोपः र्व्योर्विहसे इति दीर्घः मूः धूर्वी हिंसायाम् धूर्वतीति रेफात् छ्वोरिति वलोपः धूः दुहः को घोऽन्तादेशश्च दुहः कप्रत्यये हस्य घश्च स्यात् कप्र

त्ययमाह कित्वात् गुणो न कामं दोग्धीति कामदुघा धेनुः दृशेष्टक्सकौ चोपमाने कार्ये टक् सकौ प्रत्ययौ वा हटित्वात् दीप् कित्वात् गुणो न आ सर्वादेः सर्वादेष्टरात्वं स्यात् दृक्दृशदृक्षेषु प राम ७

रेषु अन्यमिव पश्यतीति अन्यादृशः ईपि अन्यादृशी छ्वशषे ति षत्वं षढोः कः सि अन्यादृक्षः क्विपि अन्यादृक् तमिव पश्यतीति तादृशः ईपि तादृशी तादृक्षः तादृक् ॥

किमिदमः कीदृश् किम् शब्दस्य इदम् शब्दस्य च की ईश् आदेशौ स्तः कमिव पश्यन्तीति कीदृशः ईपि कीदृशी कीदृक्षः कीदृक् इदमिव पश्यन्तीति ईदृशः ईपि ईदृशी ईदृ
क्षः ईदृक् भवन्तमिव पश्यन्तीति भवादृशः ईपि भवादृशी भवादृक्षः भवादृक् यमिव पश्यन्तीति यादृशः ईपि यादृशी यादृ क्षः यादृक् अमुमिव पश्यन्तीति अदस एत्वे रु
ति दस्य मः इति मः मादृदस्सूत्वं अमूदृशः ईपि अमूदृशी अमूदृक्षः अमूदृक् मामिव त्वामिव च पश्यन्तीति त्वन्मदेकत्वे इति त्वन्मदौ एरात्वे च मादृशः ईपि मादृशी मादृ
क्षः मादृक् त्वादृशः ईपि त्वादृशी त्वादृक्षः त्वादृक् अस्मानिव युष्मानिव च पश्यन्तीति अस्मादृशः ईपि अस्मादृशी अस्मादृक्षः अस्मादृक् युष्मादृशः ईपि युष्मादृ
शी युष्मादृक्षः युष्मादृक् णिनिरतीनेनाम्नुपसर्गे चोपपदे धातोरतीते काले नाच्छील्ये णिनिः स्यान् कर्तरि णिनि प्रत्ययमाह णित्वाद्वृद्धिः इकार उच्चारणार्थः यजदेवपू

किमिदमः कीश् कीदृशः कीदृक्षः कीदृक् ईदृक्षः ईदृशः ईदृक् भवादृशः भवादृक्षः भवादृक् यादृक् अदसोऽमूस्यादृक् दृशह क्षेषु अमूदृ
क्षः अमूदृशः अमूदृक् मादृशः मादृक्षः मादृक् त्वादृशः त्वादृक्षः त्वादृक् युष्मादृशः युष्मादृक्षः युष्मादृक् अस्मादृशः समानस्य सः सदृशः
सदृक्षः सदृक् णिनिरतीते धातोरतीते काले शीले च णिनिः अग्निष्टोमेनायाक्षीत् यजनशीलो वा अग्निष्टोमयाजी पितृव्यघाती उष्णभो
जी व्रते त्स्थण्डिलशायी क्विब्वनिप्ड्वाः धातोरतीते शीले चेते ब्रह्महा भ्रूणहा वृत्रहा सुकृत् धर्म्मकृत् पापकृत् अग्निचित् ॥ जादौ अग्निष्टोमेनेष्टवा
न् इति इनामिति दीर्घो अग्निष्टोमयाजी स्तोत्रेण समाप्यमानो यो यागः सोऽग्निष्टोमः पितृव्यं हतवानिति हनो घत् इति घत् पितृव्यघाती शीले तु उष्णं भोक्तुं शीलमस्येति उष्णभो
जी शीले किम् उष्णं भुङ्क्ते कदाचित् व्रते च व्रतेर्थे णिनिः स्यात् स्थण्डिले शेते व्रतार्थमिति स्थण्डिलशायी बहुलमाभीक्ष्ण्ये णिनिः आभीक्ष्ण्यं पौनःपुन्यं क्षीरपायिन उशीनराः एतत्सर्वं
मनुकसमुच्चयार्थ च शब्दानुवृत्तेर्लभ्यते क्विप्वनिप्ड्वाः पुनः क्विप्वनिप्ड्वप्रत्ययानाह क्विलाहुणानपित्वात् तुक् ङित्वात् ढिलोपः इकार उच्चारणार्थो वेरिति विलोपः ब्रह्मभ्रूण
वृत्रेषु कर्मसूपपदेषु हन्तेः क्विप् नान्यत्र ब्राह्म णं हतवानिति नित्वादि दीर्घः ब्रह्महा भ्रूणं गर्भं हतवानिति भ्रूणहा वृत्रं दैत्यं हतवानिति वृत्रहा इन्द्रः कर्म कृतवानिति कर्म्मकृत्

सि॰ च॰ षुञ् अभिषवे सोमं सुनवानिति सोमसुत्वनिपितु यज देवपूजादौ इत्थवानिति नोपधाया इति दीर्घः यज्वा डुप्रसयेतु जनी प्रादुर्भावे सरसि जातमिति सरसिजं सरोजं सप्तम्या

कृ॰ उ॰ अलुक् वा संस्कारात् ज्ञान इति संस्काजः प्रकर्षेण जाते निप्रजा आवन इत्याप् प्रजा स्यात् सं नतौ जने इत्यमरः नजात इति अजः नाइत्य द्वादेशः द्वाभ्यां जन्म संस्काराभ्यां जात

८ इति द्विजः स्वनस्व न ने परित स्वानेति आव न इत्याप् परिस्वा क्तक्तवतू प्रत्ययावाह किस्वादु णोन उकारो इतो नुमिति नुमर्थः क्तप्रत्ययो भाव कर्म कर्त्तृ

षु भवति क्तवतुः कर्तर्येव स्मा शे चे त्वयाः स्थायि इति स्थानं अकारीति कृतः कटस्तया अकार्षीदिति कृतवान् अत्वसो सावितिदीर्घः गत्यर्थाद् कर्मका चकर्तरीति गत्यर्थाद कर्मका

च धातोः क्तः स्यात् भाव कर्म कर्तृषु अगमदिति गतो गंगां मः लोपस्त्वनुदात्तनामिति मलोपः अस्थादिति स्थितः सः स्थामोनी त्वं शमु दमु उपशमे अश मदत्मदिति शमांत

सोमसुत् यज्वा सरसिजम् सरोजम् संस्कारजः प्रजा अजः द्विजः परितः स्वाना परिस्वा क्तक्तवतू धातोरतीतेकाले क्तक्तवतू ए तौ स्तो भावकर्म

णो क्तः स्यातम् कृतः कटः विस्मुर्वि श्वं कृतवान् गत्यर्थाद् कर्मकाच्च कर्त्तरि क्तः भावकर्मणोरपि गङ्गां गतः स्थितः अमांत स्योपधाया दीर्घः द्विति

इसे क्तो वं शान्तः दान्तः श्लिष शीङ् स्था आस वस जन रुह जीर्यतिभ्यश्च रामः सीतामाश्लिष्टः शेषमधिशयितः स्वर्गमधिष्ठितः हरिमुपासि

तः हरिदिनमुपोषितः तमनुजातः वृषमारूढः जगदनुजीर्णः क्तो वासेट् ॥ स्योपधाया इति दीर्घः शान्तः दान्तः श्लिष शीङ् स्था आस वस जन रुह जीर्यतिभ्य

श्च एभ्यः कर्तरि क्तः भावकर्मणोश्च श्लिष आलिंगने शीङ् स्वप्ने ष्ठा गतिनिवृत्तौ आस उपवेशने वस निवासे जनी प्रादुर्भावे रुह बीजजन्मनि प्रादुर्भावे च जॄ वयोहानौ अ

धिपूर्वाणां शीङ् स्थासामित्याधारस्य कर्मसंज्ञा उपान्वध्याङ् पूर्वस्येति वस आधारस्य कर्मसंज्ञा आश्लिक्षदिति आश्लिष्टो रामः सीतां अध्यशयिष्टेति अधिशयितो हरिः

शेषमध्यष्ठादिति अधिष्ठितः स्वर्गम् स्थामीनीत्वम् उपासिष्टेति उपासितः स हरिं उपावात्सीदिति वसिक्षुधोरिनीइयजामिति संप्रसारणम् घसादेरिति षः उपोषितः

सह रिदिनं अन्वजनिष्टेति जनसन खनामित्यात्वं अनुजातः स रामम् आरुक्षदिति होढ इति ढत्वम् तथोर्द्द इति तस्य धत्वम् ष्टुत्वं च ढि ढो लोप इति ढलोपः पूर्वदी

राम ८

नीरू यो विद्धसेइ इतिदीर्घः रहनिनस्यनत्वम् अनुजीर्णः सविम्बं कर्म्मणि तु गना प्राप्ता गंगानेन आश्लिष्टा सीता रामेण अधिशयितः शेषो हरिणा अधिष्ठितः स्वर्गस्तेन उपासितो
हरिस्तेन उपोषितं हरिदिनं तेन अनुजातो रामस्तेन आरूढो वृषस्तेन अनुजीर्णो विश्वस्तेन॥ ८॥ नो वा सेट् उदुपधात् शब्विकरणादिट् भावकर्म्मणोः सेट्को वाकिन् संज्ञः
स्यात् क्त्वा आवेगुणः द्युतदीप्तौ अद्योतिरिति द्युतितं द्योतितम् तेन मुद हर्षे प्रामोदि इति प्रमुदितः प्रमोदितः साधु स्तेन उदुपधात्वित् प्रविदितं भावकर्म्मणोः किम् रुचितं व
नम् गत्यर्थाद्कर्म्मकादितिकर्त्तरि क्तः सेट् किम् कुषम् कुषनिष्कर्षे अब्विकरणात्किम् गृध्यते गृधितम् शीङ् स्विदि मिदि क्ष्विदि धृष मृष पूङः सेटौ क्तक्तवतू किनौ
न अकित्त्वात् गुणः अशयिष्टेति शयितः शयितवान् सः क्तन इतीट् अनुबंधनिर्देशो यङ्लुगनिरसनार्थः शेशयितः शेशयितवान् गुधानोरितियः किंच स्विदादीनामादीदित

उदुपधात्सेट् क्तो वा किन् द्युतितम् द्योतितम् प्रमुदितः प्रमोदितः साधुः शीङ् स्विदि मिदि क्ष्विदि धृष मृष पूङः सेटौ क्तक्तवतू किनौ न श
यितः शयितवान् प्रस्वेदितः प्रस्वेदितवान् स्वेदितः स्वेदितवान् धर्षितः धर्षितवान् मृषः क्षान्तौ मर्षितः मर्षितवान् पूङो वा किन् स्तस्येट्
पवितः पूतः पवितवान् पूतवान्॥ ८॥

इनीणिनिषेधे प्राप्ते भावे कर्त्तरि चादितन इतिसेट्कत्वम् पूङः किन इनीणिनिषेधे प्राप्ते पूङो वा किन इतिसेट्कत्वम् ञिक्ष्विदा
स्नेहनमोचनयोरिति भ्वादिरत्र गृह्यते न तु ष्विदा गात्रप्रस्रवणे दिवादिः भ्वादि साहचर्यात् प्रास्वेदिष्टेति प्रस्वेदित श्वेत्रः स्वेदित श्वेत्रः स्वेदितं तेन प्रस्वेदितं तेन प्र
स्वेदितवान् सः स्विद्यते स्म स्विदितः स्विदितवान् ञिमिदा स्नेहने ञिक्ष्विदा स्नेहन मोचनयोः एतौ दिवादौ भ्वादौ च गृह्येते प्रमेदितः प्रमेदितवान् प्रस्वे
दितः प्रस्वेदितवान् ञिधृषा प्रागल्भ्ये प्रधर्षितः प्रधर्षितवान् प्रधर्षितस्तेन मृष क्षान्तौ मृषः सेटौ क्तक्तवतू किनौ न स्तः समायामर्थे मर्षितो मर्षितवान् स
मायां किम् अपमृषितं वाक्यम् अविस्पष्टमित्यर्थः पूङो वा किन स्तस्येट् पूङः परस्य किन स्तस्येट् वास्यात् पूङ् पवने कितः वुः सेट्त्वतो वुरित्यनुवृत्तं॥ ८॥

सि॰ कौ॰ क्तिनः श्विश्रिञ्जवर्णावर्णान्तेभ्यः परस्य क्तिनः प्रत्ययस्येण्न भूदिति भूतः श्रुङ् संभक्तौ उवर्णे च श्रुतः श्रित्र् सेवायाम् श्रितः टुओश्वि गतिवृद्ध्योः यजामिति संप्रसारण

कृ॰ प्र॰ म् श्वयतेः संप्रसारणस्य दीर्घः शूनः वेञ् तंतुसंताने यजामिति संप्रसारणे वेञो ह्रस्वः उतं आदीदिति आश्च इश्च आदीतौ आदीतौ इतौ यस्य सः आदीदिति तस्मा

९ दादीदितो धातोः क्तक्तवत्वोरिण्न स्यात् कृत इडसस्यापवादः ञीतांतकः वर्तमाने पिञ्जि रिघेषांते ञीतः स्तेषां मतिबुद्धि पूजार्थेभ्यश्च तः स्यात् वर्तमाने ऽर्थे मतिरिह

च्छा बुद्धिः पृथग्ग्रहणात् राज्ञां मत इष्टः नेरिष्यमाण इत्यर्थः बुद्धः विदितः पूजितः चितः दस्तस्य नोदश्च दात्सरस्य क्तिनस्तस्य नत्वं चादः स्यापिनत्वं स्यात् भावे कर्म

णि चादिति क्तक्तवत्वोरिड्वा आकारेतो धातोर्भावकर्मस्थितयोः क्तक्तवत्वोरिड्वा स्यात् ञिमिदा स्नेहने मिद्यते इति मिन्नं तेनशीङ् स्विदिमिदीति क्तस्यापि क्त्वाद्गुणः मेदितेऽर

क्तिनः उवर्णान्तात् ऋवर्णान्तात् श्वि श्रिभ्यां च परस्य क्तिनस्तस्य इण्न भूतः श्रुतः श्रितः श्वयतेः सम्प्रसारणस्य दीर्घः शूनः वेञो ह्रस्वः उतम् आदी

दितः आदितः ईदितः श्च क्तक्तवत्वोर्नेट् ञीतां कृ वर्तमाने ऽपि ञीतां धातूनां मतिबुद्धि पूजार्थानाञ्च वर्तमाने ऽपि तकः राज्ञामतः बुद्धः इष्टः दस्तस्य नो

दश्च दकारात्परस्य क्तिनस्तस्य नत्वं दकारस्य च मेदितः मृमिन्नम् भावे कर्तरि चादितः क्तक्तवत्वोरिड्वा मेदितः मिन्नः प्रस्वेदितः प्रस्विन्नः स्वेदितः स्वि

न्नः अदो जग्धः क्तिनि तकारे जग्धम् स्फायः क्तिनस्तस्य नत्वम् विकीर्णम् जीर्णम् स्वाद्योदित श्च स्वादेराेदितश्च धातोः क्तिनस्तस्य नो भवति लूनः लूनवान्

निमेदितः सः ञिष्विदा स्नेहनमोचनयोः प्रस्विद्यते इति प्रस्विन्नं तेन प्रस्वेदते इति प्रस्वेदितः सः ञिस्विदा स्नेहनमोचनयोः स्विन्नं तेन स्वेदितः सः अदो जघुः अदो जग्धु

रादेशः स्यात् क्तिनि तादौ प्रत्यये उकार उच्चारणार्थः तथो ईइति नित्य घः झभे जबा इति कस्य गः जग्धम् रः रात्क्तिनस्तस्य नत्वं स्यात् कॄ विक्षेपे जॄ वयोहानौ ऋत इद्धातो रिती र्

वोर्विहसे इति दीर्घः विकीर्णः जीर्णम् ल्वाद्योदितश्च ल्वादेरेकविंशतेर्द्धातोरादिति श्च क्तिनस्तस्य नत्वं स्यात् क्र्यादेरन्तर्गणो ल्वादिः लूञ् १ स्तृञ् २ कॄञ् ३ वृञ् ४ धू राम

ञ् ५ शॄ ६ पॄ ७ वॄ ८ भॄ ९ मॄ १० दॄ ११ जॄ १२ नॄ १३ कॄ १४ ऋ १५ गॄ १६ ज्या १७ री १८ ली १९ व्री २० प्ली २१ इति ल्वादिः लूञ् छेदने लूयते स्म इति लूनः लुनाति स्मेति लूनवान् ९

ञ्यावयोहानौश्यहामिति संप्रसारणं जीनः प्यायःपी निष्ठिनि प्यायः पी आदेशः स्यान्नादौ किति ओप्यायी वृद्धौ पीनः भुजो कौ टिल्येन त्वस्यासिद्धत्वेन झस परत्वात् चोः कुरिति गः भुग्नः
ओहाक् त्यागे अपि हाधे तीत्वं हीनः षूङ् प्राणिप्रसवे स्वादय ओदित इत्योदित्वान्नत्वं सूनः सूनवान् दिवादिरंतर्गणो यं स्वादिः षूङ् १ दूङ् २ दीङ् ३ डीङ् ४ धी
ङ् ५ मीङ् ६ रीङ् ७ लीङ् ८ व्रीङ् ९ स्वादयो नव दूङ् परितापे दूनः दूनवान् डीङ् विहायसा गतौ ओदित्त्वाभावेडीडः पाठसामर्थ्यादिण्न उड्डीनः दीङ् क्षये दीनः लीङ्
श्लेषणे लीनः रीङ् स्त्रवणे रीणः धीङ् आधारे धीनः दुग्वो दीर्घश्च दुग् भ्यां परस्य क्तिनस्तस्य नत्वमनयो दीर्घश्च स्यात् गुपुरीषोत्सर्गे दुग उपतापे अयं तु न गृह्यते सा
नुबंधकत्वात् मृदुतया दुतया इति माघः दूनः गूनः क्षियो दीर्घः कर्तरि क्तक्तवत्वोर्नत्वं च क्षियः परयोः कर्तरि स्थितयोः क्तक्तवत्वोस्तस्य नत्वं क्षियो दीर्घश्च स्यात् क्षि क्ष

ञ्यावयोहानौ जीनः प्यायः पीतिक्तिनि पीनः भुजो कौटिल्ये भुग्नः हीनः स्वादय ओदितः षूङ् प्राणिप्रसवे सूनः सूनवान् दूङ् परितापे दूनः मी
नः डीङ् उड्डीनः दीनः लीनः व्रीणः रीणः धीनः दुग्वो दीर्घश्च दूनः गूनः क्षियो दीर्घः कर्तरि क्तक्तवत्वोर्नत्वं च क्षीणः क्षीणवान् कर्तरि किं क्षि
तम् यलसंयोगादेरातस्तात्क्तिनस्तस्य नत्वम् द्राणः ग्लानः म्लानः नुद विदोन्द त्रा घ्रा ह्रीभ्यो वा त्राणः त्रातः घ्राणः घ्रातः ह्रीणः ह्रीतः नुनः
॥ नुन्नः विद विचारणे विन्नः वित्तः

यक्षि निवासगत्योश्च क्षयति क्षेति क्षीणः क्षीणवान् कर्तरि किम् क्षीयते स्मेति क्षितं कामेन यलसंयोगादेरातस्तात्क्तिनस्त
स्य नत्वम् यलप्रत्याहारेण संयोगादेराकारांता द्धातोः परस्य क्तिनस्तस्य नत्वं स्यात् द्रा कुत्सायां गतौ द्राणः ग्लै म्लै हर्षक्षये ग्लानः म्लानः नुद विदोंद त्रा घ्रा ह्रीनिर्वीभ्यो वा
एभ्यः क्तिनस्तस्य नत्वं वा स्यात् आ घ्राणं त्रयाणां द्वस्येति नित्यं नत्वे प्राप्ते त्रा घ्रा अनयोर्यल संयोगादेरिति नत्वे प्राप्ते ह्री वा अनयोरप्राप्ते सति विभाषेयं नुद प्रेरणे नुनः नु
न्नः विद विचारणे रोधादिक एव गृह्यते उन्दिना परेण साहचर्यात् विनः विन्नः न याच भाष्यमवेनेस्तु विदितो निष्ठा विद्यते विंन्न इष्यते विंनो विनश्च विन्नश्च भोगे वित्त

सि॰ चं॰ उन्दी क्लेदने आदीदितइतीण्णनोलोपइतिनलोपः उन्नः उनः त्रैङ् पालनेत्राणः त्रातः घ्रागन्धोपादाने घ्राणः घ्रातः ह्रीलज्जायांह्रीतः ह्रीणः वागतिगंधनयोः अवा

कृ॰ उ॰ तेकर्तरिसतिनत्वंस्यान्निर्वाणोऽग्निर्मुनिर्वाप्रत्तिंगनरइत्यर्थःवानेवर्नेरित्तुनिर्वातोवातः निनरांवानोगनइत्यर्थःगत्यर्थादितिकर्तरिक्तः दाप्दानिद्दानेईयादेशःस्याल्लिमि

१० तकारेदाप्लवने अस्यतुन व्याख्यानात्प्रयोगाभावाच्च घांतोयमादेशः किन्त्वयदितांन आदेशस्तदाविदत्तमित्यादौ आद्यंतवदेकस्मिन्निति न्यायेन नाम्यंतोपसर्ग

स्येतिदीर्घःस्यात् यदिदांतस्तदादस्तस्येतिनत्वंस्यात् यदिधांतस्तदान योर्इतितस्यधःस्यात् यांतेतुखसेचपाइत्यिषस्यतःदत्तःदत्तवान्पितस्तुदातःस्यात् नोवापक्षेदथादेशःना

म्यंतोपसर्गस्यदीर्घोदादेशेनकारेनाम्यंतस्योपसर्गस्य दीर्घःस्यात् दास्थाने आदेशोयस्तकारस्तस्मिन्परे धाञोहिः किनितेदधानेर्हिरादेशःस्यात् किनिनकारे ध्याख्याप्

उन्दीक्लेदने उत्तः उन्नः निर्वाणोमुनिर्वह्न्यादौ निर्वातस्तुगतेः निर्वेदौ इति दाइत्यस्य दत् किनितकारेनतुपितः दत्तः दत्तवान् स्वरांतोवास्वरा

न्ता दुपसर्गा दुत्तरस्य दाइत्यस्य तो वा किनितकारेनतुपितः प्रत्तः प्रदत्तः अवत्तः अवदत्तः नाम्यन्तोपसर्गस्य दीर्घो दादेशे नकारे सुत्तु अदायि

सूतमनीनम् धाञोहिः किनिते निहितः ध्याख्याप्मूर्छिमदिभ्योननत्वम् ध्यानः ख्यातः पूर्तः मूर्तः मत्तः यजइष्टम् उप्तम् ऊढः व्येञ्वीतः ह्वेञ्

हूतः उदितः उक्तः वसति क्षुधोरिट् क्लान्तः क्तवतूनाम् उषितः क्षुधितः सुप्तः ॥

॥ मूर्छिमदिभ्योननत्वम् आद्ययोर्यलसंयोगादे रितिनत्वेप्राप्ते पृइत्यस्यतुल्या

दिपुपाठात्ल्वादेरितिनत्वेप्राप्ते मूर्छिने मुर्छस्यलोपेकृतेनरइतिनत्वेप्राप्ते माघ्नेतेस्तुदस्तस्येतिनत्वेप्राप्ते निषेधः ध्यैचिंतायां ध्यातः ख्याप्रकथने ख्यातः पृपालनादौ

पारुरितुरुख्वोर्विहसेइतिदीर्घः किनइतीण्णपूर्तः मूर्छामोहसमुच्छ्राययोः रेफात्छ्वोरितिछलोपः आदीदितइतीण्णमूर्तः मदीहर्षे आदीदितइतीण्णमत्तः यजदेवपूजादौ

छ्शषेतिषत्वम्ष्टुत्वम् यजादित्वान् यजामितिसंप्रसारणम् इष्टम् टुवपबीजसंताने उप्तम् वहप्रापणे हो ढ इतिहस्यढः तथोर्धइतितस्यधः ष्टुत्वं ढिढ इतिढलोपः पूर्वदीर्घो ऊढम् व्येञ्

संवरणेवीतः ह्वेञ्स्पर्द्धायाम् हूतः वदव्यक्तायांवाचि वदनइतीट् उदितः वचपरिभाषणे उक्तः वसति क्षुधोरिट् क्लान्तःक्तवतूनां वसनिवासे यजामितिसंप्रसारणं घसादेरितिषः उषितः ॥ रा॰ १०

क्वचिद्वेटः क्तक्तवत्वोर्नेड्यस्य धातोः कुत्रचित्स्थलेविवक्षयेनेड्विहितस्तस्माद्धातोः परयोः क्तक्तवत्वोरिण्न स्यात् ओव्रश्चू छेदने ऊदितो वेति वेट्त्वादिण्न ग्रहामिति संप्रसारणम् स्वाचोदितइति नत्वं नत्वस्यासिद्धत्वात् झसे परतः छ्शेषेणि षत्वे प्राप्ते क्तक्तवत्वोरादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्य इति चोः कुरिति कुत्वम् स्कोरिति सलोपः वृक्णः वृक्णवान् अंचेः पूजायामिट् पूजार्थादंचतेः परयोः क्तक्तवत्वोरिट् स्यात् उदितः स्कोवेडिति अंचेः क्त्वायां वेट्कत्वात् क्वचिद्वेट् इति निषेधे प्राप्ते सति विधिः पूजार्थाचतेर्नेति नलोपो न अंचितः गतौ तु नोलोप इति नलोपः चोः कुरिति कः अक्तः जनीप्रादुर्भावे जनसनेत्यात्वम् जातः पचोवः पचतेः परस्य क्तक्तवत्वोस्तस्य वः स्यात् डुपचष् पाके वस्यासिद्धत्वात् चोः कुरिति कः पक्वः स्त्यायो मः स्त्यायतेः परस्य क्तक्तवत्वोस्तस्य मः स्यात् स्त्यैक्षये संध्यक्षराणामित्यात्वं स्त्यामः प्रस्त्यः संप्रसारणं

क्वचिद्वेटः क्तक्तवत्वोर्नेट्। व्रश्चू वृक्णः। अञ्चेः पूजायामिट्। अञ्चितः। जातः। पचो वः क्तक्तवत्वोस्तस्य। पक्वः। पक्ववान्। स्त्यायो मः। स्त्यामः। स्त्यामवान्। प्रस्त्यस्य सम्प्रसारणं वा किति। नस्य मो वा। प्रस्तीमः। प्रस्तीतः। शुषेः कः। शुष्कः। शुष्कवान्। स्फायस्फी निकिति। स्फीतः। घेट्। धीतम्। गीतम्। पीतम्। दोदितम्। सोसितम्। मितम्। सेटोः क्तक्तवत्वोर्णिलोपः। चोरितः। चोरितवान्। पाचितः। पाचितवान्। ऊर्णोतेर्नेट्। ऊर्णुतः॥ श्रीः॥ श्रीः॥

किति नस्य मो वा प्रपूर्वस्य स्त्यायतेः संप्रसारणं स्यात् किति क्तक्तवत्वोस्तस्य मश्च वा स्त्यै शब्दसंघातयोः प्रस्तीमः प्रस्तीतः शुषेः कः शुषेः परस्य क्तक्तवत्वोस्तस्य कः स्यात् शुष शोषणे शुष्कः स्फायः स्फी निकिति स्फायतेः स्फीरादेशः स्यात् नादौ किति स्फायी वृद्धौ स्फीतः घेट् पाने गै शब्दे पा पाने एषां त्रयाणामपि दृधेतीत्वं धीतं गीतं पीतं दो अवखंडने षोऽन्तकर्मणि मा माने माङ् माने मेङ् प्रणिदाने एषां स्यामीतीत्वं दितं सितं मितं सेटोः क्तक्तवत्वोर्णिलोपः णिप्रत्ययस्य लोपः स्यात् सेटोः क्तक्तवत्वोः परयोः चुर स्तेये क्तनइतीट् णिलोपे चोरितः डुपचष् पाके ण्यंतः क्तनइतीट् पाचितः ऊर्णोतेर्नेट् ऊर्णोतेरिण्न स्यात् नादौ किति ऊर्णुञ् आच्छादने ऊर्णुतः ऊर्णुतवान्॥

सि॰ चं॰
कृ॰ उ॰
७

द्रवस्य काठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं कितत्वस्य नत्वं च न तु स्पर्शे श्यैङः संप्रसारणं स्यात् द्रवरूपस्य द्रव्यस्य कठिनस्य भावः काठिन्यं तस्मिन् काठिन्ये ऽर्थे च पुनः द्रव्य
स्यास्पर्शे ऽर्थे श्यैङः परस्य कितत्वस्य नश्च स्यात् स्पर्शे ऽर्थे नत्वं न श्यैङः यतो शीनं घृतम् स्पर्शे किम् शीनं जलं काठिन्ये स्पर्शे च किम् संश्यानो वृश्चिकः शीतात्संकुचित इत्यर्थः यत्तसं
योगादेरिति नत्वम् अंचेः कितत्वस्य नत्वं न त्वपादाने अंचु गतिपूजनयोः नत्वस्यासिद्धत्वात् चोः कुरिति कः उदितः स्त्रोवेडिति स्त्रायां वेट्कत्वात् क्वचिद् इट् इति घनसमक्तः अ
नपादाने किम् उदक्तमुदकं कूपात् दिवो ऽविजिगीषायाम् दिवः क्तक्तवत्वोः त्वस्य नः स्यात् विजेतुमिच्छा विजिगीषा तस्यां वाच्यायां नत्वं न दिवु क्रीडाविजिगीषादो ड्डितिङ्से
इति वस्य ऊः द्यूनः क्षीण इत्यर्थः आद्यूनः स्यादौदरिक इति हेमः विजिगीषायां तु द्यूतं द्यूने विजिगीषयाः स्ताः पात्यंते इति अनुपसर्गात् फुल्लक्षीवकृशोल्लाघानिपात्यंते त्रिफला

द्रवस्य काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं क्तितत्वस्य नत्वं च न तु स्पर्शे शीनं घृतम् स्पर्शे तु शीतं जलम् अंचेः किनत्वस्य नत्वं न त्वपादाने स
मक्तः अन्यत्रोदक्तमुदकं कूपात् दिवो ऽविजिगीषायाम् आद्यूनः विजिगीषायां तु द्यूतम् अनुपसर्गात् फुल्लक्षीवकृशोल्लाघा निपात्यन्ते फुल्लः फुल्लवान्
क्षीव मदे क्षीवो मत्तः कृशस्तनुः लाघृ शोषणसामर्थ्ययोः उल्लाघो नीरोगः उपसर्गात्तु चरफलोरत उतिकिति प्रफुल्लितः प्रक्षीवितः प्रकृशितः प्रोल्लाघितः उ
त्फुल्लसंफुल्लौ च वित्तो भोग प्रत्यययोः वित्तं धनम् वित्तः पुरुषः अन्यत्र विन्नः भित्तं शकलम् भिन्नमन्यत्र ॥ विशरणे क्तक्तवत्वोः तस्य तत्वं निपात्यते चर
फलोरत उतिकिति एनयोरस्य उत्स्यात् तादौ किति आदीदित इती एन फुल्लः क्षीव मदे कृश तनूकरणे लाघृ शक्तौ एषां त्रयाणां क्तस्य नत्वं लोपो निपात्यते तलोपस्यासिद्धत्वात्
प्राप्तस्येटो ऽभावश्च निपात्यते नेन तु फुल्ल विकसने लाघृ शक्तौ आभ्यां पचादेरच् प्रत्यये इतराभ्यां नाम्युपधात्क इति कप्रत्यये फुल्लोल्लाघक्षीवकृशाः शब्दाः सिद्ध्यन्ति कि
मनेन उच्यते फुल्लतादिनिवृत्त्यर्थमिदं सूत्रम् उत्फुल्लसंफुल्लौ च उत्सं पूर्वकावप्येतौ निपात्येते कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति रघुः आह फुल्ल विकसने अस्मात् प
चादेरित्यप्रत्यये प्रफुल्ल इति यद्यपि प्रफुल्लवदुत्फुल्लसंफुल्लावपि पचादेरित्यनेन सिद्ध्यतस्तथापि उत्फुल्लतः संफुल्लत इति प्रयोगनिवृत्त्यर्थम् सूत्रे वित्तो भोगप्रत्यययोः भुज्य

राम
११

भोगस्तस्मिन् भोगेऽर्थे प्रतीतः प्रसिद्धः तस्मिन्प्रतीतेऽर्थे च विदः इतेः परस्य नत्वस्य नत्वाभावो निपात्यते दस्य स्येति नत्वे प्राप्ते निषेधः विद्ऌ लाभे वित्तः विद्यतेर्विन्नः विन्नेर्विन्नः विन्नश्च
वेत्तेर्विदितः विद सत्तायां विद विचारणे दैवादिकरौधादिकावेतावनिटौ विद ज्ञाने विद्ऌ लाभे आदादिकतौदादिकावेतौ सेटौ विद्ऌ लाभे अस्य तु गमहनविदेति वा सुप्रस्य ये वेट्क
त्वान्न इट् इतीण भिन्नं शकलं भिदेः परस्य नत्वस्य नत्वाभावो निपात्यते शकलेऽर्थे दस्य स्येति प्राप्ते निषेधः भिन्नं शकलं खण्डे वेत्यमरः अन्यत्र भिन्नम् विदीर्णमित्यर्थः॥ ॥ ऋणमा
धमर्ण्ये ऋणगतो अस्मात् नत्वस्य नत्वं निपात्यते अधमं दुःखप्रदमृणमस्यास्तीति अधमर्णस्तस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्येऽर्थे अधमर्णो ग्राहक इत्यमरः क्षुब्ध १ स्वान्त २ ध्वान्त ३
लग्न ४ म्लिष्ट ५ विरिब्ध ६ फाण्ट ७ बाढानि ८ मन्थ १ मनः २ तमः ३ सक्ता ४ विस्पष्ट ५ स्वर ६ अनायास ७ भृशेषु ८ क्षुब्धादीन्यष्टौ निपात्यन्ते मन्थादिष्वर्थेषु क्षुभ संचलने न तथोर्ध इति नस्य

ऋणमाधमर्ण्येऽन्यत्र ऋतम् क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु क्षुब्धो मन्थः स्वन श
ब्दे स्वान्तं मनः ध्वान्तं तमः लगे सङ्गे लग्नं सक्तम् म्लिष्टमविस्पष्टम् रेभृ शब्दे विरिब्धः स्वरः फाण्टमनायाससाध्यः कषायविशेषः वाह प्रयत्ने बाढम्
भृशम् अन्यत्र तु क्षुभितम् स्वनितम् ध्वनितम् धृष विशस्ता अविनये धृष्टः विशस्तः अन्यत्र धर्षितः विशसितः दृढः स्थूलबलयोः दृह दृहि वृद्धौ॥

धः इत्येव जश्त्विति भस्य बः क्षुब्धः स्वन ध्वन शब्दे अमान्तस्येति दीर्घः स्वान्तम् ध्वान्तम् लगे गेनत्वमपि निपात्यते लग्नम् म्लेच्छ अव्यक्ते शब्दे रेभृ शब्दे अनयोरुपधाया इत्वमपि निपा
त्यते क्षुशेषेति पत्वं ष्टुत्वं म्लिष्टं तथोर्ध इति धः झषेति भस्य बः विरिब्धः फण गतौ अमान्तस्येति दीर्घः ष्टुत्वम् णस्यानुस्वारो निपात्यते फाण्टं वाह प्रयत्ने होढ इति ढः त
थोर्ध इति नस्य धः ष्टुत्वं ढि ढ इति ढलोपे बाढं कथं तर्हि सुब्धो राजेति आगमजमनित्यमित्यागमस्यानित्यत्वादिडभावः धृष विशस्ता अविनये अविनयेऽर्थे एतावनिटौ स्तः ञि
धृषा प्रागल्भ्ये अस्य आदितश्चेति पिनषेधे सिद्धे शसु हिंसायामस्य उदितः क्त्वो वेडिति क्त्वायां वेट्कत्वात्क चिट्टेइतीण निषेधे सिद्धे अनयोरविनय एवानिट्त्वं नान्यत्रेति निय
मार्थं सूत्रं विनये तु धर्षितः शीङः स्विदिमिदी तिक्त्वा कित्वाद्गुणः दृढः स्थूलबलयोः स्थूलो मांसलस्तस्मिन्नर्थे बलमस्यास्तीति बलः अर्शआदिकौ चेत्सः तस्मिन्बलवत्यर्थे च

सि॰ चं॰ कृ॰ उ॰ १२

आभ्यां परस्य क्तप्रत्ययस्य ढत्वं धातोरिड्भावः हलोपौ च इदितो नलोपश्च निपात्यते दृढः ननु होढ इति ढत्वेन थोर्ध इति धत्वे ष्टुत्वे च ढि ढ इति ढलोपे कृते दृढेति रूपसिद्धौ स
त्यां किमर्थं ढत्वहलोपयोर्निपातनम् उच्यते तेन यदि हि सति ढलोपस्यासिद्धत्वेन अलघुत्वात् द्रढिमेत्यत्र र ऋ इमनीति रभावो न स्यात् परिवृढ्यगतत्र परिवृढौ स्य
स्यान्त्वा मधातोः क्तप्रत्यये क्तापि लघुपूर्वो स्वरस्य अरिति अरयादेशो न स्याच्च अतोऽसिद्धत्वनिवृत्तये निपातनं प्रभौ परिवृढः प्रभौ वाच्ये वृह वृहि वृद्धौ आभ्यां परस्य क्त
स्य ढत्वं धातोरिड्भावः हलोपौ च इदितो नलोपश्च निपात्यते प्रभुः परिवृढोऽधिपः परस्य मरः अत्रापि ढत्वहलोपयोर्निपातनं वृद्धिमापरिवृढय्ये स्यादिसिद्ध्यर्थं प्राग्वदे
व कृच्छ्र गहनयोः कष एतयोरर्थयोः कषः परस्य क्तस्य णनस्यात्स्यात् कष्टं कृच्छ्रमाभीलमित्यमरः अत्र कष्टशब्देन दुःखं तत्कारणं च गृह्यते कष हिंसायां कष्टो मोहः दुः
खहेतुरित्यर्थः कष्टं शास्त्रं दुरवगाहमित्यर्थः घुषेरविशब्दने विशब्दनं प्रतिज्ञानं न विशब्दनम् अविशब्दनं तस्मिन्नर्थे घुषेः परस्य क्तस्य इण् न स्यात् घुषिर् शब्दार्थे भ्वा

दृंहितो दृंहितोऽन्यः वृह वृहि वृद्धौ प्रभौ परिवृढः परिवृंहितः परिवृंहितोऽन्यः कृच्छ्र गहनयोः कषः कष्टम् कष्टो मोहः कष्टं शास्त्रम् कषितमन्यत्।
घुषेरविशब्दने घुष्टा रज्जुः अविशब्दने किम् घुषितम् वाक्यम् अभ्यर्ण माविदूर्ये अभ्यर्दितमन्यत् क्षीरहविषोः पाके शृतम् अन्यत्र श्राणम्।

दिः घुषिर् अविशब्दने चुरादिः द्वयोरप्यत्र ग्रहणं न तु विशब्दनेऽर्थे इण्निषेधाभावात् ञिप्रत्यये उपधागुणे कृते सेटोः क्त क्तवत्वोरिति ञिलोपे घो ॥ घुषितम्वा
षितमित्यपि स्यात् अत्राहुः विशब्दनेऽर्थे चुरादेर्णिजेवानित्य इति अभ्यर्णमाविदूर्ये अर्देः परस्य क्तस्य इण्न स्यात् आविदूर्येऽर्थे विशेषेण दूरं विदूरं न विदूरमवि
दूरम् अविदूरस्य भावः आविदूर्यं ष्यञः अर्द गतौ याचने च दन्तस्येति तदयोर्नत्वं अभ्यर्णम् नातिदूरमासन्नं वा क्षीरहविषोः पाके शृतं श्रायतेः शृ आदेशो निपात्यते
श्रा पाके अदादौ चुरादौ च घटादावपि पठ्यते श्रे पाके भ्वादौ अस्यापि कृतात्वस्येह ग्रहणं निपातनसामर्थ्यात् लक्षणप्रतिपदोक्तयोरिति परिभाषा नाश्रीयते शृतं राम
क्षीरं स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः क्षीरहविर्भ्यामन्यत्र श्राणं यत्तसंयोगादेरिति नत्वं श्रपितं शाकादि मितां ह्रस्व इति ह्रस्वः ॥ ठ् ॥ ठ् ॥ ठ् ॥ १२

दान्तादयो वा निपात्यन्ते दांतादयः सप्त त्रिप्रत्यये क्ते सति क्तप्रत्ययांता वा निपात्यन्ते शमु दमु उपशमे जनीजॄषिनिमित्त्वाद् उपधाया ह्रस्वः एषां संज्ञानां निपातनादिड्भावः अैरिति
णिलोपश्च अमांतस्येति दीर्घः दांतः शांतः पूरी आप्यायने दिवादौ चुरादौ च रइति नस्य नत्वं पूर्णः दसु उपक्षये स्पश बाधने छद अपवारणे एषां त्रयाणां इडभावो निपात्य
ते दस्तः स्पश इति षत्वं ष्टुत्वं स्पष्टः दस्तस्येति तदयोर्नत्वं छन्नः ज्ञप ज्ञानज्ञापनयोः घुणादिर्मित्त्वाद् उपधाया ह्रस्वः ज्ञप्तः पक्षे क्तन इनीट्से टोः क्तक्तवत्वोरिति णिलोपः शमित इ
त्यादि रुषादिभ्यः पंचभ्यः क्तस्येडागमो वा निपात्यते रुष रोषे रिषुसहेति वेट्कत्वात् क्वचिद्दृढ इति निषेधे प्राप्ते विकल्पो निपात्यते रुष्टः रुषितः अम गत्यादिषु अम रोगे इति
चौरादिकस्तु न गृह्यते एकस्वरादित्यधिकारात् अमांतस्येति दीर्घः आंतः अमितः ञित्वरा संभ्रमे आदीदित इति निषेधे प्राप्ते इड्विकल्पो निपात्यते ज्वरत्वरेत्यूठ् इति

दान्तादयो वा निपात्यन्ते दान्तः । दमितः । शान्तः । शमितः । पूर्णः । पूरितः । दसु उपक्षये दस्तः । दासितः । स्पष्टः । स्पाशितः । छन्नः । छादितः । ज्ञप्तः । ज्ञपितः । रुष्टः । रुषि
तः । आन्तः । अमितः । पूर्णः । त्वरितः । संघुष्टः । संघुषितः । आस्वान्तः । आस्वनितः । हृष तुष्टौ । हृष्टम् । हृषितम् अपचायितः । अपचितः । प्यानः । पीनः । ल्हादी सु
खे ल्हादेर्ह्रस्वः क्तिनि ते प्रह्लन्नः ॥

तस्य नत्वं तूर्णः त्वरितः घुषिर् अविशब्दने घुषेः अविशब्दने इति विशब्दने ः यैनि स्वमिट् प्राप्ते विकल्पो निपात्यते सं
घुष्टः संघुषितः स्वन शब्दे अमांतस्येति दीर्घः आस्वान्तः आस्वनितः आङ्पूर्वस्य स्वने र्मनोभिधानेऽयं विकल्पः परत्वात् आस्वांतं आस्वनितं वा मनः हृषु अलीके अ
स्यादित इति क्त्वायां वेट्कत्वात् क्वचिद्दृढ इती ण्निषेधे प्राप्ते हृष तुष्टौ सेट्त्वादस्य नित्यमिति प्राप्ते विकल्पो निपात्यते उभयोरिह ग्रहणं हृष्टं हृषितं लोम हृषितो मैत्रः विस्मितः
प्रतिहतो वेत्यर्थः चायृ पूजानिशामनयोः अस्य च आदेशो निपात्यते वा क्ते अपचितः अपचायितः ओप्यायी वृद्धौ अस्य पी नि निपात्यते वा क्ते आदीदित इती ण्निषेधः यव
योर्वसे इति यत इति वा य लोपः ल्वाद्योदित इति नत्वं प्यानः पीनः स्वेदः स्वांगे नित्यं पीनं मुखं सोपसर्गस्य न प्रप्यानः आङ्पूर्वस्य तु स्यादेव आपीनः कूपः आपीनमूधः
ल्हादेर्ह्रस्वः क्तिनि ते ल्हादी सुखे वा आ— दी दित इतीण्न द्दस्येति नत्वं प्रह्लन्नः ॥ ६ ॥ ६ ॥ श्री ॥ ६ ॥ ६ ॥ ६ ॥

सि.चं. कृ.उ. १३

निनदीभ्यां स्नातेः सत्यपः कौशले आभ्यां स्नातेः सत्यपः स्यात् कौशल्ये गम्ये शास्त्रेषु निस्नातः कुशलः नद्यां स्नातो नदीस्नातः नदीस्नाने कुशलः नाम्नि चेति दः स्थैर्यगतिभक्ष
णार्थेभ्यो ऽधिकरणे ऽपि क्तः एभ्यः आधारेऽर्थे क्तः स्यात् अपिशब्देन यथाप्राप्तं मुकुंदस्यासितमिदमिदं यातं रमापतेः भुक्तमेतदनंतस्येसू चुर्गोप्योऽदिदस्मवः इदमिच्छंनिदि
दसंनेदिदस्मेतेदनिदिदः स्यवोगोप्यदस्सूचुः इतीनिदिम् मुकुंदस्य रुसस्येदमासितं आसनेऽस्मिन्निति स्यासितमासनं रमापतेर्विस्मोरिदं यातं यायतेऽस्मिन्निति यातं मार्गः अ
नन्तस्य हरेरेनद्भुक्तम् भुज्यतेऽस्मिन्निति भुक्तम् भोजनम् मुकुन्दस्येत्यादित्रिषु वर्तमानाधारार्थक्तस्य योगे इति कर्तरि षष्ठी पक्षे आसेरकर्मकत्वात् कर्तरि भावे च क्तः आसि
त आसितं तेन गत्यर्थेभ्यः कर्तरि कर्मणि च क्तः ग्रामं यातः सः ग्रामो यातस्तेन भुजेः कर्मणि क्तः तेन भुक्तमन्नम् कथं तर्हि भुक्ता ब्राह्मणाः पीता गाव इत्युच्यते भुक्तमस्ये

निनदीभ्यां स्नातेस्सत्यपः कौशले निस्नातः नदीस्नातः स्थैर्यगतिभक्षणार्थेभ्योऽधिकरणेऽपि क्तः तथा च मुकुन्दस्यासितमिदमिदं यातं रमाप
तेः भुक्तमेतदनन्तस्येसू चुर्गोप्योऽदिदस्मवः ॥ जीर्यतेरतृञ्ज स्याजरनौ क्वसुकानौ णवेवत् धातोरतीते काले एतौ भवतः तौ च यथाक्रमेण वेवत्
द्वित्वम् संयोगान्तस्य लोपः चक्रुवान्वसोर्वउः ॥

॥ पामिति अस्त्यर्थे अः जीर्यतेरतृञ्जृष्वयोहानौ अस्माद्भूतेऽर्थे अतृप्रत्ययः स्यात् अतृप्रत्ययमाहुरन्ये
दित्वात् ङितो नुमितिनुम् ऋतो गुणे कृते नामत्वात् स्यादौ संयोगान्तस्येति नलोपः नलोपस्यासिद्धत्वान्नोपधाया इति दीर्घो भवति नाजरन् स्त्री जरती क्त क्तवत्वोः
जीर्णवान् क्वसुकानौ णवेवत् भूतसामान्ये क्वसुकानौ प्रत्ययावाह क्वसोः ककारो गुणनिषेधार्थः उकारस्तु पुंसि च ङितो नुमिति नुमर्थः स्त्रियां तु ङितृ इतीवर्थः
कानप्रत्ययस्य कित्वकरणमकित्त्रिणाणइत्यत्र ऋसंयोगादित्यकित्वाद्गुणस्य निषेधार्थम् णवादिपरे यत्कार्यं द्वित्वादि तत्सर्वमनयोः परयोरपि स्यात् इत्येकं करणे द्वित्वा राम
दि चक्रुवसि ति जातं नामसंज्ञायाम् स्यादिः नुमम्महतइति पुंसि पञ्चसु दीर्घः क्लीवे तु शौ दीर्घः संयोगान्तस्येति सलोपः चक्रुवान् चक्रुवांसौ चक्रुवांसः शसादौ तु वसो १३

चक्षुषः चक्षुषा वसोः संप्रसारणे इति सस्य दत्वं चकृवद्भ्यां चकृवद्भिरित्यादि क्रियां तु ष्ठिनद्दतौ पूर्ववसोर्वं उ रिति त्वे षत्वे च चक्षुषी क्लीबे तु च कृवत् चकृवांसि भज सेवायां बभंज्वा
न् बभंजुषी स्त्री जागृ निद्राक्षये जजागृवान् जजागृुषी स्त्री द्वित्वे सत्येकस्वरादादंताद्द घसेश्च वसोरिट् नान्यस्मात् द्वित्वे कृते सति एकस्वराद्दान्तोरादंताद्दातोः घसेश्च पर
स्य वसोरिट् स्यात् नान्येभ्यः परस्य वसोः कृते पि द्वित्वे एकस्वरा ये धातवोऽवशिष्यन्ते तेभ्य इत्यर्थः हृवयोरिति निषेधं बाधित्वा क्रादेरिति नियमात् सर्वत्र प्राप्तस्येटो नियमो य
म् गम हन विद विशां वा एभ्यः परस्य वसुप्रत्ययस्येड्वा स्यात् विशिना साहचर्यात् विद्लृ लाभे इत्यस्य ग्रहणं भूसत्तायां बभूवान् बभूवांसौ शसादौ तु वसोर्षं उरित्युत्वे कृते भुवो
वुगिति वुक् बभूवुषः बभूवुषा बभूवद्भ्यामित्यादि बभूवुषी स्त्री अद भक्षणे द्वित्व हसादि शेषपूर्वदीर्घ सवर्णदीर्घेषु कृतेषु कृते द्वित्वे प्येकस्वर एवेति इट् च भवति आदिवा

चक्षुषः चक्षुषा वसोः संप्रसारणे चकृवद्भ्याम् चकृवान् बभञ्ज्वान् जजागृवान् द्वित्वे सत्येकस्वरादादंताद्दसेश्च वसोरिट् नान्यस्मात् गम हन विद विश
शां वा बभूवान् भुवो वुक् बभूवुषः बभूवुषा अद भक्षणे आदिवान् ऋ गतौ आरिवान् डुदाञ् दाने ददिवान् दद्रिद्रिवान् वस्योत्वं इड्भावः
॥ आहुषः जघ्निवान् जघसिवान् जग्मिवान् ॥

न् वस्योत्वे कृते इड्भावो भवति निमित्ताभावे नैमित्तिकस्याप्यभाव इत्युक्तत्वात् आहुषी स्त्री ऋ गतौ गुणो र्तीति
गुणे कृते द्वित्वादिषु कृतेषु अप्येकस्वरः इट् च भवति आरिवान् आरुषी स्त्री डुदाञ् दाने कृते द्वित्वे नायमेकस्वरः अनेकस्वरत्वादिण्निषेधे प्राप्ते सूत्रे आदंतग्रहणादि
ट् भवति आतो लोप इटि चेत्याल्लोपः ददिवान् ददुषी स्त्री दरिद्रा दुर्गतौ आदंतग्रहणादिट् आतो लोप इत्याल्लोपः दरिद्रिवान् दरिद्रुषी स्त्री अद भक्षणे सिसंयोगादेरदेर्घ
स्लृ इति लिटि वा घस्लृ आदेशः द्वित्वे कृते नायमेकस्वरः सूत्रे घसेर्ग्रहणादिट् उपधालोपाद्यागे वहित्वे प्रश्वादमांस्वरे इत्युपधालोपः घसादेः ष इति षत्वम् खरि
च चपा इति घस्य कः जक्षिवान् जक्षुषी स्त्री गम्लृ गतौ गमादीनां च तृणोमि इवा द्वित्वादि गमामित्युपधालोपः जगामेति जग्मिवान् इड्भावे मो नो धातोरिति मस्य नः

सि॰ कौ॰ जगन्वान् जग्मुषी स्त्री श्रेयांसि सर्वाण्यधिजग्मुषस्ते इति रघुः हन हिंसागत्योः द्वित्वादि गमामिसुप धालोपः हनो घ्नेर इति हस्य घः जघ्निवान् इड भावे पूर्वाद्धंने रेनिप
कृ॰ उ॰ रस्य हस्य घः जघन्वान् जघ्नुषी स्त्री विद्ल लाभे विविदिवान् इड ग भावे विविद्वान् विविदुषी स्त्री विश प्रवेशने विविशिवान विविश्वान् विविशुषी स्त्री इण गतौ द्वित्वं ह्र
१४ णः परस्य वसो रिट् निपात्यते द्विवेसस्ये कस्वराभावाद्विधिरयम् इणः कितिणा दावितिपूर्वदीर्घः सवर्णदीर्घ इति सूत्रबाधितानित्यत्वादिणः क्रुति स्वरे इति यः वसे
रिडागम सकित स्वरस्य परत्व सत्वात् ईयिवान् ईयुषी स्त्री षद्ल विशरणादौ द्वित्वादि लोपः पचामित्येत्व पूर्वलोपो इट् सेदिवान् सेदुषी स्त्री निषेदुषी मासन वंघधीरद
तिरघुः वस निवासे द्वित्वादिण वादौ पूर्वस्येति पूर्वस्य संप्रसारणं यजामिति परस्य संप्रसारणं सवर्णदीर्घ इति दीर्घ कृते एकस्वरत्वादिट् घसादेरिति षः ऊषिवान् ऊषुषी

जगन्वान् जग्मुषः जघ्निवान् जघन्वान् जघ्नुषः विविदिवान् विविद्वान् विविदुषः विविशिवान् विविश्वान् ददृशिवान् ददृश्वान् ईयिवान् से-
दिवान् ऊषिवान् शुश्रुवान् शुश्रुवुषः शतृ शानौ तिप्वत् क्रियायामक्रियायां गम्यमानायां धातोः शशतृ शानौ भवतः सो चतिप्वत् पचन्ना
स्ते पठन्स्ति घुनिगायन्ना गच्छतिमुगानेतः अकारस्यानेमुगागमस्यात् पचमानः पठति मन्वानः कुर्वाणः दादेरिः पीयमानः सो मो भवता
दीयमानाः गोः आसेरानईः आसेः परस्यान ईस्यात् आसीनः ॥ स्त्री भधूपुषस्ताम भवज्जन सेति माघः श्रु श्रवणे शुश्रुवान् शुश्रुषी स्त्री शतृ शा
नौतिप्वत् क्रियायां शतृ शानप्रत्ययावाह उभयोः शित्वाच्चतुर्वत्कार्यं ऋदित्वात् पुंसि त्रिनोनुमिति नुम् स्त्रियां तुष्टितृ इतो पूष चनीति अपपचन्विक्लित्यनुवृत्तेव
र्तमानव्यापाराश्रय श्वेत्रः मुगानेतः अदंतस्य मुगागमः स्यादाने परे पचते इति पचमानः मनुते इति मन्वानः कुरुते इति कुर्वाणः उभयत्र उपृङित्सदुरित्यन उतृ पी
ङ् पाने दीङ् क्षये दैवादिकाविमौ अथवा पापाने डुदाञ् दाने आभ्यां कर्मणि शानप्रत्यये कृते यक् चतुर्थिवितियक् दादेरिरितो लंये इति दीर्घः दीयमानः पीयमा राम
नः आसेरानईः आनस्य आतः ईत्वं आस उपवेशने आस्ते इति आसीनः ॥ ॥ श्री ॥ श्री ई ॥ ई ॥ ई ॥ ई ॥ ई ॥ १४

स्त्रियांतु तुदती तुदंतौ क्लीबे तु तुदत् तुदती तुदंती तुदंति अप्ययोरान्नित्यस
वादेपोः शतुः भवर्णात्परस्य शतृप्रत्ययस्य नुम्वा स्यात् ईपि इकारे च तुदती नितुदन् तुदंतौ तुदंतः
भवन् भवंतौ स्त्रियां तु भवंती क्लीबे तु भवत् भवती भवंति दीव्यतीति [illegible] इति दीर्घः
म् अप्य प्रत्ययाभ्यां परस्य शतुर्नित्यं नुम् स्यात् ईपि ईकारे भवतीति पुंसि
दीव्यन् दीव्यन्तौ स्त्रियां तु दीव्यंती क्लीबे तु दीव्यत् दीव्यंती दीव्यंति ददातीति दधातीति च ह्वादेर्द्विश्वेति द्वित्वादि दादेरिसालोपः ददत्सः ददती ददंती स्त्री ददत् द
दतौ ददंति ददंति दधत्सः दधती दधंतौ स्त्री दधत् दधती दधंती दधति विदेर्वा वसुः वसोरुदित्करणं वसोर्वे उरित्सुत्वार्थम् नुम् तु स्यान्निवले नैव सिद्धः वेत्तीति अ
पिता देर्ङीः टिनिवसुशत्रोर्ङीः वंडि त्वाद्गुणो न विद्वान् विदन् विदुषी स्त्री माङ्याक्रोशे माङि उपपदे निंदायामर्थे धातोः शतृप्रत्ययः स्यात् माङि सिद्धे वेति लुङि प्राप्ते लङ्ङ्वि

वादेपोश्शतुः भवर्णात्परस्य शतुर्वा नुमो कारे ईपि च परे तुदत् तुदती तुदन्ती कुले स्त्री वा अप्ययोरान्नित्यम् अप्प्रत्ययश्यप्रत्ययसंबंधिनोऽवर्णात्स
रस्य शतुर्नुम्नित्यमीकारे ईपि च भवत् भवन्ती दीव्यत् दीव्यन्ती दीव्यन्त्यौ गंगायमुने [illegible]नानां जक्षादीनां त्वपरस्य शतुर्नुम्न शौ वा ददत् दधत् विदेर्वा
वसुः वेत्तेः परस्य शतुर्वा वसुरादेशः विद्वान् विदन् माङ्याक्रोशे मा जीवन् लक्षणहेत्वोः क्रियायाः शयाना भुञ्जते यवनाः अर्ज्ज प्रतियत्ने चुरादिः अ
र्ज्जयन्वसति भविष्यति स्यप् शतृशानपरः हन्तृ तस्य पः करिष्यन् करिष्यमाणः ताच्छील्यवयोवचनशक्तिषु चानश् भोगं भुञ्जानः कवचं बिभ्राणः ॥ शत्रून्निघ्नानः ॥

चि जीव प्राणधारणे मा जीवन् लक्षणहेत्वोः क्रियायाः क्रियायाः चिह्ने हेतौ चार्थे वर्तमानाद्धातोः शतृशानौ स्तः ॥ अत्र हेतुशब्देन फलं कारणं चोच्यते
शेरते इति शीङो गुण इति गुणः शयानाः भुंजते यवनाः यवनकर्तृकभोजनस्य शयनं लक्षणं अर्जप्रतियत्ने चुरादिः अर्जयतीति अर्जयन् वसति अर्जनार्थं वा सदित्यर्थः भ
विष्यति स्य पृ शतृशानपरः भविष्यत्स्यवंधाद्धातोः परयोः स्यपो स्थाने शतृशानौ वा स्तः करिष्यतीति करिष्यन् सिसते तेति करिष्यते इति करिष्यमाणः ताच्छील्यवयो
वचनशक्तिषु चानश् ताच्छील्यं तत्स्वभावता वयो यौवनादिः शक्तिः सामर्थ्यं एषु द्योत्येषु धातोः कर्तरि आनश् स्यात् आनश्प्रत्ययमाह शिलाच्चतुर्वत् कार्य्यं परस्मैपदि
भ्यो प्यानश् स्यात् एतदर्थमिदं भुनक्तीति रुधादित्वात् भुंजानः भस्य लोपः भुंजानः बिभर्तीति बिभ्राणः हंतीति गमहन इत्युपधालोपः हनो घ्न इति हस्य घः निघ्नानः ॥

इङ् धार्य्योः रुच्छ्रिणि कर्त्तरि शत् अकृच्छ्रः सुखसाध्यो धात्वर्थः आभ्यां शतृप्रत्ययः स्यात् अकृच्छ्रिणि कर्त्तरि पुनः शतृप्रत्ययमाह इङ्ः आत्मनेपदित्वात् शतृप्रत्ययो न सिद्ध्यति धारयतेरपि आत्मगामिनि क्रियाफले शतृप्रत्ययो न सिध्यति तदर्थो यमारंभः इङ् अध्ययने अधीत इति अदादित्वात् रूपे लुक् नु धातोरिति अधीयन् धारयते इति अप्रधारयन् द्विषः शत्रौ द्विष अप्रीतौ अस्मात् शत्रौ वाच्ये शतृप्रत्ययः स्यात् द्वेष्टीति द्विषन् अर्ह पूजायां अर्ह पूजायाम् अस्मात् शतृप्रत्ययः स्यात् पूजायामर्थे अर्हतीति अर्हन् शीलेन प्रत्ययमाह नकारः स्वरार्थः इतः परं वक्ष्यमाणाः प्रत्ययाः ताच्छील्यादिषु बोध्याः करोतीत्येवं शीलः कर्त्ता कटम् इष्णुच् शीले धातोरेते प्रत्ययाः शीले ऽर्थे इष्णुच् प्रत्ययानाह ष्णुच् ककारो गुणनिषेधार्थः अलंकरोतीत्येवं शीलो ऽलंकरिष्णुः निराकरोतीत्येवंशीलो निराकरिष्णुः जनी प्रा

इङ् धार्य्योः रुच्छ्रिणि कर्त्तरि शतृ इङ् अध्ययने अधीयन् धृञ् धारणे ऽप्यन्तः धारयन् द्विष अप्रीतौ द्विषः शत्रौ द्वेष्टीति द्विषन् अर्ह पूजायाम् अर्हन् शीले तृन् करं कर्त्ता इष्णुच् हर्त्ता इष्णुच् शीले अलंकरिष्णुः निराकरिष्णुः जनी प्रजनिष्णुः जिभुवोर्न्नङ् गुणो ऽस्त्रौ जि जये जिष्णुः भूष्णुः ग्लास्नुः त्रस्नुः त्रेङ् त्रस्नुः गृध्नुः त्रि धृषा धृष्णुः क्षिपः क्षिप्नुः षाकोकणः शीलार्थे षाक उ उकण् प्रत्यया भवन्ति जल्पाकः भिक्ष याञ्चायाम् भिक्षाकः कुट्ट च्छेदे कुट्टाकः दुष्टः लुण्ठ चौर्ये लुण्ठाकः वृङ् संभक्तौ वराकः॥ जनी प्रजायते इत्येवं शीलः प्रजनिष्णुः जिभुवोर्नैङ् गुणो ऽस्त्रौ जयतीत्येवं शीलो जिष्णुः भवतीत्येवं शीलो भूष्णुः ग्लायतीत्येवं शीलो ग्लास्नुः त्रसी उद्वेगे त्रस्नुः ह्रस्वो रितीयन त्रस्नुः गृधु अभिकांक्षायां गृध्नुः ञि धृषा प्रागल्भ्ये धृष्णुः क्षिप प्रेरणे क्षिप्नुः षाकोकणः षाक उ उकण् प्रत्यया नाह षाकस्य षः क्षित् इतीवर्थः कणो णो वृद्ध्यर्थः जल्पतीत्येवं शीलः जल्पन्यकायां वाचि जल्पाकः भिक्ष भिक्षायां भिक्षाकः कुट्ट छेदने लुठ स्तेये चौरादिकाविमौ कुट्टाकः लुंठाकः वृञ् वरणे वृङ् संभक्तौ वराकः सांता ऽऽशंस भिक्षिभ्यः उः सः प्रत्ययः न द इतो धातुः सान्त उच्यते आङः शंसु इच्छायाम् अयमेव गृह्यते न तु शंसु स्तुतौ आङा सह निर्देशात् भिक्ष भिक्षायां॥

भिक्षुः आशंसुः कर्तुमिच्छुरिति चिकीर्षतेरनिति सप्रसये हित्वाद्यः सेट्नीत्वं से दीर्घ इति क्रनोदीर्घः ऋत इद्धातोरितीर् ध्वोर्विहसे इति दीर्घः षत्वं चिकीर्षति जानंयन इस ल्लोपः चिकी
र्षुः लषकान्तौ उकण् लाषुकः पत्लृगतौ ने पातुकः पद गतौ पादुकः स्था गतिनिवृत्तौ आतो युगिति युक् स्थायुकः भूसत्तायां भावुकः वृषु सेचने उपधायाल घोरिति गुणः वर्षुकः
हन हिंसागत्योः हनो घदिति घत् घातुकः कमुकान्तौ कामुकः गम्लृगतौ गामुकः शृहिंसायां शारुकः शृवंदोरारुः शृहिंसायां वदि अभिवादनस्तुत्योः आभ्यामारुः आ
रुप्रत्ययमाह शरारुः वंदारुः शरारु घातुको हिंस्रो वंदारुरभिवादक इत्यमरः स्पृहि गृहि पति दयि निद्रा तन्द्रा श्रद्धा शीङ्भ्य आलुः आलुप्रत्ययमाह स्पृह ईप्सायां
गृह ग्रहणे पत गतौ एते त्रय चुरादावदन्ताः अल्लोपस्य स्थानिवत्त्वाच्चोपधाया गुणवृद्धी ने इति णिलोपेन नत्वि डामंते निनिषेधात् अयेर्गुणे कृते स्पृहयालुर्गृहयालुः पतया

भिक्षुः शसिवाक्यप्रबन्धे वृतिनोनुम् आशंसुः चिकर्षुः लषकान्तौ लाषुकः पत्लृपतने पातुकः आतो युक् स्थायुकः भावुकः वृषु सेचने वर्षुकः घातु
कः कामुकः शृवंदोरारुः शृहिंसायाम् शरारुः वदि वन्दारुः स्पृहि गृहि पति दयि निद्रा तन्द्रा श्रद्धा शीङ्भ्य आलुः स्पृहयालुः गृह ग्रहणे चु
रादिः गृहयालुः पतयालुः दय दाने दयालुः द्रा कुत्सायाम् निद्रालुः न द्रेनानालम् तन्द्रालुः श्रद्धालुः शीङ् शयालुः शमादिभ्यो घिनुण् शम उप
शमे शमीत मीद मी भ्रमी स्मीक्लमी श्र मीप्रमादी च जोः कगौ घिति च कारजकारयोः ककारगकारौ घितिसम्पर्क्की योगौ॥ लुः दयदाने दयालुः द्रा
कुत्सायां नि पूर्वः आतो नपीत्याल्लोपः निद्रालुः तस्पूर्वो द्रातत् शब्दस्य समाजेन त्वं निपात्यनेनं द्रालुः श्रत् पूर्वो डुधाञ् धारणादौ धेट् पाने यत्नु नश्यते श्रत्
पूर्वस्य धेटः प्रयोगाभावात् शीङ् स्वप्ने शयालुः कथं तर्हि रूपालुः स्पृहालुरिति रूपांसर्हो च लानौ निविग्रहे मृगय्वादित्वात् कुः शमादिभ्यो घिनुण् शमु तमु दमु श्रमु
भ्रमु क्षमु क्लमु मदी शमादयो ष्टौ घिनुण्प्रत्ययमाह उकार उच्चारणार्थः घित्वाच्च जोरिति कगौ णित्वाद्वृद्धिः शाम्यतीत्येवं शीलः मांतस्य सेट् इति न वृद्धिः इनामि
निदीर्घः शमीतमी दमी श्रमी भ्रमी क्षमी क्लमी प्रपूर्वस्य मदेर्दीर्घः प्रमादी आदि शब्देनान्येपि ग्राह्याः पृचीसंपर्के च जोरिति कः संपर्की सृज विसर्गे संसर्गी युज समाधौ

सि. चं. कृ. उ. ९६ विवेकीत्यजहानौत्यागीराञ्जदीप्तौरागीभजसेवायांभागीकषहिंसायांविकाषीलसश्लेषणक्रीडनयोःविलासीलपव्यक्तायांवाचिप्रलापीसृगतौप्रसारीमंथविलोडनेप्र
माथीवसनिवासेप्रवासीनिंदादेर्वुञ्वुञ्प्रत्ययेनापिसिद्धेवुञ्वचनंज्ञापकंशीलादिप्रत्ययेषुत्राऽऽदयोनभवंतीतिवुञ्प्रत्ययमाहनिंदाहिंसाक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयाभ्योवुञ्पराचार्थैःवुञ्पाठःपरिवादकः नु
शःविदिनुसायांनिंदकःहिसिहिंसायांहिंसकःक्षिपप्रेरणेक्षेपकःवदव्यक्तायांवाचिण्यंतःणेरितिणिलोपःपरिवादकःचलनशब्दार्थादकर्मकाद्युःचलनार्थाद
कर्मकात्शब्दार्थाच्चयुःस्यात्युप्रत्ययमाहयुवोरनाकावित्यनादेशःचलकंपनेचलनःक्षुपमंदायांगतौचोपनःकपिचलनेकंपनःशब्दशब्देअदंतःचुरादिःणेरि
तिणिलोपःशब्दनःरुशब्देरवणःअकर्मकात्किमपठितावियाअनुदात्तेतोहसादेरकर्मकाद्युःस्यात्वृतुवर्तनेवर्तनःअनुदात्तेतःकिंभवितहसादेःकिमेधिताअ

विवेकीत्यागीअसिउसिअनेअके घिणुणिरञ्जेर्नलोपोवाच्यःरागीभागीविकाषीविलासीप्रलापीप्रसारीमथहिंसायाम्प्रमाथीप्रवासीनि
न्दादेर्वुञ्निन्दकःहिंसकःपरिक्षेपकःपरिवादकःचलनशब्दार्थादकर्मकाद्युःक्षुपमन्दायाङ्गतौचोपनःचलनःकम्पनःशब्दनःरवणःअनुदा
त्तेतोहसादेरकर्मकात्वर्तनःरमणःज्वादेश्चजुगतौवेगेचजवनःसरणःगर्द्धनःक्रोधनःरोषणःमराडनःभूषणःज्यादेरिनिःजयीप्रजवी
दरीक्षयीदादेरुःदारुःधारुःसेरुःसृघस्यदःक्मरःसृमरःघस्मरःअद्मरःभञ्जभासमिदोघुरःभङ्गुरःभासुरःमेदुरः॥ कर्मकाल्किंवसिनाव
ख्यंज्वादेश्चयुःस्यात्जुगतौवेगेचजवनःसृगतौसरणःगृधुअभिकांक्षायांगर्द्धनःक्रुधक्रोधेक्रोधनःरुषरोषेरोषणःमडिभूषायांमंडनःभूषअलंकारेभूषणःज्यादे
रिनिःइनिप्रत्ययःस्यात्इनिप्रत्ययमाहइकारउच्चारणार्थःजिजयेजिअभिभवेचइनामिनिदीर्घःजयीजुगतौवेगेचप्रजवीदृङ्आदरेदरीक्षिक्षयेक्षिनिवासगत्योश्च
क्षयीदादेरुःरुप्रत्ययःस्यात्रुप्रत्ययमाहडुदाञ्दानेदोऽवखंडनेदेङ्पालनेत्रयाणामेषांग्रहणंदारुःननुदाणदापोर्ग्रहणंडुधाञ्धारणदेधारुःषिञ्बंधने
सेरुःसृघस्यदःक्मरःक्मरप्रत्ययस्यात्क्मरप्रत्ययमाहकित्वाद्गुणोनसृगतौसृमरःघस्लृअदनेघस्मरःअदभक्षणेअद्मरःभंजभासमिदोघुरःएभ्योघुरप्रत्ययःस्या राम ९६

पित्वात् च जोरित्निक गो भंजो आमर्द्दने भंगुरः भासृ दीप्तौ भासुरः मिमिदा स्नेहने मेदुरः विदिभिदिच्छिदेः कुरः कुरप्रत्ययः स्यात् कुर प्रत्ययमाह कित्वाद्गुणो न विद ज्ञाने अस्यैव ग्र
हणमनन्तु विद्लृ लाभे इत्यस्य संप्रदायात् विदुरं भिदिर् विदारणे भिदुरं छिदिर् द्वैधीकरणे छिदुरं कुरुः कर्त्तरि भवति तन्याच माघः प्रियतमाय वपुर्गुरु मत्सरच्छिदुरयादुरयाचि
तमंगनाः इह अदुरिति छेदः इण् नश जि सर्त्तिभ्यः क्वरप् एभ्यः क्वरप् प्रत्ययः स्यात् क्वरप प्रत्ययमाह कित्वान्न गुणः पित्वात् तुक् इति पित्वात्तुक् इण् गतौ इत्वरः इत्वरी
णश अदर्शने नश्वरः जि जये जित्वरः सृ गतौ सृत्वरः गम्लृ गतौ मलोपो निपात्यते गत्वरः जागर्त्तेरूकः ऊक प्रत्ययः स्यात् ऊक प्रत्ययमाह जागृ निद्राक्षये जागरूकः यङ् ऊकः
यजादिभ्यो यङ्न्तेभ्यो ऊकः स्यात् यजेर्यङि लुकोनेति त्वादि आनद्धति पूर्वस्य दीर्घः अतिशयेन यजनीति यायज्यते २ इति यायजूकः जपव्यक्तायां वाचि अतिशयेन जपनी

विदिभिदिच्छिदेः कुरः विदुरम् भिदुरम् छिदुरम् इण् नश जि सर्त्तिभ्यः क्वरप् ह्रस्वस्य पिति तुक् इत्वरः इत्वरी नश्वरः जित्वरः सृत्वरः गमे
र्लोपश्च गत्वरः जागर्त्तेरूकः जागरूकः यङ् ऊकः यज जप दंश वदिभ्यो यङन्तेभ्य ऊकः श्शीले लुक् ऊके सति यङो लुक् यायजूकः जञ्ज
पूकः दंदशूकः वावदूकः भियः क्रुक्लुकलुकाः भीरुः भीलुकः भीलूकः नमि कम्पि स्म्यजस कम हिंस दीपो रः नम्रः स्मेरः न निपूर्वो वा कम्रः ः क्रियासातत्ये अजस्रम् कम्रः हिंस्रः
स्रः दीप्रः विन्दुरिच्छुः एतौ निपात्यौ वेत्तेरिच्छतेश्च शीलो विन्दुः इच्छतीति इच्छुः ॥ तिजमजपामिति लुक् जंजप्यते २ इति जंजपूकः दंश दशने अतिशयेन दशनीति

लुक् दंदश्यते २ इति दंदशूकः नोलोपः इति नलोपः वद व्यक्तायां वाचि अतिशयेन वदनीति वावद्यते २ इति वावदूकः भियः क्रुक्लुकलुकाः ञिभी भये अस्मादेते प्रत्ययाः स्युः
क्रुक्लुकलुक प्रत्ययानाह कित्वान्न गुणः भीरुः भीलुकः भीरुकाः इत्स्मरः नमादेः रः प्रत्ययः स्यात् र प्रत्ययमाह णमु प्रह्वत्वे शब्दे च नम्रः कम्पि चलने कंप्रः ष्मिङ् ईषद्धसने
स्मेरः जसु मोक्षणे न ञ पूर्वः न इत्यः अजस्रं कमु कान्तौ कम्रः हिसि हिंसायां हिंस्रः दीपी दीप्तौ दीप्रः विद्ॣ इच्छुरे नौ निपात्यौ वेत्तेर्णुम् इषेश्छत्वं च निपात्यते विद ज्ञाने इ
त्यस्यैव ग्रहणं नेतरेषां इषु इच्छायां इत्यस्यैव ग्रहणं न तु ईष गतौ इष आभीक्ष्ण्ये इत्यनयोरनवधानान्निपातनाद्वावेत्तेरेवं शीलो विंदुः इच्छतीत्येवं शीलः इच्छुः विद् श

स्वपितृषिधृषेर्नजिङ् एभ्यो नजिङ् प्रत्ययः स्यात् नजिङ् प्रत्ययमाह ङित्त्वान्न गुणः इकार उच्चारणार्थः ञिष्वप् शये चोः कुरिति जस्य गः स्वप्नक् तृष पिपासायां तृष्णक् ञि
धृषा प्रागल्भ्ये धृष्णक् स्थादेर्वरः एभ्यो वरप्रत्ययः स्यात् वरप्रत्ययमाह ष्ठा गतिनिवृत्तौ स्थावरः ईश ऐश्वर्ये इह वसोरितीनो एन ईश्वरः भासृ दीप्तौ भास्वरः पिसृ गतौ पेस्वरः कसु गतौ
कस्वरः आदृतः किर्द्विश्च भूते किप्रत्ययमाह कित्त्वान्न गुणः किप्रत्यये द्वित्वादि पा पाने द्वित्वादि आतो लोप इटि च पपिः डुदाञ् दाने ददिः डुकृञ् करणे चक्रिः वृङ् संभ
क्तौ रदृत्यः वव्रिः हृञ् हरणे आ जह्रिः जनी प्रादुर्भावे गमामित्युपधालोपः जज्ञिः णम प्रह्वत्वे शब्दे च लोपः पचामित्येत्व पूर्वलोपो नेमिः गम्लृ गतौ गमामित्युपधालोपः
जग्मिः षह मर्षणे वह प्रापणे चल कंपने पत्लृ पतने एते यङन्ताः अतिशयेन सहते इति आत इति पूर्वस्यात्वं सासह्यते सासहां चक्रे इति यन इत्यलोपः अनपि च हसादिति

स्वपितृषिधृषेर्नजिङ्। स्वप्नक्। तृष्णक्। धृष्णक्। स्थादेर्वरः। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः। आदृतः किर्द्विश्च भूते। आदन्ता हदन्ता जनि
गमिनमिभ्यो यङन्तेभ्यस्सासहिवावहिचाचलिपापतिभ्यः किप्रत्ययो भूते शीले धातोश्च द्वित्वम् किर्लिङ्वद्वाच्यः। रामस्सोमम्पपिर्यज्ञे ददिर्गाश्च
चक्रिरद्भुतम्। याजकान्ववव्रिराजह्रिः पौण्डरीके महाद्विजान्॥ जज्ञिः। नेमिः। जग्मिः। सासहिः। वावहिः। चाचलिः। पापतिः। अथोणादयः। कृादेरुण्। कारुः।

यलोपः सासहिः अतिशयेन वहतीति वावह्यते वावहां चक्रे इति वावहिः अतिशयेन चलतीति चाचल्यते चाचलां चक्रे इति चाचलिः अतिशयेन पततीति पापत्यते
पापतां चक्रे इति वंचुस्रंसु इति प्राप्तस्य नीकोऽभावो निपात्यते पापतिः रामः सोमं पपिर्यज्ञे ददिर्गाश्च चक्रिरद्भुतं याजकान्ववव्रिराजह्रिः पौंडरीके महाद्विजान्॥
रामो यज्ञे सोमं पपाविति पपिः अक्तादाविति वर्जनान्न कर्म्मणि षष्ठी रामो यज्ञे गाः सुरभीः ददाविति ददिः रामो यज्ञे अद्भुतमाश्चर्यं चकारेति चक्रिः रामो यज्ञे याज
कान् यज्ञकर्तॄन् ववव्रे इति वव्रिः रामः पौण्डरीके नाम्नि यज्ञे महान्तश्च ते द्विजाश्च महाद्विजास्तान् आजहारेति आजह्रिः॥ अथोणादयः कृादेरुण् उण्प्रत्ययः स्या राम
न्त उण्प्रत्ययमाह णित्त्वाद्वृद्ध्यादि डुकृञ् करणे करोतीति कारुः शिल्पी कारकश्च तत्राद्ये योगरूढिर्द्वितीये तु योगमात्रमिति विवेकोऽत एव यौगिके तु धात्वर्थे॥ ९॥ १७

प्रतिकारः कान्वयो भवस्येवं तथा च भट्टिः राघवस्य ततः कार्यं कारुर्वानरपुंगवः सर्ववानरसेनानामाऽऽश्वाऽऽगमनमादिशदिति । विश्वकर्मणि नाकारुस्त्रिषु कारके
शिल्पिनो रिति मेदिनी कारुः शिल्पिनि कारके इति धरणिः ॥ ॐ ॥ वागतिगंधनयोः आनो युगिति युक् वायुः पापाने पा रक्षणे च पिबत्यनेन तैलादिकमिति पायुः
गुदं त्वपानं पायुर्ना इत्यमरः पातिरक्षतीति विग्रहे रक्षकोऽपि पायुः जि अभिभवे जयत्यभिभवति रोगान् इति जायुः औषधं भेषजौषधभैषज्यान्यगदो जायुरित्यमरः
पुल्लिंग साहचर्यात् ज्ञायुः पुंसि डु मिञ् प्रक्षेपणे मिनोति प्रक्षिपति देहे ऊष्माणमिति मीनाति मिनोति दीर्घा मित्यात्वं युक् च मायुः मायुः पित्तं कफः श्लेष्मेत्यमरः गोवाचं वि
रुतां मिनोति प्रक्षिपतीति गोमायुः सृगालः स्वद आस्वादने स्वदते रोचते इति स्वादुः साध संसिद्धौ साध्नोति परकार्यमिति साधुः स्वादुसाधू विशेष्यनिघ्नौ अमृडुः व्या
ते अश्नुते इत्याशुः आशुर्व्रीहिः पाटलः स्यात् शीघ्रार्थे यं तत्र विलंबभावमात्रपरत्वे क्लीबः तद्विशिष्टद्रव्यपरत्वे तु त्रिलिंगः अथ शीघ्रं त्वरितमित्युक्तम् क्लीबे शीघ्रादिसत्वे

वातीति वायुः पायुः जायुः मिनोतीति मायुः स्वद आस्वादने स्वादुः साधुः आशुः दीर्यते इति दारु सानु जनेर्जुश्च जानु चारु चाटुः किं शृणा
तीति किंशारुः जरामेति जरायुः ओरस्वलः तरन्ति वर्णा अनेनेति तालु कृके वचः क श्च कृकेन गलेन वक्तीति कृकवाकुः ॥ स्यात् त्रिषु वाम्यो मेयगामि

यादिस्तमरः दृ विदारणे दीर्यते इति दारु काष्ठं दार्विन्धनं त्वेधः इत्यमरः षण दाने सानुः स्नुः प्रस्थः सानुरस्त्रियामित्यमरः जनेर्जुश्च जुश्च प्रत्ययमाह अकारो विनो अनुबंध
यसामर्थ्यात् जनि वध्योर्नेति वृद्धि निषेधो न प्रवर्तते जन जनने जानु जानुनी चर गतौ चारु रम्यं चट भेदने चाटु चटु चाटु प्रियं वाक्यमिति हेमचंद्रः चाटुर्नारि प्रियोक्तिः
स्यादिति रत्नमालातथा च माघः चक्रे च वहु चाटून् प्रौढयोषिदृदस्येति माघे तु क्लीबेऽपि चाटु चाटु कनकं संभ्रममासामिति शृ हिंसायां किंशारुः किंशारुर्ना सस्यशूके वि
शेषकंकपक्षिणी इति मेदिनी इण् गतौ वृद्धौ कृतायां मावादेशे च जरायु गर्भाशयः ओरस्वलः तॄ ऋ इति प्रश्लिष्य द्वयोरपि सवर्णे दीर्घे कृते तॄ ओनयोः स्त्रोः तृ प्लवनतर
णयोः ऋ गतौ अनयोरस्वलः स्यात् उणि वृद्धौ सत्यां तालु इयर्ति अर्यते वा आलुः शाकविशेषो घटी च कर्करी आलुर्गलंतिका इति कृके वचः क श्च कृक शब्दे उपपदे वचेः
कानादेशः स्यात् उणि कृकवाकुः कृकवाकुर्मयूरे च सरटे चरणायुधे इति विश्वः ॥ ६ ॥

सि॰ चं॰ मादेरुः उप्रत्ययः स्यात् उप्रत्ययमाह मृङ् प्राणत्यागे म्रियंतेऽस्मिन् भूतानीति मरुः निर्ज्जलदेशः भृञ् भरणे डुभृञ् धारणपोषणयोश्च भरति बिभर्ति वा भरुः भरुः स्वर्णे हरे पुंसी
कौ॰ उ॰ नि मेदिनी भरुर्भर्तृकनकयोरिति हैमः शीङ् स्वप्ने शेनेऽस्मिन्निति शयुः अजगरे शयुर्वाहसः इत्युभावित्यमरः तॄ प्लवनसंतरणयोः तरंति नरकमनेन रोपकाद्यिति तरु
१८ र्वृक्षः चर गत्यादौ चरंति भक्षयंति देवा इममिति चरुः चरुर्भांडे च हव्यान्ने इति घृतपक्वमन्नमित्यर्थः त्सरछद्मगतौ त्सरुः खड्गादिमुष्टिः तनु विस्तारे तनुः तनुः काये
त्वचि स्त्री स्यान्त्रिष्वल्पे विरले कृशे इति मेदिनी स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः धन धान्ये धनुः स्यात्तनुस्तनुषा सार्धं धनुषा च धनुर्विदुरिति विश्वः उकारांते श्रीहर्षः
शुद्धवंशजनितोपि गुणस्य स्थानतामनुभवन्नपि शक्रः सेदुरेण मृजमाशुसपक्षं सायकं धनुरिवाजनिवक्रः १ धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने इति सांते मे
दिनी अथास्त्रीयां धनुश्चापाविस्यमरः डुमिञ् प्रक्षेपणे मीनाति मिनोतीत्यास्त्वं तु नेह बाहुलकात् मयुः तु रंगवदनो मयुरित्यमरः मयुस्तुरंगवदने मृडोपि मयुरिष्यते इति

मादेरुः मरुः शयुः तरुः चरुः त्सरुः छद्मगतौ त्सरुः तनुः धनुः मयुः कटुः वटुः अणुः शृणातीति शरुः स्वरुः त्रपुः असवः वसुः हनुः बंधुः म
नुः बिन्दुः स्पन्देस्सम्प्रसारणं धश्चसिंधुः। स्त्रीः॥ विश्वः टुमस्जो शुद्धौ मज्जतिपानीये इति न्यंक्वादित्वात्कुत्वं ज्वजबा इति सस्यदः मद्गुः पानीयकाकिके तिरभसः
अण शब्दे अणुः व्रीहिभेदस्त्वणुः पुमानिति लवलेशकणाणव इत्यमरः कटे वर्षादौ कटति रसनामिति कटुः कटुः स्त्री कटुरोहिण्यां लता राजकयोरपि नपुंसकम
कार्येस्यात् पुल्लिंगोरसमात्रके त्रिषु तद्दत्सुगंधप्रश्चमत्सरे पिरवरेपि चेति मेदिनी वट वेष्टने वटतीति वटुः वटुर्द्विजसुतः स्मृ न इति संसारावर्तः शृ हिंसायां शरुः शरुः
कोपे शरे वज्रे इति हैमः स्वृ शब्दोपतापयोः स्वरुः शतकोटिः स्वरुः शं वइत्यमरः त्रपूष लज्जायां अग्निं दृष्ट्वा त्रपते लज्जते इति त्रपुः रंगसीसकयोस्त्रपु रिति मेदिनी
असु क्षेपणे अस्यंति क्षिपंति शरीरमिति असवः पुंसि भूम्न्यसवः प्राणा इत्यमरः वस निवासे वसुः वसुर्हृदे ग्नौ यो क्त्रेऽ शौ वसुतोये धने मणौ हन हिंसागत्योः हनुः हनुः राम
पुमान् परोगंडादिति वररुचिकोशः स्त्रीलिंगेप्ययं हनुर्हट्टविलासिन्यां नृत्यारंभे गदे स्त्रियां हूयोः कपोलाऽवयवे इति मेदिनी मनु प्रस्रये हन्नमानपासिकोदीर्घोपिनि १८

न्चबंधवंधनेस्ते हेनबध्नातीतिबंधुः वंधुर्वंधूकपुष्पेस्यात्वंधुर्भ्रातरिबांधवे इतिविश्वः मनज्ञानेमनुः आदिराजा मंत्रश्चपिदिअवयवेविंदुः स्यंदेः संप्रसारणंधश्चसं
दूमस्त्रवणे अस्ययकारस्य संप्रसारणंदस्यधश्चस्यात् उप्रत्ययेसिंधुः देशनदविशेषेऽब्धौसिंधुर्नासरितिस्त्रियामित्यमरः॥ ॥उन्देरिच्चादेः उन्दीक्लेदने अस्योका
रस्येद् स्यादुप्रत्ययेइन्दुः स्कंदेः सलोपश्चस्कंदिर्गतिशोषणयोः अस्यसस्यलोपः स्यादुप्रत्ययेस्कंदतिशोषयतीतिकंदुः क्लीबेंबरीषंभ्राष्ट्रानाकंदुर्नास्वेदनीस्त्रियामि
त्यमरः स्कंदति जननायस्मिन्निति व्युत्पत्त्याभोगस्थानंकंदुरिति केचित् सृजेरसुम्सलोपश्चसृजविसर्गे आगमसकारस्यचुत्वेनशः झषेजबाइतिजः सृजतीतिरज्जुः र
ज्जुर्वेण्यांगुणेयोषिदितिमेदिनी फलेर्गुक चफल निष्पत्तौ फल्गुः फल्गुःकाकोदुंबरिकाभवेन्फल्गुनिरर्थकमितिहेमः नदीचपाटेः पटि श्चपटिरादेशः स्यात् परगतौ ण्यंतः पा
टयतीतिपटुः मनेर्धः मनज्ञाने आदेशःस्यादुप्रत्ययेमनज्ञानेमन्यतइतिमधुः मधुश्चैत्रेचदैत्येचमद्येपुष्परसेमधु इतिहेमचंद्रः मकरंदस्य मद्यस्यमाक्षिकस्यापिवाचकःअर्द्धर्चादिग

उन्देरिच्चादेः उनत्तीतिइन्दुः स्कन्देस्सलोपश्चकन्दुः सृजेरसुम्सलोपश्चरज्जुः फलेर्गुकचफल्गुः पाटेःपटिश्चपाटयतीतिपटुःस्समर्थेःम
कृ॰ उ॰ न्यादेः कित् पक् प्रत्ययमाह णी प्रापणे नीपः नीपः कदंबवंधूकनीलाशोकद्रुमेष्वपि चेति मेदिनी षुञ् अभिषवे वाहुलकात् दीर्घः सूपः सूपो व्यंज

३१ नसूदयोरिति मेदिनी कु शब्दे वाहुलकात् दीर्घः कुं वति मंडूका अस्मिन्निति कूपः शिल्यादयः पक् प्रत्ययांतानि पासंने शील समाधौ ह्रस्वो निपातनात् शिल्पं कौ

शलम् शशु हिंसायाम् निपातनात् सत्वं शष्पः शष्पं बालतृणेपि च पुंसि स्यात् प्रतिभाहीने इति मेदिनी शष्पं बाणतृणं घास इत्यमरः बाधृ विलोडने धस्य षत्वं निपातना

त् बाष्पः बाष्पो नेत्रजलोष्मणोरिति विश्वः बाष्पमूष्माणि चाश्रुणीति च रु शब्दे दीर्घत्वं निपातनात् रूपं रूपं स्वभावे सौंदर्ये इति विश्वः शृ हिंसायां निपातनात् दुर्द्वयोर्वि

हसे इति दीर्घः शूर्पं प्रस्फोटनं शूर्पमस्त्रीत्यमरः स्तनादेः र्य्यंतादित्नुः इत्नुप्रत्ययमाह स्तन गद देवशब्दे चुरादिर्ण्यंतो गुणे कृते अयादेशः स्तनयित्नुः स्तनयित्नुः पुमान् वारि

सर्तेरयः यूः सरयूः सरयुः पादेः पः पापम् न्यादेः कित् नीपः सूपः कूङ् शब्दे कूपः शिल्पादयः शीलं शिल्पम् शशु शष्पम् बाधृ बाष्पम् रु रू

पम् शृ शूर्पं स्तनादेः र्य्यंतादित्नुः स्तनयित्नुः गदयित्नुः दाभाभ्यां नुः दानुः भानुः धेट इच्च धेनुः सुवः कित् सूनुः अजिवृरीभ्यां णुः वेणुः वर्णुः स्थारीभ्यां णुः स्थाणुः

धरेपि स्तनितेपि चेति मेदिनी स्तनयित्नुः पयोवाहे नहृतौ मृगरोगयोरिति विश्वः गदयित्नुः गदयित्नुः पुमान् कामे जल्पाके कार्मुकेपि चेति विश्वः दाभाभ्यां नुः नुप्रत्ययमाह

डुदाञ् दाने दानुः दानुर्दानारि विक्रांते इति मेदिनी भा दीप्तौ भानुः भानू रश्मिदिवाकरावित्यमरः धेट इच्च नुः स्यात् धातोरित्वं च धेट् पाने संध्यक्षराणामित्यात्वे कृते इत्वं

नतो गुणः धेनुः धेनुः स्यान्नवसूतिकेत्यमरः सुवः कित् नुक् स्यात् कित्वान्न गुणः षूङ् प्राणिप्रसवे सूनुः सूनुः पुत्रेऽनुजे रवावितिविश्वः अजिवृरीभ्यां णुः णुप्रत्ययमा राम

ह अज गतौ अजेर्वी इति वीः वेणुः वेणुर्नृपांतरे वंशे इति विश्वः वृङ् संभक्तौ वर्णुः नददेशभेदयोः स्थारीभ्यां णुः ष्ठा गतिनिवृत्तौ स्थाणुः कीले हरे पुमान् अस्त्री ३१

ध्रुवे इति मेदिनी स्थाणुः कीले स्थिरे हरे इति विश्वः रीगतिरेषणयोः॥

रेणुः रेणुः स्त्रीपुंसयोर्धूलौ पुल्लिंगः पर्पटे पुनरिति मेदिनी रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः विषेः कितणुक्प्रत्ययमाह कित्वान्न गुणः विष्लृ व्याप्तौ विष्णुः विष्णुर्नारा
यणः कृष्ण इत्यमरः कादेः कः कप्रत्ययमाह वाहुलकान्न कस्येत्संज्ञा डुकृञ्‌ करणे कर्कः कर्कः कर्केतनेऽग्नौ वन्हौ शुक्लाश्वे दर्पणे घटे इति विश्वः राकेति राका राकान
तेनेरेक छांदसत्वात्‌ रजः स्त्रियां संपूर्णेन्दुतिथ्याविति मेदिनी राका तु सरिदंतरे राका नवरजः कन्या पूर्णेन्दुः पूर्णिमापि चेति विश्वः अर्च पूजायां चोः कुरिति कः
अर्कः अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे बृहस्पताविति विश्वः कलगतौ कल्कः कल्कोऽस्त्री घनतैलादिशेषे दंभे विभीतके विट्किट्टयोश्च पापे च त्रिषु पापाश
ये पुनरिति मेदिनी कल्कः पापाशये पापे दंभे विट्‌किट्टयोरपीति विश्वः इण गतौ एकः एकः संख्यांतरे श्रेष्ठे केवलेतरयोस्त्रिष्विति मेदिनी एके मुख्यान्यकेवलाः इति
विश्वः ञिभी भये भेकः भेको मंडूकमेघयोरिति विश्वः कै शब्दे काकः काकः स्याद्वायसे रसप्रभेदे पीठसर्पिणि शिरोऽवक्षालने मानभेदे द्वीपभेदयोः काकास्यात्का

रेणुः विषेः कितन्‌ विष्णुः कादेः कः कर्कः राका अर्कः कल्कः इणएकः भेकः काकः पाकः निहाकः नौसदेर्डित्‌ निष्कः शकेरुनउन्तउन्तिउनि
प्रत्ययाः शकुनः शकुन्तः शकुन्तिः शकुनिः हश्याभ्यामितः हरितः श्येनः ॥ वनासायां काकोली काकजंघयोः रक्तिकायां मलय्यां च काकमाच्यां च योषिति का
कः सुरतबंधे स्यात्‌ काकानामपि संहताविति मेदिनी मलयूः काकोदुंबरिका पापाने पाकः पाकः परिणतौ शिशौ केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेपि चेति मेदिनी
ओहाक्‌ त्यागे निहाका निहाका गोधिकासमे इत्यमरः नौसदेर्डित्‌ कुड्‌ प्रत्ययमाह डित्वाट्टिलोपः षद्‌लृ विशरणादौ निष्कः निष्कोऽस्त्री हेम्नि नस्ले इति विश्वः श
केः उनउंतउंति उनि प्रत्ययाः उनउंतउंतिउनिप्रत्ययानाह शक्लृ शक्तौ शकुनः शकुन्तः शकुन्तिः शकुनिः शकुंतिपक्षिशकुनिशकुन्तशकुनद्विजा इत्यमरः शकुनस्तु पुमान्‌
पक्षिमात्रपक्षिविशेषयोः शुभशंसिनि निमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी शकुंतः कीटभेदे स्यात्‌ भासि पक्षिविहंगयोरिति मेदिनी हश्याभ्यामितः इतप्रत्ययमा
ह हञ्‌ हरणे हरितः हरिता स्त्री च दूर्वायां हरितवर्णयुतेन्यवदिति मेदिनी श्येङ्‌ गतौ श्येतः शुक्लशुभ्रशुचिश्येतविशदश्वेतपांडुरा इत्यमरः ॥ छ ॥

सि॰ कौ॰ ३२

रुहेरश्च लो वा अस्मादिनः स्यान्नरस्य वा सकारः रुह बीजजन्मनि रोहितः लोहितः रोहितं कुंकुमे रक्ते ऋजु शक्र शरासने पुंसि स्यान्मीन मृगयो र्भेदे रोहितक द्रुमेइतिमे
दिनी लोहितं रक्त गोशीर्ष कुंकुमाजिकुचंदनेपुमान्नदांतरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी श्राद्वेराप्यः आप्य प्रत्ययमाह श्रु श्रवणे श्रवाप्यः श्रवाप्यो यज्ञपशुः स्पृ
हईप्सायां चुरादिरदंतः स्पृहयाप्यः वृञ एण्यः एण्य प्रत्ययमाह वृञ् वरणे वरेण्यः श्रेष्ठः ऋतेररण्यः अन्य प्रत्ययमाह ऋगतौ अरण्यं अटव्यरण्यं विपिनमित्यमरः
पृषु सेचने वस्य जः अन्यश्च स्यात् पर्जन्यः पर्जन्यो मेघशब्दे पि ध्वनदंबुदशक्रयोरिति मेदिनी वदेरान्यः आन्यप्रत्ययमाह वद व्यक्तायां वाचि वदान्यः वदान्यस्त्या
गिवाग्मिनोरित्यजयकोशः अमादेरत्रः अत्रप्रत्ययमाह अम गत्यादौ अ मत्रं भाजनं नं स्नग तौ नक्षत्रं नञः प्रकृतिभावेन नक्षत्र मिति साधितं तत्तु व्युत्पत्त्यंतरं पत्लृ पत
ने पत्रं तनूरुहं गड सेचने गडेरादेश्च कः कडत्रं डलयोरेकत्वस्मरणात् कलत्रं कलत्रं श्रोणिभार्ययोरित्यमरः वृञ् वरणे वरत्रा नध्रीव ध्रीवरत्रा चेत्यमरः चर्मम

रुहे रश्च लो वा रोहितः लोहितम् श्रुवादेराप्यः श्रवाप्यः स्पृहयाप्यः वृञ एण्यः वरेण्यः ऋतेररन्यः अरण्यम् पृषु सेचने पृषेश्च वस्य
जः पर्जन्यः वदेरान्यः वदान्यः अमादेरत्रः अमत्रम् नक्षत्रम् पतत्रम् कलत्रम् वरत्रा भ्रादेरतः भरतः पर्वपूर्तौ पर्वतः पृषिरञ्जिभ्यां कित्
॥ पृषतः रजतम् शपादेरथः शपथः॥
यो रज्जुरित्यर्थः भ्रादेरतः अतप्रत्ययमाह भृञ् भरणे भरतः भरतः शबरे नटे क्षेत्रे रामानुजे शास्त्रे दौष्यंतावृ
षभात्मजे नं तु वा ये इति हेमचंद्रः भरतो नानाट्यशास्त्रे शंबरे च मुनौ नटे रामानुजे च दौष्यंतावितिमेदिनी पर्वपूरणे पर्वतः पर्वतः पादपे पुंसि शाकमत्स्य
प्रभेदयोः देवमुन्यंतरे शैलइतिमेदिनी पृषिरंजिभ्यां कित् कित्प्रत्ययमाह कित्वान्न गुणः पृषु सेचने पृषतः पृषन्मृगे पुमान् विंदौ न द्वयोः पृषतोपि नान्न राम
यो श्च त्रिषु श्वेत बिन्दु युते प्युभावि मावितिमेदिनी रंज रागे नो लोप इति न लोपः रजतं रजतं त्रिषु शुक्ले स्यान्नक्लो बेहारे च दुर्वने इति मेदिनी शपादेरथः अ ३२
थप्रत्ययमाह शप आक्रोशे शपथः शपुदमु उपशमे ०॥

शमथः दमथः शमथः शांतिमंत्रियोरिति मेदिनी दमथस्तु पुमान् दंडे दमे च परिकीर्तित इति मेदिनी शमथस्तु शमः शांति दांतिस्तु दमथो दम इत्यमरः वस निवासे आवस
थो गृहं संवसथो ग्रामः रभादेरसः असप्रत्ययमाह रभराभस्येर भसः रभसो वेग हर्षयोः वेञ् आत्वाभावस्तु टच वेञ तंतुसंताने अस्मात्सप्रत्यये परे आत्वाभावप्रत्यय
स्तु डागमश्च स्यात् वेतसः दिवः किन् कस् प्रत्ययमाह कित्वान्न गुणः दिवु क्रीडादौ दिवसः वा तु क्लीबे दिवस वासरावित्यमरः कादेरभः अभप्रत्ययमाह
विशेषे करभः करभो मणिबंधादिकनिष्ठांतोष्ट्रतस्तुनेइति मेदिनी मणिबंधादाकनिष्ठकरस्य करभो बहिरित्यमरः शृहिंसायां शरभः शरभस्तु पशौ सिंहे करभे
वानरे भिदीति मेदिनी शलगतौ शलभः समीपतंग शलभावित्यमरः कलगतौ कलभः कलभः करिपोतके गर्दशब्दे गर्दभः गर्दभः श्वेतकुमुदे गर्दभो गंधभिद्यपि रास

शमथः दमथः वस आवसथः सम्वसथः रभादेरसः रभसः वेञ आत्वाभावस्तु टच वेतसः दिवेः किन् दिवु दिवसः कादेरभः करभः शृ शरभः शलगतौ शलभः कलगतौ कलभः गर्द कुत्सिते शब्दे गर्दभः ऋषि वृषिभ्यां कित् ऋषभः वृषभः रास वल्लिभ्यां च रासृ शब्दे रासभः वल्ल संवरणे वल्लभः विशादेरन्तः वेशन्तः वसन्तः जयन्तः ॥

भे गर्दभांडे च क्षुद्रजंतु रोग प्रभेदयोरिति मेदिनी ऋषि वृषिभ्यां कित् कभप्रत्ययमा
ह कित्वान्न गुणः ऋषीगतौ ऋषभः ऋषभः स्यादादिजिने वृषभे भेष जे स्वरे कर्णरंध्रे कोलपुच्छे श्रेष्ठे चाप्युत्तरे स्थितः ऋषभी मूक शिंब्यां स्यात् पुरुषाकारयोषिति विधवायां
शिरालायामिति हेमचंद्रः ऋषभस्त्वौषधांतरे स्वर वृषभयोः कर्णरंध्रे गर्दभपुच्छयोः उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति मूक शिंब्यां शिरालायां विधवायां
कच्चिन्मतेति मेदिनी वृषु सेचने वृषभः वृषभः श्रेष्ठ वृषयोः रास वल्लिभ्यां च कभः स्यात् रासृ शब्दे रासभः वल्ल संवरणे वल्लभः वल्लभो दयिते ऽध्यक्षे सल्लक्षण तुरंग
मे इति मेदिनी विशादेरंतः अंतप्रत्ययमाह विश प्रवेशने वेशंतः वेशंतः पल्वलं चाल्पसर इत्यमरः वस निवासे वसंतः ऋतुः जिजये जयंतः जयंतः पाकशासनिरि

सि॰ चं॰ हंतेर्हिर्मुट् च हन हिंसागत्योः अस्य हिरादेशोंतप्रत्ययश्च प्रत्ययस्य मुडागमश्च स्यात् हेमंतः बाहुलकादन्येभ्योप्यंतः अर्ह पूजायां अर्हंतः अर्हंतः क्षपणकोजिनः
कृ॰ उ॰ इति विक्रमादित्यकोशः अर्त्यादेररः अरप्रत्ययमाह ऋगतौ अररम् अररं छद कपाटयोरिति मेदिनी कपाटमररं तुल्ये इत्यमरः भ्रमु अनवस्थाने भ्रमरः भ्रमरः
३३ कामुके भृंगे इति मेदिनी चमु अदने चमरः चमरं चामरे स्त्री तु मंजरी मृगभेदयोरिति मेदिनी दिवु क्रीडादौ अ्यंतः देवयतीति देवरः पत्युः कनिष्ठभ्राता वसनिवा
से अ्यंतः वासयतीति वासरो दिवसः कुवः कित् अरप्रत्ययमाह कित्वान्न गुणः कु शब्दे कुररः उत्क्रोश कुररौ समाविस्यमरः अंग्या देरारः आरप्रत्ययमाह अगिगतौ
अंगारः अंगारस्त्वल्मुके न स्त्री पुल्लिंगस्तु महीसुते इति मेदिनी मदिस्तुत्यादौ मंदारः बाहुलकादारुप्रत्ययोपि मंदारुः पारिभद्रे तु मंदारुर्मंदारः पारिजातके इति शब्दार्णे

हंतेर्हिर्मुट् च हेमन्तः अर्त्यादेररः अररम् भ्रमरः चमरः देवरः वासरः शब्दे वासरः कुवः कित् कुररः अंग्यादेरारः अंगारः मन्दारः गडेः कडच।
गडआसेचने कडारः शृङ्गारादयः शृंगारः भृङ्गारः भृजूष मार्ज्जारः कमुकुमारः तुषारः कासारः ॥ वः मंदारः स्यात्सुरद्रुमे पारिभद्रेऽर्कपर्णे च

ति विश्वः गडेः कडच गडि वदनैकदेशे गडसेचने वा अस्य कडादेशः आरप्रत्ययश्च स्यात् कडारः कडारः कपिलः पिंग इत्यमरः कडारः कपिले दासे इति मेदिनी शृंगारादयः
आरप्रत्ययांता निपात्यंते शृ हिंसायां नुम् गुक् ह्रस्वश्च निपात्यते शृंगारः शृंगारः सुरते नाट्यरसे च गजमंडने न पुंसकं लवंगेपि नागसंभवचूर्णयोरिति मेदिनी भृञ्
भरणे नुम् गुक् ह्रस्वश्च निपात्यते भृंगारः भृंगारः कनकालु का भृंगारी झिल्लिकायां स्यात् कनकालौ पुनः पुमान् इति च मृजू शुद्धौ मृजेर्वृद्धिरिति वृद्धिः मार्ज्जारः ओतुर्वि
डालो मार्ज्जार इत्यमरः मार्ज्जार ओतौ रक्ताङ्गे इति मेदिनी कमु कांतौ उपधाया उत्वं गुणाभावश्च निपातनात् कुमारः कुमारः स्यात् शुके स्कंदे युवराजेऽश्ववारके बालके वरुणा द्रौ नानद्यो जीरस्य कां च नेकुमारी शैलननयानवमा स्यो नदीभिदि सहाऽपराजिता कन्या जम्बूद्वीपेषु च स्त्रियामिति मेदिनी तुष तुष्टौ तुषारः तुषारस्तु हिनं हिममि राम ३३
त्यमरः कास शब्द कुत्सायां कासारः कासारः सरसी सर इत्यमरः ॥

सर्तेरपः षुक् च स्गनौ अस्मात्प्रत्ययः स्यात् धातोः षुगागमश्च अपप्रत्ययमाह सर्षपः विटपादयः कपप्रत्ययांतानि निपात्यंते कित्वान्न गुणः विट शब्दे विटपः विटपो
नस्त्रियां स्तंबे शाखाविस्तार पल्लवे विटाधिपे नेति मेदिनी विश प्रवेशने विशतेः प्रत्ययस्य तुडागमो निपात्यते छ शषेति षत्वं ष्टुत्वं विष्टपं विष्टपं भुवनं जगदित्यम
रः कण शब्दे वस्योत्वं निपातनात् कुणपं कुणपः पूतिगंधे शवे चेति मेदिनी कुणपः शवमस्त्रियामित्यमरः वल संवरणे वस्योत्वं निपातनात् उलपं उलपो न स्त्रीगु
ल्मिन्यामुलपानात्तृणां न रे इति मेदिनी वृतादेस्तिकः तिकप्रत्ययमाह वृतु वर्तने वर्तिका कृतः कित् कृती छेदने इत्यादिभ्यः तिकक् स्यात् कित्वान्न गुणः कृत्ति
कादिभिद् विदारणे भिनि का भितिः लतु सौत्रो धातुः लतिका गोधा इष्यशिभ्यां नकः तकप्रत्ययमाह इषु इच्छायां षुत्वं इत्वं इष्टका अशू इ व्याप्तौ छ शषेति षत्वं अष्टका वी

सर्तेरपः षुक् च सर्षपः विटपादयः विटशब्दे विटपः विष्टपम् कुणपम् वलसंवरणे उलपम् वृतादेस्तिकः वर्तिका कृतः कित् कृत्तिका इष्यशि
भ्यां नकः इष्टका अष्टका वीपतिभ्यां तनन् वेतनम् पत्तनम् अर्त्यादेर्भः अर्भः दृभयेर्दर्भः गर्भः इणः कित् इभः असिसंजिभ्यां क्थिः अस्थि
सक्थि शुषादेः क्सिः शुष्किः कुष निष्कर्षे कुक्षिः अश् अक्षिः इषः क्सुः इक्षुः ॥ ॥ पतिभ्यां तननः तनप्रत्ययमाह वीगत्यादौ वेतनं पत्तनं पत्तनं पुटभेदनमित्यमरः अर्त्यादे

र्भः भप्रत्ययमाह ऋ गतौ इयर्तीति अर्भः शिशुः कप्रत्यये अर्भकः दृ विदारणे दर्भः गृ निगरणे गर्भः गर्भो भ्रूणे अर्भके कुक्षौ संधौ पनसकंटके इति मेदिनी इणः कित् भः कित्वा
न्न गुणः इण् गतौ इभः इभः स्तंबेरमः पद्मीत्यमरः असिसंजिभ्यां क्थिः क्थिप्रत्ययमाह कित्वान्न गुणः असु क्षेपणे अस्थि कीकसं तुल्यमस्थि चेत्यमरः षंज संगे चोः कुरिति
जस्य गः खसे चपा इति कः नोलोप इति नलोपः सक्थिः सक्थि क्लीबे पुमानूरुरित्यमरः शुषादेः क्सिः क्सिप्रत्ययमाह कित्वान्न गुणः शुष शोषणे षढोः कः सि इति कः षत्वं शुष्किः वातः
कुष दाहे कुक्षिः अशू इ व्याप्तौ छ शषेति षत्वे कत्वं च असि नयने इषः क्सुः क्सुप्रत्ययमाह कित्वान्न गुणः इषु इच्छायां कत्वे षत्वे इक्षुः रसाल इक्षुरित्यमरः ॥ ६ ॥ ॥

सि॰ चे॰ अविन्तृस्तृतंत्रिभ्य ईः ई प्रत्ययमाह अवरक्षणादौ अवीः अवी नारी रजस्वला नृ प्लवनतरणयोः तरीः स्त्रियां नौस्तरणिस्तरिरित्यमरः स्तृ ञ् आच्छादने स्तरीर्धूमः त
कौ॰ उ॰ त्रि कुटुंबधारणे चुरादिः तंत्रयतीति जेरिति त्रिलोपः तंत्री वीणादेर्गुणः लक्षेर्मुट् च लक्ष दर्शनांकनयोः चुरादिः अस्मादीप्रत्ययः स्यात् प्रत्ययस्य मुडागमश्च जेरिति
३४ त्रिलोपः लक्ष्मीः लक्ष्मी संपत्ति शोभयोः ऋद्धौषधौ च पद्मायामिति मेदिनी दीर्घो दृपिकृदिकारादिति पाक्षिक ईप् कैश्चिद् दृष्यते अत एव वातप्रमी श्रील क्ष्मीत्यादि शब्दाः
पक्षे ईवंता अपि आशीरस्य हृदिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिप्रिया इति द्विरूपकोशः॥ ॥ इति उणादौ तृतीयः पादः संपूर्णतामगमत्॥ ॥ वातप्रम्यादयः क्वीप्रत्ययांता निपा
त्यंते कस्येन्संज्ञा माङ् माने आतो न पीत्याल्लोपः वातं प्रमीमीते इति वातप्रमीः वातप्रमी वातमृग इत्यमरः अयं स्त्रीपुंसयोः या प्रापणे ययीरश्वः पा पाने पपीः निपात
नाद् भयत्र द्वित्वं पपीः स्यात् सोमसूर्ययोरिति विश्वः रत्न्यादयः निपात्यंते ऋ अंजु मदी अत् अगि कु युक् शिभ्यो ष भ्यः क्नि भलि स्य दृ थि उलि अच आस आनु क् प्र

अविन्तृस्तृतंत्रिभ्य ईः। अवीः तरीः स्तरीधूम्रः तंत्री लक्षेर्मुट् च लक्ष्मीः॥ इति तृतीयः पादः॥ वातप्रम्यादयः। वातप्रमीः यांतपनेनेति पपीः पा
रक्षणे पपीः रत्न्यादयः ऋ रत्निः अंजू अंजलिः मदी मत्स्यः अत् अतिथिः अगि अंगुलिः कुक वसः कौतेः कवचः युयवासः कृशकृशानुः।

त्यया: यया संख्यमेभ्यो भवंति ऋ गतौ क्नि: किस्वान्नगुणः रत्नं रत्निः बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृतांगुलिः अरत्निरत्र नञ्समासः प्रसृतांगु॥ श्रः करः शर्करा॥
लिर्योहस्तः सोऽरत्निरित्यर्थः अंजू व्यक्त्यादौ अलि: अंजलिः अंजलिस्तु पुमान्हस्तसंपुटे कुडवेपि चेति मेदिनी मदी हर्षे स्य: मत्स्यः मत्स्यो मीने च पुंभूम्नि देशे इति मे
दिनी अत सातत्यगमने इथिः अतिथिः अतिथिः कुशपुत्रे स्यात्पुमानागंतुके त्रिष्विति मेदिनी अगि गतौ उलिः अंगुलिः अंगुलिः करशाखायां कर्णिकायां गजस्य चेति हेमः
कुश ब्दे अचः कवचः कवचोगर्दभांडे चस्त्र्नाहे पर्पटे पि चेति मेदिनी यु मिश्रणे आसः यवासः यासो यवासो दुःस्पर्श इत्यमरः कृश तनूकरणे आनुक् कृशानुः कृशानुः पा राम
वको नल इत्यमरः श्रः करः करप्रत्ययमाह ककारस्यनेत्त्वं बाहुलकात् शॄ हिंसायां शर्करा शर्करा खंड विकृतौ उपलाकर्परांशयोः शर्करान्वितदेशे च रुग्भेदसकलेपि ३४

पुषः किन् करक् प्रत्ययमाह पुषपुष्टौ पुष्करं पुष्करं खेंवुपद्मयोः सूर्य्येवन्हे खड्ग फले हस्ति हस्ताग्र कोडयोः कुष्ठौषधौ द्वीपतीर्थ भेदयो श्च नपुंसकं उरंगरागविहगनृसभे
देषु चांवु देइति मेदिनी गमे रिनिः इकार उच्चारणार्थः इन् प्रत्ययमाह गम्लृ गतौ नाइना मिति दीर्घः गमी आङ् पूर्वाद्गमे रिनि प्रत्ययस्तु णिन् णित्वाद्वृद्धिः आगमि ष्यतीत्या
गामी भूसना याम स्मादपि इनिः स च णित स्यात् भविष्यतीति भावी परमेस्थः किन् परमशब्दे उपपदे तिष्ठते रिनिः किन् स्यात् कित्वादातो न पीस्या लोपः परमेष्ठी पर
मेष्ठी पितामह इत्यमरः स ब्रह्म्या अलुक् मंथ इनिः किन् मंथ विलोडने अस्मादिनिः किन् नो लोप इति नलोपः इनो त्संच सु इत्यत्वं आ सौ इति टेरात्वे थो न्थुट् मंथाः
मंथा मंथान दंडे च वज्रे चा पे पि च स्मृतः पतेः स्थ श्च पत्लृ गतौ अस्मादिनिः स्यात् नकारस्य थ श्च पंथाः पथे गतावित्यस्मात्स्त्वाद्य प्रत्यये अकारान्तो प्यस्ति वाटः प
थ श्च मार्ग श्चेति सुभूतिचंद्रः ऋभवो देवाः सयंस्यऽस्मिन्निति विग्रहे वाहुलकान् ड प्रत्यये ऋभुसः ऋभुक्षः स्वर्गवज्रयो रिति विश्वः ततो मत्वर्थीयेनिः ऋभुक्षिन्निति नाँ

पुषः कित् पुष्करः गमेरिनिर्भविष्यति गमिष्यतीति गमी परमेस्थः कित्पर मेष्ठी मन्थ इनिः कित् मन्था मन्थानौ पतेस्थ श्च पन्थाः पन्थानौ वला
कादयः वलाका पताका खजमन्थेरखजाकः पिनाकः तडआघाते तडाकः दूषेरीकः दूषीका ॥ तंप्रातिपदिकं अत्वे आत्वे च ऋभुक्षाः ईंद्रः वलाकादयः
आकप्रत्ययान्ता निपात्यंते वल प्राणने वलाका वलाका वकपंक्तिः स्याद्वलाका विसकंटिका वलाका कामुकी प्रोक्ता वलाक श्च वको मत इति विश्वः पत्लृ पतने पताका पताका
वैजयंत्यां च सौभाग्ये केध्वजे पि चेति विश्वः पताका वैजयंत्यां च सौभाग्ये नाटकांगयोरिति मेदिनी खज मंथे खजाकः पक्षी पारस्करेणाप नेरित्वं तुमश्च निपात्यते पिनाकः क्लीव पुंसोः
पिनाकः स्यात् शूल शंकर धन्वनोरित्यमरः पिनाकोस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोरिति मेदिनी पिष्लृ संचूर्णने षस्य णत्वं धातोर्य्यगागम श्च निपात्यते पिण्याकः पिण्या
कोस्त्री तिलकल्के हिंगु वाह्लीक सिल्हके इति मेदिनी तड आघाते तडाकः दूषेरीकः ईक प्रत्ययमाह दुष वैकृत्ये अन्तः दुषे औ वितिदीर्घः औ रिति त्रि लोपः दूषीकाने
त्रयोर्मलमित्यमरः किंच अकृते पि ईक् प्रत्यये दूषयने र्धातो रिरितीति प्रत्यये दूषिः कृदिकारादितिवे पि दूषी उभाभ्यामपि स्वार्थे कप्रत्यये ह्रस्वो वेति पाक्षिके ह्रस्वे च कृते ६८

सि॰ चं॰ दूषीका च सिद्धानि पिचंडी दूषिका दूषीषि चाटचदृशोर्मलमिति विक्रमादित्य कोशः दूषिका तूलिकायां च मले स्यात्स्त्री च नस्यचेति मेदिनी॥ ःःः॥ अनिहृषिभ्यां
कौ॰ उ॰ कितू कीकप्रत्ययः स्यात् कित्वान्न गुणः अनप्राणने अनीकं अनीकोऽस्त्री रणे सैन्ये इति मेदिनी हृषतुष्टौ हृषीकं हृषीकं विषयींद्रियमित्यमरः अलीकादयः कीकप्रत्ययांतानि
३५ पात्यंते अलभूषणादौ अलीकं अलीकं त्वप्रियेपि स्यात् दिव्ये स ससेनपुंसकमिति मेदिनी अलीकमप्रियेलाभे वितथे इति हेमचंद्रः विपूर्वात् व्यलीकं व्यलीकमप्रिया
कार्यवैलक्ष्येष्वपि पीडने नानागरे इति मेदिनी वलसंवरणे वलीकं वलीकनीध्रे पटल प्रांते इत्यमरः वलतेर्निपातनान् मुमागमेकृते वल्मीकं वा मल्लूरश्चनाकु
श्च वल्मीकं पुंनपुंसकमित्यमरः पुण शुभेकर्मणि धातो र्नुमागमो णस्य डश्च प्रत्ययस्यारुडागमश्च निपातनात् पुंडरीकं पुंडरीकं सितांभोजे सितच्छत्रे च भेषजे पुंसि व्याघ्रे च
दिङ्नागे कोशकारांतरे पि चेति मेदिनी ईषगतौ निपातनात् हृस्वः इषीका शलाका क्रादेरीषः ईषप्रत्ययमाह कृ विक्षेपे करीषः करीषं गोमयं शुष्कमित्यमरः तॄ प्लवनतरण

अनिहृषिभ्यां किच्च अनीकं हृषीकम् अलीकादयः अलभूषणादौ अलीकम् वलीकम् पुण कर्मणि शुभे पुण्डरीकम् ईषिका ईषीका क्रादेरी
षः करीषम् तृ नरीषः श्रादेः कीषः शृ शिरीषः पृ पुरीषम् अजेर्ऋजः ऋजीषम् अविशब्दे अंबरीषो निपात्यः अंबरीषम् क्रादेरीरः करीरः शृ
शरीरम्॥

योः नरीषः तरीषा श्रादेः कीषः शृहिंसायां शृ नरतीः शिरीषो वृक्षः पृपालनपूरणयोः पोरुरित्युः पुरीषं गूथं पुरीषं वर्चस्कमस्त्री विष्ठावि
शौ स्त्रियामित्यमरः अजेर्ऋजः अर्ज अर्जने अस्मात्कीषः स्यात् धातोर्ऋजादेशश्च ऋजीषं ऋजीषं पिष्टपचनमित्यमरः अविशब्दे निपातनात् ईषप्रत्य
यः प्रत्ययस्यारुडागमश्च अंबरीषः अंबरीषं रणे भ्राष्ट्रे क्लीवं पुंसि नृपांतरे नरकस्य प्रभेदे च किशोरे भास्करेपि च आम्रातके तु पाते चेति मेदिनी अंबरीषः पुमा
न्भ्राष्ट्र मित्ति वोपालितः क्लीबे पुंसि नृपांतरे क्लीबे बरीषं भ्राष्ट्रेने त्यमरः क्रादेरीरः ईरप्रत्ययमाह कृ विक्षेपे करीरः वंशांकुरे करीरोऽस्त्री रसभिद् घटयोः पुमा राम
न् करीरा चीरिकायां च दंतमूले च दंतिनामिति मेदिनी शृहिंसायां शीर्यते इति शरीरं अर्द्धर्चादिः शरीरं वर्ष्म विग्रह इत्यमरः॥ ३५

गभीरादयः ईरप्रत्ययांता निपात्यंते गम्लृ गतौ मस्य भः पाक्षिको नुम् च निपातनात् गभीरं निम्नं गभीरं गंभीरमित्यमरः वश कांतौ निपातात् कीरप्रत्ययः ग्रहामिति सं
प्रसारणं उशीरं मूलेऽस्योशीरमस्त्रियां अभयं नलदं सेव्यमित्यमरः घस्लृ अदने कीरप्रत्यये निपातनात् गमामित्युपधालोपे कत्वं षत्वं क्षीरं क्षीरं दुग्धे च नीरे चेति वि
श्वः शीङो धुक् लक् वलु वल ञ्वालपालाः शीङ् स्वप्ने अस्मात् षट् प्रत्यया भवंति शेरतेऽनेन शीधुरर्द्धचीदिः मैरेयमासवः शीधुरित्यमरः लक् शीलं शीलं स्वभावे
सद्वृत्ते इति मेदिनी वल् शेवलं वलञ् शैवलं जलनील्यां तु शैवालं शैवल इत्यमरः शैवलं पद्मकाष्ठे स्यात् शैवाले तु पुमानयमिति मेदिनी वाल शैवालं पाल शैपालं शैवालं
शैवलो न स्त्री शैपालो जलनीलिकेति शब्दार्णवः उलूकादयः ऊकप्रत्ययांता निपात्यंते वल संवरणे सम्प्रसारणं निपातनात् उलूकः उलूकः पुंसि काकारौ इन्द्रेभा
रतयोधिनीति मेदिनी शमु उपशमे धातो र्बुगागमो निपातनात् शंबूकः शंबूको गजकुंभांते घोषे च शूद्रतापसे इति मेदिनी बाहुलकाड्डकप्रत्ययेपि जंबूकं जंबुकं

गभीरादयः गम्लृ गभीरः गम्भीरः वश् उशीरं घस्लृ क्षीरम् शीङो धुक् लक् वलु वल ञ् वाल पालाः शीधु शीलम् शैवलः शैवालम् शेपालम् उ
लूकादयः उलूकः शसु शम्बूकः शल शालूकः मडि भूषायाम् मण्डूकः नियोमिः नेमिः अर्त्ते रूर्च ऊर्मिः भुवः किच्च भूमिः ॥ ६ ॥

प्येकं शंबूकमपि शंबुकमिति द्विरूपकोशः शंबूका जलशुक्तय इत्यमरः शल गतौ निपातनाद्वृद्धिः शालूकं सौगन्धिकं तु कल्हारमित्याद्युपक्रम्य शालूकमेषां कं
दः स्यादित्यमरः एषां सौगंधिकादीनां कुमुदकैरवांतानां कंदो मूलं शालूकमित्यर्थः मडि भूषायां मंडने वर्षासमयमिति मंडूकः भेकः नियो मिः मिप्रत्ययमाह
णीञ् प्रापणेन यति चक्रमिति नेमिः नेमिर्नीतिनिशेनूपनिकाचक्रांतयोः स्त्रियामिति मेदिनी अर्त्तेरूर्चेमिप्रत्ययस्तस्मात् धातो रूरादेशश्च ऋ गतौ ऊर्मिः
ऊर्मिः स्त्रीपुंसयो र्वीच्यां प्रकाशे वेगभङ्गयोः वस्त्रसंकोचरेखायां वेदनापीडयोरपीति मेदिनी भुवः किन्मिक् स्यात् कित्वान्न गुणः भू सत्तायां भवंति भूतान्य
स्यामिति भूमिः भूमिर्वसुधरायां स्यान स्थानमात्रेपि च स्त्रियामिति मेदिनी ॥

अश्नोतेरश् च अश्नूङ् व्याप्तावस्मान्निः स्यात् धातोरशादेशश्च रश्मिः रश्मिः पुमान्दीधितौ स्याप्रग्रहयोरपीति मेदिनी स्नादेर्निः कित् सृगतौ सृणिः अंकुशोऽस्त्री स्त्रिणिः स्त्रियामित्यमरः सृणिः स्यादंकुशे पुमानिति वृषु सेचने वृष्णिः वृष्णिस्तु यादवे मेषे वृष्णिः पाखंड चंडयोरिति विश्वः वृष्णिः क्षत्रियमेषयोः अंगेर्नलोपः
अगि गतौ निः अग्निः अग्निर्वैश्वानरो वह्निरित्यमरः अग्निर्वैश्वानरोपि स्यात् चित्रकारव्योषधौ पुमानिति मेदिनी वहादेर्निः निप्रत्ययमाह वह प्रापणे वह्निः वह्निर्वैश्वानरोपि स्यात् चित्रकारव्योषधौ पुमानिति मेदिनी श्रिञ् सेवायाम् श्रेणिः श्रेणिः स्त्रीपुंसयोः पंक्तौ समाने शिल्पिसंहताविति मेदिनी निः श्रेणिस्त्वधिरोहिणी श्रु श्रवणे श्रोणिः कटिः श्रोणिः ककुद्मतीत्यमरः युमिश्रणे योनिः योनिः स्त्रीपुंसयोश्च स्यादाकारे स्मरमंदिरे इति मेदिनी द्रु गतौ द्रोणिः २ सेचनी ग्लै हर्षक्षये ग्लानिः दृ

अश्नोतेरश् च रश्मिः स्नादेर्निः कित् सृणिः वृष्णिः अङ्गेर्नलोपश्च अग्निः वहादेर्निः वह्निः श्रोणिः योनिः द्रोणिः ग्लानिः घृण्यादयः घृणिः
स्पृशपृश्निः पृषपार्ष्णिः पातेर्डतिः पतिः शकेरृतन् शकृत् हन्तेररतिरंहश्च हन्तिद्रुरितमनया अंहतिः सूङ्ग्रादेः क्रिः सूरिः भूरिः अद्रिः ॥ ६॥

वेत्यं घृण्यादयः निक्प्रत्ययांता निपात्यंते घृ सेचने घृणिः घृणिः पुंसि अंशु ज्वालातरंगेष्विति हेमचंद्रः स्पृश संस्पर्शने स्पृशतेः सलोपो निपातनात् कृशषेति षत्वं पुत्वं
पृश्निः पृश्निरल्पतनाविति अमरः पृषु सेचने पृषेर्वृद्धिर्निपात्यते पार्ष्णिः पार्ष्णिः स्यादुन्मदे स्त्रियां स्त्रियांहयोः सैन्यपृष्ठे पादग्रे प्यःघरेपि चेति मेदिनी पातेर्डतिः
डतिप्रत्ययमाह डित्वाट्टिलोपः पा रक्षणे पतिः पतिर्धवे नाथे स्वीशे इति मेदिनी शकेः ऋतन् ऋतन्प्रत्ययमाह शक्नु शक्तौ शकृत् उच्चारावस्करौ शमलं शकृत् पुरीषं
वर्चस्कमस्त्री विष्ठा विशौ स्त्रियामित्यमरः हंतेररतिरंह च हन हिंसागत्योः अस्मादतिः स्यात् धातोरंहादेशश्च अंहतिः प्रादेशनं निर्वपणमपवर्जनमंह
तिरित्यमरः सूङ्ग्रादेः क्रिः क्रिप्रत्ययमाह कित्वान्न गुणः षूङ् प्रसवे सूरिः धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षण इत्यमरः अभिधानमाला॥ ६॥

यांस्मूरीतिनांतं उदाहरनम् भूसत्तायां भूरिः भूरिर्नीवासुदेवेचहरेच परमेष्ठिनिनपुंसकंसुवर्णचप्राज्येस्याद्वाच्यलिंगक इति मेदिनी अद भक्षणे अद्रिः अद्रयोद्रुमशैला
कीइत्यमरः॥ ८॥ राटेस्त्रिः त्रिप्रत्ययमाह राटाने रात्रिः शद्ल शातनेशत्त्रिः शत्त्रिर्नी मोधरेवि स्मावितिमेदिनी अद भक्षणे अत्त्रिर्मुनिभेदः पतेरत्रिः अत्रिप्रत्यय
माह पत्लृगतौ पतत्रिः पक्षीपतत्रात् पक्षवाचकात् शब्दान्मत्वर्थे इतितुनांतः पतत्त्रीपतत्रिणौ मृङ ईचिः ईचिप्रत्ययमाह मृङ प्राणत्यागे मरीचिः मरीचिः रूप
पोदीशौ ऋषिभेदेचरश्यतेइतिविश्वः मरीचिर्मुनिभेदेनागभस्त्रावनपुंसकमितिमेदिनी वे ओडित् वेञ्तंतुसंताने अस्मादीचिर्डित् स्यात् वीचिः वीचिः स्वल्पे
तरंगेस्यात् अवकाशेसुखेद्वयोरितिविश्वः पुरः कुषः कुषप्रत्ययमाहकित्वान्नगुणः पुर अग्रगमने पुरुषः बाहुलकाद्दीर्घपूरुषः पुरुषस्त्वात्मनिनरेपुन्नागेथेतिहै

राटेस्त्रिः रात्रिः अत्त्रिः पत्त्रिः पतेरत्रिः पतत्त्रिः मृङः ईचिः मरीचिः वेञोडिच्च वीचिः पुरः कुषः पुर अग्रगमने पुरुषः पॄनहिकलिभ्य उषः।
परुषम् नहुषः कलुषम् पीयेरूषः पीयमाने सौत्रः पीयूषम् पेयूषम् मस्जेर्नुम्च मञ्जूषा गण्डे अव्वगडि वदनैकदेशे गण्डूषः॥ ९ ॥
पुस्तक पण्डित हरिप्रशाद श्रीकोट सं का दयो ल
मः पुरुषाः पूरुषानरा इत्यमरः पॄनहिकलिभ्य उषः उषप्रत्ययमाह पृ पालनपूरणयोः परुषं परुषंकर्बुरेरुक्षेनिष्ठुरेऽक्लीबवाच्यवदितिमेदिनी णह बंधनेनहुषः
नहुषोराजविशेषेनागभिदपीतिहेमः कल शब्दसंख्यानयोः कलुषं कलुषंत्वाविलैनसोरितिवि श्वः पीयेरूषः ऊषप्रत्ययमाह पीयः सौत्रधातुः पीयूषम् बाहुलकाद्गुणा
भावः गुणेतुपेयूषः पीयूषोभिनवंपयइत्यमरः पीयूषममृतंसुधेत्यमरः पीयूषंसप्तदिवसावधिक्षीरेनयामृतेइतिमेदिनी पीयूषममृतेनव्यसूतधेनोः पयस्यपो
तिहैमः मस्जेर्नुम्चटु मस्जोशुद्धौ अस्माद्ध्रूषस्यात् धातोर्नुमागमश्चमित्वादंत्यात्स्वरात्सरः सस्यश्चुत्वेनशः श्चबेजवाइतिसस्यजः हसात्परस्य झसस्येति
वाजलोपः लोपाभावपक्षेजकारद्वयंमंजूषापिटकः पेटकः पेटामंजूषेत्यमरः गंडेश्चगडिवदनैकदेशेअस्मादूषः स्यात गंडूषः गंडूषोमुखपूतीभपुष्करमस्र
+ +

सि॰चं॰ शकादेरटः अरप्रत्ययमाह शकिगनौ शकॄशकौ शकटः क्लीबेऽनः शकटो स्त्री स्यादित्यमरः ककिगनौ कंकटः सन्नाहः डुकृञ् करणे कृविक्षेपे वा कररः का के भगंडो
हृ॰उ॰ करटा वित्यमरः करटो गजगंडे स्यात् कुसुंभे निंद्यजीविनि एकादशादि श्राद्धे च दुर्दुरूढे पिवायसे इति मेदिनी कलिकर्द्योरमः अमप्रत्ययमाह कलसंख्याने कस
३७ मः कलमः शालिचौरयोरिति हैमः कलमः पुंसि लेखिन्यां शालौ पाटच्चरेपि चेति मेदिनी कर्दे कुत्सिते शब्दे कर्दमः पंकः पुल्यादेः किन्दः किंद प्रत्ययमाह कित्वान्न गुणः
पुलमहत्त्वे पुलिंदः जातिविशेषः कुपक्रोधे कुपेर्वा वः किंदः स्यात् पस्य वा यकारश्च कुविंदः कुपिंदः तंतुवायः कुविंदः स्यादित्यमरः नौ षंजे र्घ्यथिः षंज संगे निपूर्वा
दस्मात् घ्यथि प्रत्ययः स्यात् घ्यथि प्रत्ययमाह घित्वाच्चजोरिति कुत्वं प्रादेश्चेति षत्वं निषंगथिः आलिंगकः सर्तेर्णित् सृगतौ अस्मात् घ्यथिः स्यात् स च णित् सारथिः नियंता प्रा

शकादेरटः शकटम् ककिगनौ कं कटः कृञ्‌ करटः कलिकर्द्योरमः कलमः कर्दे कुत्सिते शब्दे कर्दमः पुल्यादेः किन्दः पुलिन्दः कुपेर्वा वः कु
पिन्दः कुविन्दः नौ षञ्जेर्घ्यथिः निषंगथिः सर्तेर्णिच्च सारथिः खर्जादेरूरः खर्जूरः कर्पूरम् वल्लूरम् लंगेर्वृद्धिश्च लाङ्गूलम् लांगूरम् कुस
श्च कुसूलम् कुवश्चट् दीर्घश्च कूची सिवेरूच् सूची॥ जितायंता सूतः क्षत्ता च सारथिरित्यमरः खर्जादेरूरः ऊरप्रत्ययमाह खर्ज आर्जवे खर्जूरः खर्जूरं रू
पफलयोः खर्जूरः कीटवृक्षयोरिति मेदिनी कृपूसामर्थ्ये बाहुलकात् रुपोरो लः इति लत्वाभावः कर्पूरं अथ कर्पूरमस्त्रियां घनसारश्चंद्रसंज्ञः सिताभ्रो हि
मवालुकेत्यमरः वल्लसंवरणे वल्लूरं वल्लूरं शुष्कमांसं स्यात् लंगेर्वृद्धिश्च लगिगतौ अस्मादूलप्रत्ययः स्यात् धातोर्वृद्धिश्च लांगूलम् लांगूलं पुच्छशेफसोरिति मेदि
नी कुससंश्लेषणे ऊलः निपातनाद्गुणाभावः कुसूलं कुसूलं च कुसीदं च मध्यदंतमुदाहृतं इति विश्वः कुवश्चट् दीर्घश्च कुशब्दे अस्माच्चट् प्रत्ययः स्यात् धातोः पा राम
सिकौ दीर्घश्च चट् प्रत्ययमाह टित्वाद्दीप् कूची कूची चित्रलेखनिका कुचकूचौ स्तनेमता विति विश्वः सिवेरूच् षिवु तंतुसंताने अस्माच्चट् स्यात् धातोरूश्च ३७
सूची दर्भांकुरः सूचीतुसीवनद्रव्ये व्यांगिकाभिनयांतरे इति मेदिनी॥

शमेर्वः शमु उपशमे अस्मात् वः स्यात् वप्रत्ययमाह शम्वः शंवः स्यान्मुशलाग्रस्थलोहमण्डले पवौ शुभान्विते त्रिष्विति विश्वमेदिन्यौ उल्वादयः वप्रत्ययांता निपात्यंते उच समवाये च स्यलत्वं गुणाभावश्च उल्वं गर्भाशयो जरायुः स्यादुल्वं तु कललोऽस्त्रियामिति मेदिनी शुच शोके च सलत्वं गुणाभावश्च निपातनात् शुल्वं शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसंनिधाविति मेदिनी ष्टुञ् गतिनिवृत्तौ अस्माद्वं बश्च वकणौ प्रत्ययौ निपातनात् धातोः यस्तत्वं च स्तंबः स्तंबकः स्तंबो गुल्मे तृणादीनामप्रकांडद्रुमे पि चेति विश्वः स्तंबो प्रकांडद्रुमगुच्छयोरिति मेदिनी स्याद्गुच्छकस्तु स्तबक इत्यमरः शाशपिभ्यां दः दप्रत्ययमाह शो तनूकरणे शादः शादो जंबाल शष्पयोरित्यम रः शादः स्यात्कर्दमे शष्प इति मेदिनी शष्पं बालतृणं घासइत्यमरः शप आक्रोशे शब्दो निनादः अब्दादयः दप्रत्ययांता निपात्यंते अवरक्षणे वस्य बः अब्दः अ ब्दः संवत्सरे वारिवाहमुस्तकयोः पुमानिति मेदिनी कुशब्दे निपातनान्नुम् कुंदः कुंदो माध्ये अस्त्री मुकुंद भ्रमि निध्यंतरेषु नेति मेदिनी वलिमलितनिभ्यः कयः कयप्रत्य

शमेर्वः ।शमुशम्वः। उल्वादयः। उच समवाये। उल्वः। सुल्वम्। स्या स्तंबः। स्तवकः। शाशपिभ्यान्दः। शादः। शब्दः। अब्दादयः। अवतीत्यब्दः। कुन्दः। वलिमलितनिभ्यः कयः। वलयम्। मलयः। तनयः। हृञो दुक् च। हरतीति हृदयम्। मिनोतेरुः। मेरुः। जन्वादयः। जन्तुः। अश्रुः। रुरुः। शातयतीति शत्रुः॥

यमाह विलखाद्गुणनिषेधादि वल संवरणे वलयः वलयः कंठरोगे नाकंकणे पुंनपुंसकमिति मेदिनी मलधारणेमलयः मलयः पर्वतांतरे शैलांशे देशआरामे त्रिवृतायां तुयोषितीति मेदिनी तनु विस्तारे तनयः आत्मजस्तनयः सूनुरित्यमरः हृञो दुक् हृञ् हरणे अस्मात् कयः स्यात् धातोर्दुगागमश्च ह्रियते विषयैरिति हृदयं मनः मिनोतेरुः रुप्रत्ययमाह डुमिञ् प्रक्षेपणे मेरुः मेरुः सुमेरुर्हेमाद्रिरित्यमरः जन्वादयः रुप्रत्ययांता निपात्यंते जनी प्रादुर्भावे नस्य तो निपातनात् जत्रुः संधीतस्यैव जत्रुणीत्यमरः तस्य स्कंधस्येत्यर्थः अशू व्याप्तौ अश्रु नयनजलं रुशब्दे निपातनाद्गुणाभावः रुरुः कृष्णसारुरुन्यंकुरंकुशंबररौहिषाइत्यमरः रुरुर्मृगे दैत्ये पि चेति मेदिनी शद्लृ शातने ण्यंतः शातयतीति शत्रुः णेरिति णिलोपः निपातनाद्ह्रस्वत्वं शत्रुः

कुसेरुंभोमेदेताः कुसुंभं श्रेषणे अस्मात् उंभ उम ईद इन एते प्रत्ययाः स्युः उंभादिप्रत्ययानाह कुसुंभं कुसुंभं हेमनि महारजने नाकमंडलाविति मेदिनी कुसुंभं कुसुमं स्त्रीरजो नेत्ररोगयोः फलपुष्पयोरिति मेदिनी कुसीदं कुसीदं जीवने वृद्ध्यां क्लीबं त्रिषु कुसीदके इति मेदिनी कुसि गोज नपदः नंडुलादयो निपात्याः नड आघाते उलप्रत्ययो नुमागमश्च निपात्यते नंडुलः नंडुलः स्यादिंहंगे च धान्यादिनिकरप्रमानिति मेदिनी अकिलक्षणे उश प्रत्ययो निपातनात् अंकुशः अंकुशोऽस्त्री सृणिः स्त्रि यामित्यमरः चष भक्षणे आल प्रत्ययो निपातनात् चषालः चषालो यूपकटक इत्यमरः पापाने वल प्रत्ययो निपात्यते लुगागमश्च धातोर्ह्रस्वत्वं च पल्वलमल्प सरः जिघ्रिघ्राप्राग्त्येण्य प्रत्ययः अरुत इत्वं च निपात्यते धिष्ण्यं धिष्ण्यं स्थाने गृहे भेऽग्नावित्यमरः धिष्ण्यं स्थाना ग्निस द्यसु क्रसे शक्ते चेति मेदिनी शल गतौ यप्र त्ययः शल्यं शल्यं तु न स्त्रियां शंकौ क्लीबं क्ष्वेडेषु तो मरे मदनदु म्ब्राविधोर्नेति मेदिनी मूङ् शक्यम्यविभ्यः क्नः क्न प्रत्ययमाह कित्वान्न गुणः मूङ् बन्धने मूलं मूलं बुध्नो

कुसेरुम्भोमेदेताः। कुसुम्भम्। कुसुमम्। कुसीदम्। कुसिनः। नण्डुलादयः। नड आघाते। नण्डुलाः। अकिलक्षणे। अङ्कुशः। चष चषालः। पल्वलम्। जिघ्रषा। धिष्ण्यम्। शल्यम्। मूङ्शक्यम्यविभ्यः क्नः। मूलम्। शल्कः। अम्लः। अविगतौ। अम्लः। मादेर्यः। माया। छाया। शस्यम्।

ङ्घ्रिनामक इत्यमरः शल्क शनेो शल्कः शल्कः प्रियंवद इत्यमरः अमरोगे चुरादिर्ण्यंतः बाहुलकादुपधाह्रस्वः ॥ पुत्रस्य व्यम्। जनेर्यक्। जाया। जन्यम् ॥

मेरिति यिलोपः। अम्लः अम्लो रसविशेषः स्यात् क्लीबं च गैरिकौषधाविति मेदिनी अवि शब्दे अंब्लो रसः मादेर्यः य प्रत्ययमाह मामाने माया माया स्याच्छांबरी बुद्धौ मयः पीनां बरे सुर इति मेदिनी छो छेदने छायाछायास्यादातपाभावे प्रतिबिंबार्कयोषितोः पालनोत्कोचयोः कांतिसच्छोभा पंक्तिषु स्त्रियामिति विश्वः षस स्व प्नेसस्यं वृक्षादीनां फले सस्यमित्यमरः पुत्र अभिषवे सव्यं सव्यं वामे प्रतीपे चेति मेदिनी सव्यं दक्षिणवामयोरिति विश्वः जनेर्यक् जन जनने अस्माद्यक् प्रत्ययः राम स्यात् जनस नेतिवात्वं जन्यं जायाजन्यं हट्टे परीवादे संग्रामे च नपुंसकं जन्या मातृवयस्यायां जन्यः स्याज्जनके प मान् त्रिषु सादौ न वोढायां स्निग्धे जा मातृभृत्ययो ३८

अघ्न्यादयः यक्प्रत्ययान्ता निपात्यन्ते हन हिंसागत्योः धातोरडागमः उपधालोपश्च निपातनात् हनो घ्न इति घः अघ्न्या नञ्पूर्वाद्धन्तेर्यक् उपधालोपश्चेत्यन्ये अघ्न्यः प्रजा
पतिः माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी अर्जुन्यघ्न्या रोहिणी स्यादित्यमरः कनी दीप्तौ कन्या कन्या कुमारिकाना र्यौ ओषधीराशिभेदयोरिति विश्वः वंध बंधने व
वयोरैक्यात् निपातनान्नलोपाभावः वंध्यः वंध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजस्त्रियामिति मेदिनी संपूर्वाद्ध्यै आ यक् आतो लोपश्च निपातनात् संध्या सायं
संध्या पितृप्रसूरित्यमरः अस गतौ देर्वन् वन् प्रत्ययमाह ऋ गतौ अर्वा अर्वा तुरगगर्ह्ययोरिति विश्वः अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिंगकः इति मेदिनी पृ पालना
दौ पर्व पर्वं क्लीबं महे ग्रंथौ प्रस्तावे लक्षणान्तरे दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपीति मेदिनी ध्याप्योः संप्रसारणं ध्यै चिन्तायां प्यैङ् वृद्धौ आभ्यां वन्प्रत्य
यः स्यात् धातोः संप्रसारणं च धीवा कर्मकरः पीवा स्थूलः अदेर्ध्रश्च अद भक्षणे अस्मात् वन् स्यात् दस्य धश्च अध्वा मार्गः धातोरिः इप्रत्ययमाह यज देवपूजादौ यजिः

अघ्न्यादयः हन् अघ्न्या कनी दीप्तौ कन्या वन्ध्या अस्यादेर्वन् अर्वा पर्व ध्याप्योः सम्प्रसारणं प्यैङ् ध्यैङ् वृद्धौ पीवा धीवा अदेर्धः अ
ध्वा धातोरिः यजिः वट वेष्टने वटिः जनिः बोधिः हरिः वर्तिः नाम्युपधात्किः रुषिः ऋषिः शुचिः लिपिः तूल निष्कर्षे तूलिः क्रमितमिशनिस्तम्भाम
नइच्चक्रिमिः तिमिः शितिः स्तिमिः ।

वट वेष्टने वटिः बुध अवगमने बोधिः बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे इति मेदिनी हृञ् हरणे हरिः हरिर्विष्णावहौ
विंह्रे भेके सिंहे हये रवौ चन्द्रे कोले प्लवंगे च यमे वाते प्रकीर्तितः वृतु वर्तने वर्त्तिः दीपोपकरणे नाम्युपधात्किः नाम्युपधाद्धातोः किः स्यात् किप्रत्ययमाह कित्वान्न गुणः रुष वि
लेखने रुषिः ऋषि गतौ ऋषिः ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयमिति मेदिनी शुच शोके शुचिः शुचिः शुद्धे सिते ऽनले ग्रीष्माषाढानुपहतेषूपधाशुद्धमंत्रिणि शृं
गारे इति हैमः लिप उपदेहे लिपिः बाहुलकाद्दलमपि लिविः तूल निष्कर्षे तूलिः कूर्चिका क्रमितमिशतिस्तंभामनइच्चएभ्यः किः स्यात् एषामनइकारादेशश्च क्रमु पादवि
क्षेपे क्रिमिः निपातनाद्ध्रस्वसंप्रसारणमपि भवति कृमिः कृमिर्ना कृमिवत्कीटे इति मेदिनी तमु कांक्षायां तिमिः तिमिर्मत्स्यभेदे शतिः सौत्रो धातुः शितिः शितिः कृष्णसिते भूर्जे द

मन्नेत्तश्च मनज्ञाने अस्मात्किः स्यात् अकारस्योकारादेशश्च मन्यते जानातीति मुनिः मुनिः पुमान् वसिष्ठादौ वंगसेनतरौ जिने इति मेदिनी वर्णे वेलिः वर्णिः सौत्रो
ऽस्मात्किः स्यात् धातोर्वेलिरादेशश्च बलिः करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियां वबयोरैक्यात् हलिः वपादेरिञ् इञ्प्रत्ययमाह जित्वात् वृद्धिः ट्वपूर्वो जनं तु संता
नेवापिः राजृ दीप्तौ राजिः राजिः स्त्री पंक्तिरेखयोरिति मेदिनी वृञ् वरणे ज्यंतः अरिरिति ञिलोपः वारिः वारिः स्मृता सरस्वत्यां वारि क्लीभेद्नीरयोरिति विश्वः इ. दिकारादिती पृतु
पाक्षिकः सर्वत्र भवति वारी तु गजबंधनी त्यमरः वारिः पथिक संहतौ इति च नहो भः णह बंधने अस्मादिञ् स्यात् हस्य भश्च नाभिः नाभिर्मुख्यनृपे चक्रमध्यक्षत्रि
ययोः पुमान् द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे इति मेदिनी जनी प्रादुर्भावे इञ् जनिवध्योरिति न वृद्धिः जनिः कृदिकारादिति पक्षे ङीप् जनी जनी
सीमंतिनी वध्वोरुत्पत्तौ वौषधौ नद्येति मेदिनी अज गतौ क्षेपणे च बाहुलकादजेर्वीभावो न आजिः संग्रामः अत सातसगमने आतिः पक्षी अश शेरुट् अमूङ् व्याप्तौ अ

मनेरत उच्च । मुनिः । वर्णो वेलिश्च । वर्णो वर्णने सौत्रः । बलिः । वपादेरिञ् । वापिः । राजिः । वारिः । नहो भः । नाभिः । जनिः । आजिः । आतिः । अशेरुट्
राशिः । वातेर्डित् । विः । नौ व्यादयः । निपूर्वो व्येञ् । नीविः । प्रहिः । समाने ख्यायते जनैरिति सखा । आङ्पूर्वौ श्रीहनी । अश्रिः । अहिः ॥ ०

स्मादिञ् प्रत्ययो धातोरुडागमश्च स्यात् राशिः राशिर्मेषादि पुंजयोरिति मेदिनी वातेर्डित् वा गतिगंधनयोः अस्माड्डिन् स्यात् डित्वाट्टिलोपः विः पक्षी स्त्रियां वी सपि
नी व्यादयः डिप्रत्ययो नानिपात्यंते निपूर्वः व्येञ् संवरणे डित्वाट्टिलोपः नेर्दीर्घो निपात्यते यत इति लोपः नीविः कृदिकारादिति ङीपि नीवी स्त्री कटीवस्त्रबंधेपि नीवी परि
पणेपि चेत्यमरः परिपणो मूलधनं हञ् हरणे टिलोपः प्रहिः पुंसि वांधुप्रहिः कूपे इत्यमरः ख्या प्रकथने टिलोपे सति यलोपः सहादेरिति समानस्य सादेशः सेर्डा घेरिति डास
खा आङ्पूर्वौ श्री हनी श्रिञ् सेवायां टिलोपे सति आङो ह्रस्वो निपातनात् अश्रिः स्त्रियः पाल्यश्रिकोटय इत्यमरः दंतस्य सकारवांस्तु अदंतः अस्त्रः कोणकचे पुंसि क्ली राम
बमश्रुणि शोणिते इति मेदिनी आङ्पूर्वो हन हिंसागत्योः टिलोपे सति आङो ह्रस्वो निपातनात् अहिः अहिर्वृत्रासुरे सर्पे इति मेदिनी ० ॥ ६ ॥ ६ ३९

क्रादेः किः किप्रत्ययमाह किस्त्वान्नगुणः कृविक्षेपे कॄत इत्निरीर् किरिः वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः गृ रुङ्गा भ्यश्चेति कप्रत्यये अर इन्तोप्यस्ति त्वचिः
लचः किरोपि स्यात् किरौ श्वाञः पयः पयि इति हि रूपकोशः गॄ निगरणे गिरिः गिरिर्नानेत्ररुग्भिदि अद्रौ गिरी यवके योषित् गीर्णौ पूज्ये पुनस्त्रिषु इति मेदिनी पॄ पाल
नादौ पोरुरित्युर् पुरिर्नगरंराजान दौ च मन् धातोः मन् प्रत्ययमाह डुकृञ् करणे क्रियते इति कर्म कर्मे व्याप्ये क्रियायां च पुंनपुंसकयोर्मतमिति रुद्रः चर गत्या
दौ चर्म चर्म कृत्तौ च फलके इति मेदिनी भस भर्त्सनदीप्त्योः भस्म जन जनने जन्म छद अपवारणे चुरादिः इस्मनित्रिति ह्रस्वः णेरनिटि णिलोपः छद्म त्रैङ् पालने सुत्रा
यते इति सुत्रामा इन्द्रः बृंहेर्नस्य अः बृहि वृद्धौ वस्मान्मन् स्यात् तन्मोनस्य अकारे कृते रत्वं ब्रह्म ब्रह्मन् तत्त्वे तपो वेदे न द्वयोः पुंसि वेधसि ऋत्विग्योगभिदौ विप्रे इति मेदि
नी ब्रह्म तत्त्वं तपो वेदे ब्रह्मा विप्रः प्रजापतिरित्यमरः नामादयः मन्प्रत्ययान्ता निपात्यन्ते म्ना अभ्यासे म्नायते ऽनेनेति मलोपो निपातनात् नाम आख्या ह्व अभिधानं च ना

क्रादेः किः' कृ किरिः' गॄ गिरिः' पॄ पुरिः' मन् धातोः' कर्म' चर्म' भस्म भर्त्सनदीप्त्योः' भस्म जन्म' छद्म' सुत्रामा' बृंहेर्नस्य अः' ब्रह्म नामादयः' म्ना नाम'
षि अ सीमा व्ये अ व्योमरु रोमपै शोषणे पाप्मा वेमा' अतेर्मनिण्' आत्मा हनि मशिभ्यां सिकः' हंसिका मश शब्दे मक्षिका कोरः' कबरः' गिर

मध्ये यं च नाम चेत्यमरः षो अन्तकर्मणि साम साम ज्ञो बमुपायस्य भेदे वेदांतरेपि चेति मेदिनी षिञ् बंधने सिनोते र्दीर्घो निपात्यते सीमा सीमसीमे स्त्रियामुभे इत्यमरः व्येञ् संवरणे
अस्य व्योत्वम् निपातनान्न गुणः व्योम रु शब्दे रोम गात्रके शः पापाने सुगागमो निपात्यते पाप्मा पापम् वेञ् तंतु संताने वेमा तंतुवायदंडः अद ईचादिः अतेर्मनिण् णित्वाद्
हिः इकार उच्चारणार्थः अत सातत्यगमने आत्मा आत्मा स्यात् सिस्वभावेपि प्रयत्नमनसोरपि धृतावपि मनीषायां शरीर ब्रह्मणोरपीति मेदिनी हनिमशिभ्यां सिकः आभ्यां सि
कप्रत्ययः स्यान सिक प्रत्यय महहनहिं — गत्योः हंसिका हंसिका हंसयोषिति मश शब्दे रोषकृते च छ शाधेनि षत्वम् षढोरिति कत्वं षत्वं च मक्षिका मक्षिका भ्रमराली
स्यादि निहारावल्यो कोररः कुङ् शब्दे अस्मादरः स्यात कवरः पावकः बवयोरैक्यात् ईपि प्रत्यये कवरी केशविन्यासः अन्यत्र कवरा गिर उ इः गॄ निगरणे अस्मादुइ प्रत्ययः बरः

इंदेः कमिर्नलोपश्च इदि परमैश्वर्ये अस्मात्कमिः स्यात् नलोपश्च कित्वाद्गुणो न इकार उच्चारणार्थः इदमिति सर्वादिगणशब्दोऽयं सन्निहितपरामर्शी कायतेर्डिमः के शब्दे अस्मान्डिमप्रत्ययः स्यात् डित्वाट्टिलोपः किम् धानोः ष्ट्रः त्रप्रत्ययमाहवसनिवासे वस्त्रं असुक्षेपणे अस्त्रं अस्त्रं प्रहरणे चापे करवाले न पुंसकमिति मेदिनी छद अपवारणे चुरादिर्ण्यन्तः इस्मने निहूस्वत्वं ऐरिति णिलोपः छत्रं सिविमुच्योष्टेरू आभ्यां त्रप्रत्ययः स्यात् अनयोष्टेरूकारादेशश्च कित्वान्न गुणः षिवु तंतुसंताने सूत्रं सूत्रं तु सूचनार्थे सूत्रे तंतुव्यवस्थयोरिति विश्वः मुत्रूमोक्षणे मूत्रं अम गत्यादिषु अमगतिशब्दसंभक्तिषु अमंतस्येति दीर्घः आत्रं चिञ् चयने चित्रं आलेख्याश्चर्ययोश्चित्रमित्यमरः ञिमिदा स्नेहने मित्रं मित्रं सुहृदि न द्वयोः सूर्ये पुंसि इति मेदिनी उपदाहे शुत्वं उषः उष्ट्रः उक्षमेहक मयमहांगा इत्यमरः पूञ् हूस्वश्च पूञ् पवने अस्मान्क्त्रः स्यात्

इन्देः कमिर्नलोपश्च॥ इदम्॥ कायतेर्डिमः॥ किं॥ धानोः ष्ट्रः॥ वस्त्रम्॥ अस्त्रम्॥ छत्रम्॥ सिविमुच्योष्टेरू॥ षिवुसूत्रम्॥ मुत्रूमूत्रम्॥ अमादेः क्त्रः॥ आत्रम्॥ चित्रम्॥ मित्रम्॥ वशाउष्ट्रः॥ पूञो हूस्वः॥ पुत्रः॥ स्यायतेर्ड्रट्॥ स्त्री॥ गमेरा॥ गात्रम्॥ चरादेरित्रञ्॥ चारित्रम्॥ वादित्रम्॥ अशित्रादिभ्य इत्रोत्रौ॥ अशित्रम्॥ वहित्रम्॥ धरित्री॥ अमित्रः॥ त्रैङ्॥ श्रोत्रम्॥ चिनेः कणः॥ कृश्च॥ चिक्कणम्॥

धानोर्हूस्वत्वं च पुनाति स्ववंश्यानिति पुत्रः पुत् नरकः तस्मात् त्रायते इति आनोडः इति डप्रत्यये पुत्र इति व्युत्पत्त्यंतरं स्यायतेर्ड्रट् स्त्यै ष्ट्यै शब्दसंघातयोः अस्मान्ड्रट् स्यात् टित्वाद्दीप् डित्वाट्टिलोपः यवयोर्वले इति यलोपः स्त्री स्त्री योषिदबला योषा नारी सीमंतिनी वधूरित्यमरः गमेरा गमॢ गतौ अस्मात्कः स्यात् त्रप्रत्ययश्च गात्रं गात्रमंगे कलेवरे स्याद्वेरमाग्रजंघादिविभागेपि समीरित इति विश्वः चरादेरित्रञ् इत्रञ् प्रत्ययः स्यात् ञित्वाद्वृद्धिः चर गतौ चारित्रं वद व्यक्तायां वाचि ण्यंतः वादित्रं तूर्यादिः अशित्रादिभ्य इत्रोत्रौ अशिश्च त्रा च तौ अशित्रौ अशित्रौ आदी येषां ते अशित्रादयस्तेभ्यः इत्रोत्रौ श्रूयमाणः शब्दः प्रत्येकं संबध्यते इत्यादिशब्दः प्रत्येकं योज्यः अशूङ् व्याप्तौ इत्यादिभ्य इत्रः प्रत्ययः स्यात् त्रैङ् पालने इत्यादिभ्यः उत्रप्रत्ययः स्यात् अशूङ् अशित्रं वह प्रापणे वहित्रम् धृञ् धारणे धरित्रं ईपि धरित्री अम गतौ अमित्रः शत्रुः मित्रं नेति विग्रहे तु मित्रमिति न पुंसकं त्रैङ् आदेः उत्रे च श्रोत्रं प्रहरणं कृत्र वरणे वरु

त्रम्मावरणंचिते ः क्नणः कश्चचिनी संज्ञाने अस्मात् क्नणप्रत्ययः स्यात् तस्य कश्च बाहुलकाद्गुणाभावः चिक्कणं चिक्कणं मसृणं स्निग्धमित्यमरः ॥ ः ॥ सृचेः स्मः सूचपैशून्ये
चुरादिः स्मात् स्मप्रत्ययः स्यात् णेरिति णिलोपः कुत्वषत्वे सूक्ष्मं सूक्ष्मं स्यात्त्वं टके ऽध्यात्मनि पुंस्यणौ त्रिषु चाल्पकेऽ इतिमेदिनी पातेर्डुम्सुन् पार रक्षणे ऽस्मात् डुमसुन् प्रत्ययः
स्यात् डित्वाट्टिलोपः उदित्वात् स्त्रियामीप् पुंसी पुंसो ऽसुङि इत्यसुङ् पुमान् भुजादेः क्विष्यः भुज पालनादौ अस्मात् किष्यप्रत्ययः स्यात् कित्वान्न गुणः भुजिष्यः भुजिष्य
सुस्वतंत्रे चहस्तसूत्रकयोस्त्रियामिति मेदिनी भुजिष्यः परिचारक इत्यमरः वसादेस्तिः तिप्रत्ययमाह वस निवासे वस आच्छादने च वस्तिः वस्तिर्द्वयोर्निरूहे नाभ्यधो
भूम्नि दशासु चेति मेदिनी वस्तिर्नाभेरधो द्वयोरित्यमरः शासु अनुशिष्टौ शास्तिः राजदंडः षसु क्षेपणे विंध्याख्यमगमस्यतीति अगस्तिः हलादेरिति टिलोपः अगस्तिः
अगस्तिः कुंभयोनौ च वंगसेनतरौ पुमानिति मेदिनी वीतसेः तसु उपक्षये अस्मात् विपूर्वात्तिः स्यात् वित[—]स्तिः अंगुष्ठे सकनिष्ठे स्यात् वितस्तिर्द्वादशांगुलः इत्यमरः स्त्रीपुंसयोर्वित

सृचेस्स्मः । सूक्ष्मम् । पातेर्डुम्सुः । पुमान् । भुजादेः क्विष्यः । भुजिष्यो दासः । वसादेस्तिः । वस्तिः । शास्तिः । अगमस्यतीति अगस्तिः । वीतसेः तसु उपक्षये वि
तस्तिः । पतिः । हणातेर्ह्रस्वः । हतिः । हृतॄकृपिभ्यः कीटः । किरीटम् । तिरीटम् । कृपीटम् । धानोरसुः । चेतः । सरः । पयः । अशेर्युड्सुनौ सूयते इति यशः ॥

तिः स्यादित्यमरमालापदगतौ पतिः हणातेर्ह्रस्वः हृ विदारणे अस्मात् तिः स्यात् धातोर्ह्रस्वत्वं च हतिः हतिश्चर्मपुटे मत्स्यनाइतिमेदिनी हृतॄकृपिभ्यः कीटः कीटप्रत्य
यमाह कित्वान्न गुणः हृ विक्षेपे ऋतइद्धातोरिति इः किरीटं किरीटं मुकुटे नस्त्रीति चंद्रगोमी तृप्लवनसंतरणयोः ऋत इद्धातोः तिरीटं सुवर्णे शिरोवेष्टनं च कृपू सामर्थ्ये कृपीटं कृपीटमुद
रनीरे इति विश्वः धानोरसुः असुप्रत्ययमाह उदित्वात् दीपि चित संचेतने चितो संज्ञाने चुरादिश्च चेतः चित्तं तु चेतो हृदयं स्वांतं हृन्मानसं मनः इत्यमरः सृ गतौ सरः ई
षि सरसी सरसी तु महासरः इति शब्दार्णवः महांतिसरांसि सरस्य इति भाष्यम् पय गतौ पीङ् पाने च पयः पयः स्यात् क्षीरनीरयोरिति मेदिनी अशेर्युड्सुनौ अशूङ्
व्याप्तौ अस्मात् असुः स्यात् धातोर्युडागमश्च यशः कीर्तिः ॥

उब्जे र्बैलेवलोपः उब्ज आर्जवे अस्मादसुः स्यात् वले वाच्ये वस्य लोपश्च ओजः ओजो दीप्ताववष्टंभे प्रकाशबलयोरपीति मेदिनी श्रिञः शिरः किञ्च श्रिञः सेवा
यां अस्मादसुः स्यात् स च कित् धातोः शिरादेशश्च शिरः उत्तमांगं शिरः शीर्षमित्यमरः कप्रत्यये तु शिरस्कं दंतोपि शिरो वाचीशिरोदंतोऽजोवाचीत्यजसयेतिकोशं तरं पिंडं द्
या हृदया शिरे इति वा सुपुराणे कुण्डलैर्घृष्टगंडानां कुमाराणां नरस्विनां नि चकर्त शिरान् द्रौणिर्नो लेभ्य इव पंकजानि निमहाभारते अर्तेरुः ऋगतावस्मादसुः
स्यात् स च कित् धातोरुरादेशश्च उरः उरो वत्सं च वक्षश्चेत्यमरः व्याधौ शुट् ऋ गतौ अस्मादसुः स्यात् प्रत्ययस्य सुडागमश्च स्यात् व्याधौ वाच्ये अर्शः गुद व्या
धिः उदके नुट् अर्तेरसुः स्यात् तस्य नुट् च अर्णः जलम् इणः आगसि इण गतावस्मात् पापे वाच्ये सुः स्यात् प्रत्ययस्य नुगागमश्च पापे वाच्ये एनः पापम् स्रुरीभ्यां तुट् च

उब्जेर्बले बलोपः। ओजः। श्रिञः शिरः किञ्च। शिरः। अर्तेरुरः। उरः। व्याधौ शुट्। अर्शः। उदके नुट्। अर्णः। इण आगसि। एनः। स्रुरीभ्यां तुट्।
स्रोतः। रेतः। पातेरुदके थुट्। पाथः। अदेर्भं के धो नुम् च। अन्धः। आप उदके ह्रस्वो नुम्भौ। अम्भः। नहेर्दिवि भः। नभः। इण आग अपराधे। आगः॥

स्राभ्यामसुः स्यात् प्रत्ययस्य तुडागमश्च स्रु गतौ स्रोतः स्रोतोंबुवेगेंद्रिययोरिति विश्वः रीङ् स्रवणे रेतः रेतःशुक्रे पारदे चेति मेदिनी पातेरुदके थुट् पा रक्षणे अस्माद
सुः प्रत्ययः स्यात् प्रत्ययस्य थुडागमश्च पाथः कबंधमुदकं पाथ इत्यमरः अदेर्भं के धो नुम् च अद भक्षणे अस्मादसुः स्यात् धातोर्दस्य धो नुम् च अंधः भिस्सा स्त्री भक्तमं
धोन्नमित्यमरः आप उदके ह्रस्वो नुम् भौ आप्लृ व्याप्तावस्मादसुः स्यात् धातोर्ह्रस्वत्वं च नुमागमो भश्चांतादेशः उदके वाच्ये अंभः उदकं नहेर्दिवि भः णह बंधने अस्मात् गगने वा
च्ये असुः स्यात् भश्चांतादेशः नभः नभो व्योम्नि नभो मेघे श्रावणे च पतन् ग्रहे घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतं इति विश्वः नभः खं श्रावणो नभा इत्यमरः नभंतु नभसा साहुमिति हि रूपकोशः इण आग अपराधे इण गतावस्मादसुः स्यात् अपराधे वाच्ये धातोरागादेशश्च आग आगः पापापराधयोरिति विश्वः आगोपराधो मंतुश्चेत्यमरः॥

अमेर्हुक् अ मगत्या दावस्मादसुः स्यात् धातो र्हुगागमश्च अ मंति गच्छंत्यधस्तादनेनेति अंहः दुरितं रमेश्च र मुक्रीडायामस्मादसुः स्यात् धातोर्हुगागमश्च रंहः वेगः
देशेवाच्येर मेरसुः स्यात् धातोर्मस्यह श्च रहः रहस्तत्त्वे रते गुह्ये इति मेदिनी रंज्यादेः कित् असुः स्यात् स च कित् रंज रागे कित्वान्नलोप इति नलोपः रजः रजः क्लीबं गुणे
नरे आर्त्तवे च परागे च रेणुमात्रे पि दृश्यते इति मेदिनी क प्रत्यये अकारांतोपि रजोयं रजसा साई स्त्री पुष्पगुण धूलिष्वि — त्यजयकोशः भूसत्तायां तु धातोरसुन् भुवः
अंतरिक्षं वषट्ष्यंतप्रतिरूपकमव्ययमिदं वसेर्णित् वस निवासे अस्मादसुः स्यात् स चाणित् णित्वाद्वृद्धिः वासो वस्त्रम् चंदेरादेश्च छः चदि आल्हादने अस्मादसुः स्या
त् धातोश्छस्य छश्च छंदः छंदः पद्यप्रभेदे पि स्वैराचाराभिलाषयोरिति मेदिनीक प्रत्यये अदंतोप्ययं छंदावभिप्रायवशाविति द्विरूपकोशः वचादेसुट् वच परिभाव
णेइत्यादिभ्योऽसुः स्यान्प्रत्ययस्य सुडागमश्च चस्य कत्वम् सस्य षत्वं वक्षो हृदयं ड्पचषष्णाकेपसः पससीतु स्मृतोपसौ इति नञि हन एह च असि प्रत्यय माहनञ्युपप

अमेर्हुक् अंहः रमेश्च रंहः । देशे ह्रुच्वंर मंतेऽस्मिन् रहः । रंज्यादेः कित् रजः । भुवः । वसेर्णित् । वासः । चंदेरादेश्च छः । छन्दः । वचादेस्सुट् वक्षः ।
पसः । नञि हनएह च अनेहाः । अनेहसौ विधाञो वेध च वेधाः । चन्द्रे माङो डित् चन्द्रमाः । पुरसि धाञः । पुरोधाः । उषः कित् । उषः । दमेरुनसिः ।

देहनेरसिप्रत्ययः स्यात् धातोरेहादेशश्च इकार उच्चारणार्थः हन हिंसागत्योः उशनसामितीतिसेर्डी अनेहाः कालः विधाञो वेध च इधाञ् धा ((दसुनाः ॥
रणादौ विपूर्वादस्मादसिः स्यात् सोपसर्गस्य धातोर्वेधादेशश्च विद् धातीति वेधाः अत्वसोः सावितिदीर्घः वेधाः वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनीति मेदि
नी चंद्रे माङो डित् चंद्रोपपदान्माङोऽसिः स्यात् स च डित् डित्वाट्टिलोपः माङ् माने चंद्रं रंजनममृतं च मिमीतेऽसौ चंद्रमाः अत्वसोः सावितिदीर्घः पुरसि धाञः पुर
सशब्दे उपपदे धाञोऽसिप्रत्ययः स्यात् डुधाञ् धारणादौ पुरोधाः पुरोधास्तु पुरोहित इत्यमरः उषः कित् उष दाहे अस्मादसिः स्यात् स च कित् कित्वान्न गुणः उषः प्रभातं दमे
रुनसिः दमु उपशमे अस्मादुनसिः स्यात् दमुनाः सप्तार्चिर्दमुनाः शुक्र इत्यमरः ॥

सि॰चं॰ वशेः कनसिः वश कांतावस्मात् कनसिः स्यात् कित्वाद् ग्रहादिमिति संप्रसारणं उशनाः उशना भार्गवः कविरित्यमरः अंगिरसादयः असिप्रत्ययांतानि पात्यंते अगिगतौ अ-
रू॰ उ॰ सिप्रत्ययस्य इडागमो निपातनात् अंगिराः ऋषिभेदः अपपूर्वः सर्तिः सृगतावपपूर्वः अप्सराः स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा इति शब्दार्णवः अप्सरस्त्वप्सराः प्रोक्ताः सुम-
४२ नाः सुमनः सु चेति हि रूपको शः पुरुरूर्वौ रौतिः रुरूपदेशः पूर्वः पुरुशब्दांतस्य दीर्घो निपातनात् पुरूरवाः पुरूरवा बुधसुनो राजर्षिश्च पुरूरवा इत्यमरः ॥ ४ ॥ इत्युणादिषु चतुर्थः पा-
दः ॥४॥ अदि भुवो डुतः अदिस्व्ययमाकस्मिकार्येतस्मिन्नुपपदे भू धातोर्डुतः स्यात् डित्वाट्टिलोपः अद्भुतं आश्चर्यम् गृधेरूमः गृधपरिवेष्टने अस्माद् ऊमः स्यात् गुध्य-
ते वेष्ट्यते प्राणिभिरिति गोधूमः गोधूमो नागरंगे स्याद्दोषधी व्रीहिभेदयोरिति मेदिनी मसेरूरः मसी परिणामे अस्मात् ऊरः स्यात् मसूरः तृहेः क्नो हलोपः तृहहिं-

वशेः कनसिः उशनाः अंगिरादयः अगि अङ्गिराः अपपूर्वस्सर्तिः अप्सराः पुरू पूर्वौ रौतिः पुरूरवाः इत्युणादौ चतुर्थः पादः अदि
भुवो डुतः अद्भुतम् गृधेरूमः गोधूमः मसेरूरः मसूरः तृहेः क्नो हलोपः तृणम् दंसेष्टोनआ च दासः दंशेश्च दाशः सौरमेः क्तः सो-
र्दीर्घः सूरतः पूञो यो णुक् ह्रस्वश्च पुण्यम् स्रंसतेः शिर्यस्य कित्वं कुट् च शिक्यम् ॥ सायामस्मात् क्नः स्यात् धातोर्हस्य लोपश्च कित्वाद्गुणाभा-
वः तृणं दंसेष्टोन आ च दसि दंश नदर्शनयोरस्माट्ट्प्रत्ययः नस्यात्वं च टित्वादीप् दासः दासः शूद्रे दानपात्रे भृत्यधीवरयोरपीति विश्वः दंशेश्च अस्माट्टोपि
टः स्यात् नस्यात्वं च दाशः कैवर्ते दाशधीवरावित्यमरः सौरमेः क्तः सोर्दीर्घः रमु क्रीडायां सुपूर्वादस्मात् क्तः स्यात् पूर्वपदस्य दीर्घश्च कित्वाल्लोपस्त्वनुदात्तेनना-
मिति मलोपः सूरतः उपशांतो दयालुश्च पूञो यो णुक् ह्रस्वश्च पूञ् पवने अस्माद्यः प्रत्ययः स्यात् धातोर्णुक् ह्रस्वश्च पुण्यं पुण्यं मनोज्ञेऽभिहिते न यासुकृतधर्मयोरितिवि- राम
श्वः स्रंसतेः शिर्यस्य कित्वं कुट् च स्रंसु अधःपतने अस्माद्यः स्यात् स च कित् प्रत्ययस्य कुडागमश्च धातोः शिरादेशश्च शिक्यम् ॥ ४२

अर्त्तेः क्वुरुट् च ऋगतौ अस्मात् क्वुः प्रत्ययः स्यात् धातोरुरादेशश्च कित्वान्न गुणः युवोरित्यनादेशः उरणः मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके इत्यमरः उदि दृणाते
र उदो दलोपश्च दृ विदारणे अस्माद् उद्पूर्वाद् अः स्यात् उदो दस्य लोपश्च उदरं खनेर्मुट् डप्रत्ययः स्यात् खनु अवदारणे अस्मान् डः प्रत्ययः स्यात् धातोर्मुडागमश्च डि
त्वाट्टिलोपः मुखं मुखं निःसरणे वक्त्रे प्रारंभोपाययोरपि संध्यंतरे नाटकादौ शब्देपि च नपुंसकमिति मेदिनी मुख मुख्ये प्रारंभे श्रेष्ठे निःसरणास्ययोरिति हैमः अमेः
सः अम गतौ अस्मात् सप्रत्ययः स्यात् अंसः स्कंधो भुजशिरोंसोऽस्त्री इत्यमरः अंसः स्कंधो विभागे चेति विश्वः मुहेः खो मूर्च मुह वैचित्ये अस्मात् खप्रत्ययः स्यात्
धातोर्मूरादेशश्च मुह्यतीति मूर्खः अज्ञे मूढयथाजातमूर्खवैधेयबालिशा इत्यमरः नहेर्हलोपश्च नह बंधने अस्मात् खप्रत्ययः स्यात् हकारस्य लोपश्च नखः

अर्त्तेः क्वुरुट् च। उरणः। उदि दृणातेर उदो दलोपश्च। उदरम्। खनेर्मुट् डप्रत्ययः। मुखम्। अमेः सः। अंसः। मुहेः खो मूर्च। मूर्खः। नहे
र्हलोपश्च। नखः। शीङो ह्रस्वश्च। शिखा। माङ ऊखो मयच। मयूखः। गलेः फग स्योच्च। गुल्फः। स्पृशेः श्वण्शुनौ पृच। पर्शुः। पार्श्वः॥

नखः कररुहे शंढे गंधद्रव्ये नखं नखीति विश्वः नखो स्त्री क्लीबयोः शुक्तौ नखरे पुंनपुंसकमिति मेदिनी शीङो ह्रस्वश्च शीङ् स्वप्ने अस्मात् खः स्यात् धातो
ईस्वश्च ह्रस्वविधानसामर्थ्याद्गुणाभावश्च शिखा शिखा शाखा बर्हि चूडा लांगलिकाग्रमात्रके चूडामात्रे शिफायां च ज्वालायां प्रपदेपि चेति मेदिनी माङ ऊ
खो मयच्च माङ् माने अस्मादूख प्रत्ययः स्यात् धातोर्मयादेशश्च मयूखः मयूखस्त्विट्करज्वालास्त्विति अमरः गलेः फः गस्योच्च गल अदने अस्मात् फप्रत्ययः
स्यात् धातोरकारस्योत्वं च गुल्फः तद्ग्रंथी घुटिके गुल्फौ इत्यमरः तयोः पादयोर्ग्रंथीरित्यर्थः स्पृशेः श्वण्शुनौ पृच स्पृश स्पर्शने अस्मात् श्वण्शुनौ प्रत्ययौ स्तः धा
तोः पृ इत्यादेशश्च णित्वाद्वृद्धिः पर्शुः पार्श्वः पर्शुरस्त्रीकक्षयोरधः इति पार्श्वमंतिके कक्षाधोवयवे वक्रोपाये पर्शुसमूहयोरिति हैमः ॥ ६ ॥ ६ ॥
॥ ॥

सि· चं· श्मनिश्रिञोडुन्श्रिञ्सेवायामस्मान्शम्युपपदेडुन्स्यान्डित्वाट्टिलोपःश्मन्शब्दोमुखवाचीमुखमाश्रयतेइतिश्मश्रुनोलोपइतिनलोपःनहृद्धौश्मश्रुपुंस्मु
कृ· उ· खेइत्यमरःपुरुषमुखेनेषांरोमाणांवृद्धौश्मश्रुशब्दोवर्त्ततेइत्यर्थःजनेरःजंघचजनीप्रादुर्भावेअस्मादप्रत्ययःस्यान्धातोर्जंघादेशश्चजंघाहन्तेःशरीराव
४३ यवेद्वेचहनहिंसागत्योरस्मादःस्यान्धातोर्द्वित्वंचपूर्वान्हन्तेरितिहस्यघःजघनंपश्चान्नितंबःस्त्रीकट्याःक्लीबेतुजघनंपुरइत्यमरःक्लिशेर्लस्यलोपश्चक्लिशूविबाध
नेअस्मादःस्यान्धातोर्लकारस्यलोपश्चकेशःकेशःस्यात्पुंसिवरुणह्रीबेरकुंडलेपिचेतिमेदिनीफलेरितःफस्यपःफलनिष्पत्तौअस्मादितप्रत्ययःस्यान्धातोरा
देर्वर्णस्यपत्वंचपलितंपलितंजरसाशौक्ल्यमित्यमरःपलितेशैलजेतापेकेशपाशेचकर्दमेइतिमेदिनीकृञादेर्वुःवुप्रत्ययमाहयुवोरित्यकादेशश्चडुकृञ्करणेक

श्मनिश्रिञोडुन् । श्मन्शब्दोमुखवाची श्मानम्मुखंश्रयते श्मश्रु जनेरोजंघच । जंघा । हन्तेःशरीरावयवेद्वेचज
घनम् क्लिशेर्लस्यलोपश्च । केशः । फलेरितःफस्यपः ॥ पलितम् कृञादेर्वुः । करकः । कटकः । करगतौ ॥ कोरकः । नरकः ॥ चीकय
तेराद्यन्तविपर्ययः । चीकृशब्दे । कीचकः । पचिमच्योरिरतः । पेचकः । मेचकः । मचशब्दे ॥ ६ ॥ ७ ॥ ६ ॥

ति
रकःकमंडलुःकरकावृष्टिपाषाणःकटेवर्षावरणयोःकटकोवलयःनृनयेनरकःस्यान्नारकस्तुनरकोनिरयोदुर्गतिःस्त्रियामित्यमरःनरकःपुंसिनिरयेदैत्यान्तरप्रभे
दयोरितिमेदिनीचीकयतेराद्यन्तविपर्ययःचीकआमंत्रणेचुरादिरस्माद्यन्तविपर्ययःवुश्चकीचकःअरितिणिलोपःकीचकोध्वनिमद्वंशेदैत्यभेदेद्रुमान्तरेइतिहैमःप
चिमच्योरिरतःएतयोरुपधायाअतःईःस्यात्वुप्रत्ययश्चगुणःडुपचष्पाकेपेचकःउलूकेकरिणःपुच्छमूलोपान्तेचपेचकइत्यमरःपेचकोगजलांगूलमूलोपान्तेचकौ राम
शिकेइतिमेदिनीमचिकल्कनेमेचकःमेचकस्तुमयूरस्यचन्द्रकेश्यामलेपुमान्तद्गुणेवाच्यवत्क्लीबंस्रोतोञ्जनान्धकारयोरितिमेदिनी ॥ ६ ॥ ६ ॥ ४२
॥ ॥

जनेररष्ठच जनजनने जनी प्रादुर्भावे च आभ्यामर प्रत्ययः स्यात् धातोर्नस्य ठश्च जठरः जठरः कठिनेपि स्यादित्यमरः हर्यतेः कन्यः हिरुच हर्य गतिकांत्योरस्मात् कन्य प्रत्ययः
स्यात् धातोर्हिरादेशश्च कित्वान्न गुणः हिरण्यम् सुवर्णम् कृञः पासः डुकृञ् करणे ऽस्मात् पास प्रत्ययः स्यात् कर्पासः अणि प्रत्यये कार्पासं वस्त्रं ऊर्णोतेर्डः ऊर्णुञ्
आच्छादने अस्माड्डुड प्रत्ययः स्यात् डित्वाट्टिलोपः ऊर्णा ऊर्णा मेषादिलोम्नि स्यादावर्ते चांतरा भ्रुवावित्यमरः भ्रुवोर्मध्ये य आवर्तस्तत्रेत्यर्थः अंतरा योगे भ्रुवावि
ति द्वितीया दधातेर्यौ नुट् च डुधाञ् धारणपोषणयोरस्माद्य प्रत्ययः स्यात् प्रत्ययस्य नुडागमश्च धान्यं धान्यं व्रीहिषु धान्याके इति मेदिनी तनोतेर्डउः सवश्च तनु विस्ता
रे अस्मात् डउः प्रत्ययः स्यात् सडउप्रत्ययः सप्रत्ययतुल्यो भवति तेन हित्वादि डित्वाट्टिलोपः यःसे इति पूर्वे सत्वं नित तउः तिनउः पुंसि क्लीबे च वपुः यशुच्चारणे हृयोः साम ध्योडुणो न चा
लनोतितउः पुमानित्यमरः अर्भकादयः अर्भकादयो निपात्यंते ऋधु वृद्धौ अस्मात् कप्रत्ययो धातोर्धकारस्य भश्च निपात्यते अर्भकः अर्भकः कथितो बाले मूर्खेपि कृशिपोतयोरिति मेदिनी

जनेररष्ठच जठरम् हर्यतेः कन्यो हिरुच हिरण्यम् कृञः पासः कर्पासः ऊर्णोतेर्डः ऊर्णा दधातेर्यो नुट् च धान्यम् तनोतेर्डउः
सवश्चेति उः अर्भकादयः ऋधु अर्भकः प्रथेः ष्कन् संप्रसारणं च प्रथ पृथुकः पिबतेः कः पाकः वदेर्नञि यः अवद्यम् अव अवमः अधमः क्लिशेरः कीना
शः चतेरुरः चत्वारः हंते घुरुच्च घोरं ॥

प्रथेः ष्कन् संप्रसारणं च प्रथ प्रख्याने अस्माद् ष्कन् प्रत्ययः स्यात् संप्रसारणं निपात्यते पृथुकः पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवदिति
मेदिनी पिबतेः कः पा पाने अस्मात् कप्रत्ययो निपातनात् पाकः पाकः परिणतौ शिशौ केशस्य जरसा शोक्लेपि स्यात् दोपचने पि चेति मेदिनी वदेर्नञि यः द्व्यक्ताय वाचि नञ्युपपदादस्माद्य
प्रत्ययो निपात्यते। अवद्यं पापं कुपूयकुत्सितावद्य खेट गर्ह्याणकाः समा इत्यमरः अव रक्षणादौ अस्मादमप्रत्ययो निपात्यते धातोर्वकारस्य वा धकारश्च अध
मः अवमः निकृष्ट प्रतिकृष्टार्वरेफयाप्यावमाधमा इत्यमरः क्लिशेरः क्लिशू विबाधने ऽस्मादरप्रत्ययो निपात्यते उपधाया ईत्वं लस्य लोपो नामागमश्च कीनाशः कीनाशः कर्षु
के क्षुद्रपांशु घातिषु वाच्यवत् यमेनेति विश्वः चतेरुरः चतेरुरच्चनेण चने अस्मादुरप्रत्ययः स्यात् चतुराम् शोचे स्यात् चत्वारः हंते घुरुच्च हन हिंसागत्योरस्मात् प्रत्ययः स्या

सि॰कौ॰ उ॰ ४४ क्षमेरल्लोपश्च क्षमू सहने अस्मादम्प्रत्ययः स्यात् धातोरुपधाया लोपश्च स्यात् क्ष्मावनिर्मेदिनी मही इत्यमरः तरतेर्डिः तॄ प्लवनसंतरणयोः अस्मात् डिप्रत्ययः स्यात् डित्वाट्टिलोपः
एङो जसि सेत्वं त्रयः ग्रहेरनिः ग्रह उपादाने अस्मादनिप्रत्ययः स्यात् कृदिकारादि —नीष् च ग्रहणिः ग्रहणी ग्रहणीरुक् प्रवाहिके इत्यमरः प्रथेरमः प्रथ प्रख्या
ने अस्मादमप्रत्ययः स्यात् प्रथमः प्रथमस्तु भवेदादौ प्रधानेपि च वाच्यवदित्यमरः प्रथमचरमेति वैकल्पिकं सर्वादिकार्य्यमस्य चरेश्च चर गतिभक्षणयोः अस्मादमप्र
त्ययः स्यात् चरमः मंगेरलः मगि गतौ अस्मादलप्रत्ययः स्यात् मंगलं मंगलं सितदूर्वायां सुमायां पुंसि भूमिजे नपुंसकं तु कल्याणे सर्वार्थरक्षणेपि चेति मेदिनी॥
॥ इत्युणादौ पंचमः पादः॥ ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायां भविष्यति क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोर्भावे तुमुन्प्रत्ययः स्यात् तच्छब्देन क्रियाया अर्थः प्रयोजनं य

क्षमेरल्लोपश्च क्ष्मा तरतेर्डिः त्रयः त्रीन् ग्रहेरनिः ग्रहणिः प्रथेरमः प्रथमः चरेश्च चरमः मंगेरलः मंगलम् सदोणादयः सर्वस्मिन्काले उ
णादयः उणादयः परिमिताः प्रयोगमनुसृत्य प्रयोक्तव्याः॥ ॥ इत्युणादौ पंचमः पादः॥ ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायां भविष्यति धातोर्भवि
ष्यति काले तुमुन्प्रत्ययः तदर्थायां क्रियायां गम्यमानायाम् गुडं भोक्तुं व्रजति व्याकरणं पठितुमीहते तुमर्थे ण्वुल् संदर्शको व्रजति॥

स्याः सा क्रिया यस्याः तस्यां आत्मानं चेत्यव्ययसंज्ञा भुजपालनादौ भोक्तुं व्रजति देवदत्तः भविष्यद्रूपं यद्भोजनं तत्प्रयोजनकं देवदत्तकर्तृकं व्रजनमित्यर्थः पठव्यक्तायां वाचि
कृतनरनीॠ पठितुमीहते देवदत्तः भविष्यद्रूपं यत्पठनं तत्प्रयोजनकम् देवदत्तकर्तृकं कामनमित्यर्थः तुमर्थे ण्वुल् क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोः कर्तरि
ण्वुल्प्रत्ययः स्यात् युवोरनाकावित्यकादेशः दृशिर् प्रेक्षणे कृ संदर्शको याति कृत्सकर्मकं भविष्यद्दर्शनकर्तृकं दर्शनप्रयोजनकं च यानमित्यर्थः कालसमयवेलासु काला राम ४४
दिषूपपदेषु तुमुन् स्यात् पर्यायोपादानमर्थोपलक्षणार्थं इङ् अध्ययने अध्येतुं कालः एवं भोक्तुं समयः भुजपालः॥ ६ ॥ ६ ॥ ६ ॥
॥ ॥

नादेर्भोक्तुम्। वेला एव मन्ये ह सादिर्योगेपि अनुवादे। अर्थं तु मन भवतीति यद् स्वरूपोच्चारणमनुवादः भूतानि कालः पचतीति वार्त्ती इति॥ ॐ ॥ इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् अक्रियार्थोपपदार्थमेतत् भोक्तुमिच्छति वांछति वशकांतावयमपीच्छार्थकः कांतिरिच्छा इत्युक्तत्वात् भोक्तुमिच्छति इत्यत्र भोजनविषयिणीच्छा प्रतीयते न तु भोजनार्थेच्छेति एककर्तृकेष्विति किं पुत्रस्य पठनमिच्छति पुत्रस्येति कर्तरि षष्ठी पुत्रकर्तृकं पठनमिच्छतीत्यर्थः शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु उपपदेषु धातोस्तुमुन् स्यात् अक्रियार्थोपपदार्थमेतदपि शक्ल शक्तौ ञिधृषा प्रागल्भ्ये ज्ञा अवबोधने ग्लै हर्षक्षये घट चेष्टायां रभ राभस्ये डुलभष् प्राप्तौ क्रमु पादविक्षेपे षह मर्षणे अर्ह पूजायां अस भुवि अस्त्यर्थग्रहणमस्तिनैव संबध्यते अनंतरत्वात् भोक्तुं शक्नोति धृष्णोति जानाति इत्यत्र भुज्यर्थो विषयतया संबध्यते ग्लायति भोक्तुमित्यत्र भोजनविषयिणी शक्तिर्गृह्यते भोक्तुं घटते इत्यत्र भोक्तुमर्हतीयोग्यता गम्यते आरभते भोक्तुमित्यत्र भुजेराद्यावस्था गम्यते लभते भोक्तुमित्यत्र

कालसमयवेलासु। अध्येतुं कालः। स्नातुं समयः। भोक्तुं वेला। इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्। भोक्तुमिच्छति वष्टि वांछति वा। ३

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु शक्नोति भोक्तुम्। धृष्णोति। पूर्णतावाचिषु सामर्थ्यार्थेषु पर्याप्तो भोक्तुम्। प्रवीणः कुशलः समर्थः पूर्णो नेति किम्। अलं भुक्त्वा। सामर्थ्यार्थेषु किम्। पर्याप्तं भुङ्क्ते। घञ् भावे पाकः त्यागः भावः दायः॥

प्राप्तिर्गम्यते प्रक्रमते उत्सहते भोक्तुमित्यत्र भुजेराद्यावस्था गम्यते अर्हति भोक्तुमित्यत्रापि योग्यता अस्ति भवति विद्यते वा भोक्तुमित्यादौ संभवमात्रं पूर्णतावाचिषु सामर्थ्यार्थेषु पर्याप्तिवाचिषु सामर्थ्यवचनेषु उपपदेषु धातोस्तुमुन् स्यात् पर्याप्तो भोक्तुं समर्थः कुशलस्तु पटुः प्रवीण इत्यर्थः पूर्णतावाचिष्विति किं पर्याप्तं भुंक्ते प्रभूतं नेह गम्यते न तु भोक्तुं सामर्थ्यम् घञ् भावे सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात् क्रियान्तराकांक्षोत्थापकतावच्छेदकाक्रान्तत्वं सिद्धत्वं पचतीत्यादौ तु साध्यावस्थापन्ने धात्वर्थे भाव इति भावे इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायामुपपदे भवंतीत्यर्थः ञित्वाद्वृद्धिः घित्वाच्चजोः कगौ घिनीति कः पच्यते पचनं वा पाकः त्यज वयोहानौ त्यज्यते त्यजनं वा त्यागः भू सत्तायां भूयते भवनं वा भा

संज्ञायामकर्मकर्तरि च कर्तृभिन्ने कारके धेधातोर्घञ् संज्ञायाम संज्ञायां च वाच्यमानायां हञ् हरणे प्रत्ययाह्रियंते यत्रेति प्रत्याहारः डुदाञ् दाने दीयते अस्मै इति आ
नायुगिति युक् दायः डुकृञ् करणे विक्रियतेऽनेनेति विकारः इङ् अध्ययने उपेत्याऽधीयतेऽस्मादिति उपाध्यायः स्वरादित्यस्यापवादोऽयं घञ् स्वरादः स्वरान्ताद्धातोर
प्रत्ययः स्यात् भावादौ घञोऽपवादः चिञ् चयने चयः णीञ् प्रापणे नयः षिञ् बंधने विपूर्वः विषयः ष्टुञ् स्तुतौ स्तवः लवः स्तोत्रं स्तुतिर्नुतिरित्यमरः लूञ् छेदने लवः लव
निश्च कणा पा वरस्समरः कृ विक्षेपे करः गॄ निगरणे गरः मदादिभ्य इत्यादिभ्योऽप्रत्ययः स्यात् भावादौ मदी हर्षे मदः प्रमदः संमदः पण व्यवहारे स्तुतौ च पणः शमु उपशमे शमः श्र

सञ्ज्ञायामकर्मकर्तरि च कर्तृवर्जिते कारके भावे घञ् सञ्ज्ञायामसंज्ञाया न्वा कार्यं प्रत्याह्रियते यः सः प्रत्याहारः दीयतेऽस्मै दायः सञ्ज्ञा
याम् विक्रियतेऽनेनेति विकारः उपाध्यायः घञर्थे कः घञोऽपवादः विशेषेण हन्यते क्रियमाणेनेति विघ्नः सुघ्नः स्वरादः भावादौ घञोऽपवा
दः चयनं चयः नयनं नयः षिञ् बंधने विशेषेण सीयंते बध्यंते जना अनेनेति विषयः लूयते अनेनेति लवः सवनं सवः लवनं लवः क्रि
क्रियते कार्यमनेनेति करः गिरत्यनेनेति गरः गलः ह्लाद्युपसर्गहीनस्य छादेर्ह्रस्वोऽप्रत्यये परिच्छदः छद्म दन्ता च्छाद्यंतेऽनेनेति दंतच्छ
दः ओष्ठः ह्लादिकिम् अन्ववप्रच्छादः समवपरिच्छादः मदाम्मदादीनामप्रत्ययो भावादौ मदः पणः प्रमदः संमदः शमः आश्रमः मूर्तौ
घनः काठिन्ये परिच्छेदे च हन्तेरप्रत्ययो घनादेशः दधिघनः सैन्धवघनः हनो वधोऽप्रत्ययश्च हननमिति वधः ड्वितोऽथुः ड्वितो धातोरथुर्भाव
ति भावादौ टुवेपृ कम्पने वेपथुः वमथुः नन्दथुः श्वपथुः ड्वितस्त्रिमक् तत्कृते ड्वितो धातोस्त्रिमक्प्रत्ययो धात्वर्थेन कृतेऽर्थे करणेन नि

सुनपस्मिरवेदे च श्रमः मूर्तौ घनः मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरः स्यात् धातोर्घनादेशश्च कठिनं दधि इति दधिघनः परिच्छेदे सैंधवघनः हनो वधोऽप्र
त्ययश्च अनुपसर्गाद्धन्तेर्भावे अप्रत्ययः स्यात् धातोर्वधादेशश्च वधः चकारात् घञपि हनो घदिति घदादेशः घातः ड्वितोऽथुः अयमपि स्वभावाद्भावे एव टुवेपृ कंपने वेप

कृत्रिमः डुपचष् पाके पाकेन निर्वृत्तः पक्त्रिमः डुवप् बीजतन्तुसन्ताने वापेन निर्वृत्तं यजामिति सम्प्रसारणं उप्त्रिमं नडु-कीड-कारक कारावित्तो एतौ भावेऽकर्तरि कारके
च भवतः नङ् प्रत्ययमाह ङ्नि तिचेति गुणो न यज देवपूजादौ अनुबन्धं यज्ञः यत्नः सवोऽध्वरो यागइत्यमरः टुयाचृ याच्ञायां याच्ञा यती प्रयत्ने यत्नः ङ्नि निङ्गसे ह्रौ जमे व
त्यनेन प्रच्छ विश प्वप्रर स्णामसंप्रसारणम् प्रच्छ ज्ञीप्सायां ग्रहामिति संप्रसारणं न भाष्येऽनुक्तत्वात् प्रश्नः विश प्रवेशने विश्नः रक्ष पालने रक्ष्णः ञिष्वप् शये
स्वप्नः कि प्रत्ययमाह डुधाञ् धारणादौ आतोनपीत्यालोपः अन्तर्द्धिः प्रधिः पयांसि धीयन्तेऽस्मिन्निति पयोधिः वारिधिः डुदाञ् दाने अदादिः युट् भावे च धातोर्भावे यु
ट् स्यात् अकारान्त युण् च युवोरित्यनादेशः रित्यादौ पञ्जित्वाह ह्रिः ज्ञा अवबोधने ज्ञानम् डुकृञ् करणे युण् प्रत्ययः कारणम् साधनाधारयोर्युट् साधनेऽधिकरणे चा

कृत्रिमः पक्त्रिमः नङ्क्नौ धातोर्नङ्क्नौ प्रत्ययौ स्तो भावादौ यज इज्यन्ते देवा अनेनेति यज्ञः याञ्चा यतीति यत्नः प्रच्छविशप्वपूरक्ष्णामसम्प्रसारणं च प्रश्नः।
विश्नः रक्ष पालने रक्ष्णः स्वप्नः अन्तर्द्धिः प्रधिः आधिः व्याधिः वारिधिः पयोधिः युट् भावे च ज्ञानम् करणम् साधनाधारयोश्च पच्यतेऽनेनेति
पचनोऽग्निः पच्यतेऽस्यां पचनी स्थाली ईषद्दुःसुषु खल्सूई षदादिषु प्रयुज्यमानेषु खल्युणौ स्तो भावादौ ईषद्भवः दुर्भवः सुकरः दुर्यो
धनः दुश्शासनः कर्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः खल् अद्दुराढ्येन दुराढ्येन भूयते दुराढ्यं भवं॥ ६ ॥ ॥

र्थे धातोर्युट् प्रत्ययः स्यात् डुपचष् पाके पच्यतेऽनेनेति पचनः अत्र करणे युट् इष्टितइती पपच्यतेऽस्यामित्यधिकरणे युट् पचनी ईषद्दुःसुषु खल् सूत्र पूर्व पदेषु धा
तोः खल् युण् प्रत्ययौ स्तः भावे कर्मणि च खल् प्रत्ययमाह खित्वात् खिति पदस्येति नुम् भू सत्तायां ईषद्भवः दुर्भवः डुकृञ् करणे सुकरः युण् प्रत्ययमाह युध संप्रहारे दुः
खेन युध्यते इति दुर्योधनः दुःखेन शिष्यते इति शासु अनुशिष्टौ दुःशासनः दुरिति कृच्छ्रार्थे वर्तते इतरौ तु कृच्छ्रार्थे वर्तेते कर्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपप
देषु भूकृञोः खल् कर्तृकर्मवाचकौ शब्दौ धातोरव्यवधाने तु प्राक् प्रयुज्येते ईषदादयस्तु ताभ्यां प्राक् प्रयोज्याः दुःखेनाढ्येन अनाढ्येन भूयते इति दुराढ्यं भवं ॥ ६ ॥

सि॰ चं॰
कृ॰ उ॰
४६

भवता अत्का द्विति निषेधात् कर्तरि कृतीयासुखेनानाढ्यः आढ्यं क्रियते स्वाढ्यंकरः सः कृत्यसंज्ञकान् प्रत्ययानाह तव्यानीयौ धातोरेतौ प्रत्ययौ स्तः भावकर्मणोः तव्य प्रत्ययमनीयप्रत्ययं चाह एध वृद्धौ कृतनइतीट् एधितव्यं एधनीयं त्वया आस उपवेशने आसितव्यं आसनीयं भावे औत्सर्गिकमेकवचनं क्लीबत्वं च वसे स्तव्यः कर्तरि णिच्च वस निवासे इत्यस्यैव ग्रहणं न तु वस आच्छादने इत्यस्य लुक् विकरणत्वात् अ स्मात् कर्तरि तव्यः स्यात् स च णित् णित्वाद् वृद्धिः केलिमः धातोः कर्मणि केलि मप्रत्ययः स्यात् कित्वान्न गुणः भिदिर् विदारणे भिदेलिमाः सरलाः भेतव्या इत्यर्थः डुपचष् पाके पचेलिमा माषाः पक्तव्या इत्यर्थः स्वराद्यः स्वरग्रहणं धातोर्वि

भवता अस्वाढ्यः स्वाढ्यः क्रियते स्वाढ्यंकरः तव्यानीयौ भावकार्य्ययोः एधितव्यं एधनीयं आसितव्यं आसनीयं पातव्यम् पानीयम् वसेस्तव्यः कर्तरि णिच्च वसतीति वास्तव्यः सौकर्य्ये केलिमः सौकर्ये धातोः केलिमः प्रत्ययो भवति पचेलिमा माषाः भिदेलिमाः सरलाः स्वराद्यः स्वरान्ताद्धातोर्य्यः चेयम् जेयम् तव्याद्योः पिंचेतव्यः चयनीयः दित्स्य मईचातः आदन्ताद्धातोर्य्यः आकारस्य च ईकारः देयम् ग्लेयम् गेयम् पुशका न् पवर्गान्ताच्छकारे श्च यप्रत्ययः शप्यम् जप्यम् शक्यम् सह्यम् ऋहसान्ताद् घ्यण् ऋवर्णान्ताद्धसान्ताद्धातोर्घ्यण् भावकार्ययोः। कार्य्यम् हार्य्यम् वाक्यम् पाक्यम् रोग्यम्॥

शेषणं विशेषणेन न इदं तविधिः चिञ् चयने चेयम् जि जये जेयम् तव्याद्योपि भवन्ति चेतव्यः चयनीयः डुदाञ् दाने अस्मादिच्छायामात्मनः सइति सः इस्येइति इसादेशः द्वित्वलोपश्च सस्तोनपीति सस्य तः दित्स्यति सां ताद्य प्रत्यये यत इस्य लोपः दित्सने इति दित्सः ईचातः डु दाञ् दाने देयं गै शब्दे गेयं ग्लै हर्षक्षये ग्लेयं पुशकात् अत्र घ्यण् न भवति तव्याद्यस्तु सुरेव शप उपालंभे शप्यम् यमु उपरमे यम्यं जप व्यक्तायां वाचि जप्यं श कादेस्तु शल्कृ शतौ शक्यं षह मर्षणे सह्यं ऋहसान्ताद् घ्यण् ऋ इति धातोर्न ग्रहणं किन्तु ऋवर्णस्य हसा साहचर्यात् घित्वाच्च जोः कगाविति कगौ राम ४६
॥ ॥

णिताइट्टिः डुकृञ् करणे कार्य्यम् हृञ् हरणे हार्य्यं वह प्रापणे वाह्यं हन हिंसागत्योः हनो घ दिति घत् घात्यम् डुपचष् पाके पाक्यम् रुज रोगे रोग्यम् वच परिभाषणे वा
क्यम् ॥ ६ ॥ घ्यणि क्वचित् कुत्वाभावः यज याच प्रवच रुच ऋचां कुत्वं न घ्यणि यज देवपूजादौ याज्यं टुयाचृ याच्ञायां याच्यं वच परिभाषणे प्र पूर्वः प्रवाच्यं ग्रंथवि
शेषः रुच दीप्तौ रोच्यं ऋच स्तुतौ अर्च्यम् ऋदुपधात् ण्यपि तु न भवति उ ओरावश्यके अवश्यमेवेत्यावश्यकं तस्मिन् उ दो तो र्यः स्वरवन् यं यकारप्रत्ययं निमित्तत्वेनाश्रित्य स
गुणेन यत्र ओकारो भवति वृद्ध्या च यत्र औकारो भवति स च प्रत्ययः स्वरवद्भवतीत्यर्थः लुंपेदवश्यमः कृत्ये तुम् काममनसोरपि सं मो वा हितततयोर्मांसस्य पचि युड्घ

घ्यणि क्वचित् कुत्वाभावः याज्यम् याच्यम् वाच्यम् रोच्यम् अर्च्यम् उ ओरावश्यके उवर्णान्तादावश्यके ऽर्थे घ्यण् ओ दो तो र्य स्वरवन् ओ
कारौकारयोर्निमित्तं यः प्रत्ययः स्वरवत् लुंपेदवश्यमः कृत्ये तुं काममनसोरपि समो वा हितततयोर्मांसस्य पचि युड्घञोः अवश्यं
भाव्यो ऽवश्यभाव्यः भोक्तुकामः श्रोतुमनाः संहितं सहितं संततम् सततम् मांसस्य पचनम् मांस्पचनम् मांसपचनम् मांसस्य पाकः मांस्पाकः मां
सपाकः हनो वधादेशो ये वध्यम् ऋदुपधात्क्यप् ऋकारोपधाद्धातोः क्यप् कृती कृत्यम् वृत्यम् ॥ ११ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

ओः १ अवश्यं निपातसं— लुंपेत् लोपं कुर्यात् कृत्ये कृत्यसंज्ञके प्रत्यये परे यथा अवश्यलाव्यः तुम्प्रत्ययस्य सं लुंपेत् काममनसोः शब्दयोः परयोः यथा
भोक्तुकामः श्रोतुमनाः सम् सुपसर्गस्यांत्यं वा लुंपेत् हिततततयोः शब्दयोः परयोः यथा सहितं संहितं सततं संततं मांसशब्दस्यांत्यं वा लुंपेत् पचि प्रकृति युड्घञ्प्रत्य
ययोः परयोः यथा मांसपचनं मांस्पचनं मांसपाकः मांस्पाकः हनो वधादेशो ये हन हिंसागत्योरस्मात् यप्रत्ययः स्यात् धातोर्वधादेशश्च वध्यः पक्षे घ्यणपि हनो घ दि
ति घत् घात्यः ऋदुपधात् क्यप् कित्वात् गुणो न पित्वात् ह्रस्वस्य पिति तुक् कृती छेदने कृत्यं वृतु वर्तने वृत्यं वृधु वृद्धौ वृध्यम् तत्परकरणं किं कृतसंशब्दे नेयुष्ट

कृपिचृत्योर्न आभ्यां क्यप् न स्यात् ण्यत् कृपू सामर्थ्ये कल्प्यं चृती हिंसायां चर्त्यं मृजो वा ऋदुपधादिति नित्यं प्राप्ते विकल्पार्थमारंभः मृजूष् शुद्धौ मृज्यं क्यबभा-
वे घ्यण् मृजेर्वृद्धिरिति वृद्धिः चजोरिति गः मार्ग्यः भुवो भावे भू सत्तायां ब्रह्मभूयं नाम्न्युपपदे इति किं भव्यं स्वराद्य इति यः इणस्तुवृदृभृशासुजुषखनः क्यप् च एभ्यो
धातुभ्यः क्यप् स्यात् इण् गतौ ह्रस्वस्य पिति कृति तुक् इत्यः ष्टुञ् स्तुतौ स्तुत्यः वृ इति वृञ् वरणे इत्यस्य ग्रहणं वृङ् संभक्तौ वस्मात् ण्यत् ण्यणेव वार्य्यः दृङ् आदरे दृत्यः भृञ् भरणे भृत्यः कर्मकरः भर्त्तव्य
इत्यर्थः क्रियाशब्दो येन तु संज्ञा शासु अनुशिष्टौ शासेरितीत्वम् घसादेरिति षः शिष्यः जुषी प्रीतिसेवनयोः जुष्यः खन इत्वं क्यपि खनखनने इत्यस्य नस्य इत्वं स्यात्

कृपिचृत्योर्न्नैकल्प्यम् चृत दीप्तौ चर्त्यम् मृजो वा मृज्यम् मार्ग्यम् भुवो भावे नाम्न्युपपदे भुवो भावे क्यप् ब्रह्मणो भावः ब्रह्मभूयम् नाम्नि
किम् भव्यम् इणस्तु भृदृवृशासुजुषखनः क्यप् च इत्यः स्तुत्यः दृङ् आदरे दृत्यः वृत्यः शासेरिः शिष्यः जुषी प्रीतिसेवनयोः जुष्यः खन ई-
त्वं क्यपि खेयम् भिद्योद्ध्यौ नदे भिनत्ति कूलमिति भिद्यः उज्झति जलमिति उद्ध्यः कृवृषोर्वा क्यप् कृत्यम् कार्य्यम् वृष्यम् वर्ष्यम् पुष्यसिध्यौ
नक्षत्रे पुष्यन्ति कार्य्याण्यस्मिन्निति पुष्यः सिध्यन्ति कार्य्याण्यस्मिन्निति सिध्यः राजसूयादयः॥

॥ क्यपि खेयं भिद्योद्ध्यौ नदे भिदिर् विदारणे उज्झ उत्सर्गे आभ्यां क्यप् स्यात् कर्त्तरि उज्झेर्धत्वं च निपात्यते नदे वाच्ये भिनत्ति कूलमिति भिद्यः उज्झत्युदकमिति उद्ध्यः नदे किं भेत्ता उज्झिता तृप्रत्ययः कृवृषोर्वा क्यप् कर्त्तरि डु-
कृञ् करणे वृषु सेचने आभ्यां वा क्यप् स्यात् कृतोतेः क्यपः अप्राप्तेः ऋदुपधादिति नित्यं प्राप्ते विकल्पः ह्रस्वस्य पिति कृति तुक् कृत्यम् वृष्यम् क्यबभावपक्षे
ण्यत् कार्य्यम् वर्ष्यम् पुष्यसिद्धौ नक्षत्रे पुष्पप्रेषौ षिधु गत्याम् आभ्यामधिकरणेऽर्थे क्यप् निपात्यते पुष्यः सिद्ध्यः नक्षत्रे किम् पोषणं सेधनं साधनाधारयोरिति सुट्
राजसूयादयः क्यबन्ताः शब्दाः निपात्यन्ते षुञ् अभिषवे राज्ञा सोतव्यः इति राजसूयः अभिषवद्वारा निष्पादयितव्य इत्यर्थः यद्वा राजा सूयते कं इज्यते ऽत्रेति॥

राजसूयः राजेतिसोमः अधिकरणेक्यप् निपातनाद्दीर्घः अर्द्धर्चादित्वात्पुन्नपुंसकः सृगतौ सरत्याकाशे इति सूर्य्यः कर्त्तरि क्यप् निपातनादुरादेशः ष्वोर्विहसेति दीर्घः यद्वा षू प्रे
रणेतुदादिः सुवति कर्म्मणि लोकं प्रेरयतीति सूर्यः क्यपोरुट् निपातनात् तव्यादयो ऽर्हेर्थे विधौ शक्तौ च वाच्याः दृशिर् प्रेक्षणे ऽस्मात्तव्यप्रत्यये गुणे कृते रारोङ्गसे दृशा
मितिरः छुशषेति षत्वं ष्टुत्वं द्रष्टव्यः अनीयप्रत्यये तु दर्शनीयः क्यपि तु दृश्यः इङ् अध्ययने ऽस्मात्तव्यप्रत्यये गुणे कृते अध्येतव्यः अनीये तु अध्ययनीयः यप्रत्यये
अध्येयः श्रु श्रवणे श्रोतव्यः श्रवणीयः क्यपि तु श्रुत्यः मन ज्ञाने मंतव्यः मननीयः वह प्रापणे ऽस्मात्तव्यप्रत्यये हो ढ इति ढत्वे तथोर्ध इति धत्वं ष्टुत्वं ढिढो लोप इति ढलो
प पूर्वदीर्घो सहवहोरितोत्वे वोढव्यः वहनीयः कृत्यक्तखलर्थाः प्रत्यया भावकर्मणोर्भवंतीति कृत्प्रत्ययाः स्त्रियां यजां भावे क्यप् प्रत्यय ———— माहपित्वा

राज्ञा सोतव्यो ऽभिषवद्वारा निष्पादयितव्यः राजसूयः :सरत्याकाशे सूर्य्यः तव्यादयोर्हे ऽर्थे विधौ शक्तौ च वक्तव्याः दर्शनार्हो द्रष्टव्यः द
र्शनीयः दृश्यः स्वाध्यायो ध्येतव्यः अध्ययनीयः अध्येयः श्रोतव्यः मंतव्यः निदिध्यासितव्यः वोढव्यः तव्यादीनां कृत्यसंज्ञा स्त्रियां यजा
भावे यजादेर्धातोः स्त्रियां भावे क्यप् इज्या व्रज्या समज्या निषद्या निपत्या मन्या विद्या सुत्या शय्या भृत्या इत्या कृत्या कृत्योपगवा। ६ ॥

तु क्ङिति चाद्गुणनिषेधः संप्रसारणं च यज देवपूजादौ यजामिति संप्रसारणं यजनमिज्या व्रज गतौ व्रजनं व्रज्या संज्ञायां समजनिषद निपत मनाम् अज गतौ क्षेपणे
च समजंत्यस्यामिति समज्या सभा अजेः क्यपि वीभावो न निपातनात् षद्लृ विशरणादौ निषीदंत्यस्यामिति निषद्या आपणः प्रादेश्चेति षत्वं पत्लृ पतने निपतंत्यस्या
मिति निपत्या पिच्छिला भूमिः मन ज्ञाने मन्यते ऽनया मन्या गलपार्श्वनाडी विद ज्ञाने विदंत्यनयेति विद्या षुञ् अभिषवे ह्रस्वस्येति तुक् सुत्या अभिषवः शीङ् स्वप्ने
शेरते ऽस्यामिति शीङो यङ् यङ्क्ङितीत्ययङ् शय्या डुभृञ् धारणादौ भृत्या जीविका इण् गतौ ईयते ऽनयेति इत्या शिविका डुकृञ् करणे कृत्या कृओयक् वा करोते
र्यक् प्रत्ययो वा स्यात् यक् प्रत्ययाभावे शप्रत्यये निपातनात् भवति भावकर्मणोरर्थयोः यक् प्रत्यये यकीतिरिङादेशः आवन इत्या पक्रिया शप्रत्यये तु यक् चतुर्षु इति य ६

सि॰ चं॰ अयकौनिरिङ् आप् च क्रियाइषुइच्छायामस्मान्शप्रत्ययोनिपात्यतेनेशित्वाच्चतुर्वत्कार्यंतेनेनगमामिनिष्ठः आवनद्दसाप्इच्छासृगतौअस्मात्शप्रत्यययक्प्र

कृ॰ ३॰ सयोनिपात्यतेतेधातोर्गुणअशप्रत्ययेयक्चतुर्ध्विनियक्यनइस्सलोपः आप्परिसर्पणंपरिसर्यायकितुनिपातनाद्गुणःपरिसर्याअटगतौअस्मादपिशयकौनिपात्य

४८ तेशप्रत्ययेतुयक्चतुर्ध्विनियक्यनइस्सलोपः निपातनात्स्यशब्दस्यद्वित्वंपूर्वभागेयकारनिवृत्तिदीर्घावपिनिपातनात्आवतइस्साप्अटाट्यायकितुस्यशब्दस्यद्वि

त्वंयकारनिवृत्तिदीर्घौपूर्ववदेवअटाट्याअन्येतुअटगतावस्मान्सूचिसूत्रिमूत्र्यटीतियङ्स्वरादेरितिस्यशब्दस्यद्वित्वंआनद्दतिपूर्वस्यात्वंअटाट्येसस्मान्प्र

त्ययांता ------ दीत्यङ्प्रत्ययःअनपिचेतियलोपःयनइस्सलोपःआप्चआटाट्याआसउपवेशनेनिपातनात्यक्आस्याजागृनिद्राक्षयेअस्मान्शयगका

अयकि। क्रियाइषेरिच्छेतिनिपातःइषेरप्रकृत्यादेशःइच्छाससेर्गुणःपरिसर्या। अटाट्याआशास्याजागर्तेर्गुणःजागर्याहनस्तःहत्याक्तिःधातोःक्तिःस्त्रिया

म्भावेकृतिः बुद्धिःस्मृतिः अमानस्यदीर्घः शान्तिः दान्तिः कान्तिः स्तान्तिः ह्वेञ्हूतिः ऊढिःस्फातिः हवस्योर्नेट्संशीतिः ग्रहादीनामि

रप्रत्ययानिपातनाद्गुवंतिशप्रत्ययेशित्वाच्चतुर्वत्कार्यंतेनेनयक्चतुर्ध्विनियक्जागर्तेर्विइणणप्ङितुभिन्नेनिगुणःआप्चजागर्याय ट्निगृहीतिः॥

कितुजागर्तेरितिगुणःजागर्याआकारप्रत्ययेगुणःजागराहनस्तःअनुपसर्गेनाम्रुपपदेहंतेर्भावेक्यप्स्यात्धातोर्नस्यतश्चब्रह्मणोहननंब्रह्महत्याक्तिः

धातोःस्त्रीलिंगेभावादौक्तिप्रत्ययःस्यात्घञोऽपवादःडुकृञ्करणेकृतिःबुधअवगमनेनतथोर्द्धइतितस्यधःझभेजबाइतिपूर्वधस्यदःबुद्धिःस्मृचिंतायां

स्मृतिःशमुदमुउपशमेकमुकांतौस्नमूषसहनेअमांतस्यक्तिनीतिदीर्घःशांतिःदांतिःकांतिःस्तांतिःहवस्योर्नेट्हवप्रसाहारक्तिप्रत्यययोरिडनस्यात्शी राम

ङ्स्वप्नेसंशीतिःग्रहादीनामिट्ग्रहादीनांक्तिप्रत्ययस्येट्ग्रहउपादानेग्रहामितिसंप्रसारणंईटोग्रहामितिदीर्घःनिगृहीतिःपठव्यक्तायांवाचिनिपठितिः ४८

+

+

ग्लादेर्निः ग्लादेर्धातोर्निः प्रत्ययः स्यात् ग्लै म्लै हर्षक्षये ग्लानिः म्लानिः त्रित्वरा संभ्रमे ञित्वरा त्वरे सूः तूर्णिः ऋल्वादिभ्यः क्तेर्निः ऋ दंतात् ल्वादिभ्यश्च परस्य क्ते स्तस्य निः स्यात् क्षु वि
क्षेपे ऋत इद्धातोः इत्वे विह से इति दीर्घः कीर्णिः गृ निगरणे गीर्णिः लूञ् छेदने लूनिः धूञ् कंपने धूनिः संपदादिभ्यः क्विप् वा पक्षे क्तिः पद गतौ संपत् विपत् संपत्तिः वि
पत्तिः कर्तरि क्तिः संज्ञायां धातोः कर्तरि क्तिः स्यात् संज्ञायां वाच्यायां प्रकुरुते इति प्रकृतिः षिद्भिदादिभ्योऽङ् षितो धातोर्भिदादिभ्यश्च स्त्रियामङ् स्यात् डुपचष् पाके आतश्च
इत्याप् पचा मृजूष् मृजुदौ मृजा भिदिर् विदारणे भिदा अन्या भिद्यते इति भितिः कुडवं कयंतर्हि मुखाञ्जं गंधलब्धेरिति माघः प्रेक्षोपलब्धि चितसंविदि समरश्चषित्वा
दिहाङ् प्रत्ययः उचितः प्रत्यं अनर्थकास्तु पतिवर्णमनुपलब्धेरिति भाष्यप्रयोगाद्धाहुलकात् क्तिः प्रत्ययोपिवोध्यः ऋतोङि गुणः ऋतो धातोर्गुणः स्यात् अङि परे जॄष् इर

ग्लादेर्निः ग्लानिः म्लानिः त्वरतेर्वस्योत्त्वम् तूर्णिः ऋल्वादिभ्यः क्तेर्निः कीर्णिः गीर्णिः लूनिः धूनिः संपदादेः क्विब्वा संपद्ग्नं सम्पत् सम्पत्तिः कर्तरि क्तिः
संज्ञायाम् प्रकुरुते इति प्रकृतिः षिद्भिदादेरङ् षितो धातोर्भिदादेश्च स्त्रियामङ् पचा माया ऋतोऽङि गुणः जरा भिदा छिदा मृजा क्षिपा गुहा गु
रोर्हसातं गुरुमतो हसान्तात् स्त्रियामङ् नक्तिः ईहा ऊहा कुण्डा प्रत्ययांतात् स्त्रियामङ् चिकीर्षा॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

वयोहानौ जरा छिदिर् द्वैधीकरणे छिदा द्वैधीकरणे एवायं अन्यत्र तु छिद्यते इति छित्तिः श्लिष्टं क्षिपेः संप्रसारणं च ऋपकृपायामस्य संप्रसारणं स्यात् अङि परे कृपा
क्षिप प्रेरणे क्षिपा राद्धिः गुह संवरणे गुहा गुरोर्हसात् ईह चेष्टायाम् ईहा ऊह वितर्के ऊहा कुडि दाहे कुंडा गुरुमत इति किं भक्तिः हसांतादिति किं नीतिः प्रत्य
यांतात् प्रत्ययांताद्धातोरङ् प्रत्ययः स्यात् स्त्रियां डुकृञ् करणे स्मात् इच्छायामात् सन् इति सप्रत्यये कृते वुः सेइतो डुनतानिटि से इति न गुणः सेद्दीर्घः इति दीर्घे कृ
ते ऋत इद्धातोः इत्वे विहसे इति दीर्घः हल्वादिपूर्ववत् सधातुरिति धातुत्वादङ् कर्तुमिच्छतीति चिकीर्षतीति चिकीर्षा लूञ् छेदने स्मादतिशये हसादेरिति य
ङ् द्वित्वं च यङोऽतिपूर्वस्य गुणः लोलूयते इत्यस्मादङ् प्रत्यये यत इत्यस्य लोपः अतिशयेन लुनातीति लोलूयते २ इति॥ ६ ॥ ॥ ६ ॥ ६॥

लोलूयाकंडूञ् गात्रविघर्षणे अस्मात् कंड्वादिभ्य इति यक् यगंतात् इः परे यत इत्यलोपः कंडूयते इति कंडूया पुत्रशब्दात् काम्यश्चेति काम्यप्रत्ययस्ततो इः यत इत्यलोपः पुत्रमिच्छतीति पुत्रकाम्यति पुत्रकाम्यतीति पुत्रकाम्या धात्वर्थनिर्देशे ण्वुल् वक्तव्यः आशिका शायिका काप्यन इनी त्वं इक्श्तिपौ धातुनिर्देशे इक्श्तिपौ प्रत्ययौ वा हविला हुणो न शित्वाच्चानुवर्तते नावादि प्रत्ययो भवति डुपचष् पाके पचिअपवर्गे एसप् पचतिः बहुलमित्यनुवृत्तेः क्वचिन्नेतो भुवो वुगिति ज्यंतार्थास श्रंथ घट्टि वंदि विदि इषिभ्यः स्त्रियां युः एभ्यो युः स्यात् अडोपवादः युप्रत्ययमाह युवोरित्यनादेशः डुकृञ् करणे णेरिति णिलोपः कारणा हृञ् हरणे हारयतीति हारणा अर्थयाच्ञायां अर्थयतीति अर्थना त्रीणयपि ण्यंतोदाहरणानि आस उपवेशने आस्यते स्यामिति आसना ण्यण्प्रत्यये तु आस्या श्रंथ संदर्भे श्रंथना घट चेष्टायां घटना वदि अभिवादनस्तुत्योः वंद

लोलूया कण्डूया। पुत्रकाम्या धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। आशिका शायिका इक्श्तिपौ धातुनिर्देशे। पचिः। पचः। पचतिः। ण्यन्तार्थास श्रंथ घट्टि वन्दि विदि इषिभ्यः स्त्रियां युः कारणा। अर्थना। आसना। श्रंथना। घटना। वन्दना। वेदना। एषणा। इञ् अजादिभ्यः। आजिः आतिः। विभाषाख्यानपरिप्रश्नयोरिञ् च। आक्रोशेन स्यानिः अकरणिः। अजननिः। इक् कृष्यादिभ्यः। कृषिः। गिरिः ((नाभत्र विद्लृ लाभे अयमेव गृह्यते वेदना ज्ञानार्थस्य विदेस्तु संवित्तिः अनिच्छार्थस्येषेस्तु अग्रहणं इच्छा तो अन्वेषणा इञजादिभ्यः अजप्रभृतिभ्यो धातुभ्य इञ् स्यात् इञ्प्रत्ययमाह ञित्वाद् वृद्धिः अजगत्यादौ वा हलकाद् अजेर्वीभावो न आजिः संग्रामः अत गतौ आतिः अत्र मानस्यागमे आतिः विभाषाख्यानपरिप्रश्नयोरिञ् च परिप्रश्ने आख्याने च गम्ये धातोरिञ् वा स्यात् ण्वुल् च यथा प्राप्तमन्येपि प्रत्यया भवंति कां त्वं कारिं कारि कां त्वं अकार्षीः एवं गणिं गणिकां गणनां पचिं पाचिकां पचां पाक्तिम् आख्याने पि एवं इक् कृष्यादिभ्यः इक्प्रत्ययमाह कित्वान्न गुणः कृष विलेखने कृषिः गॄ निगरणे ऋत इरिनोरगिरिः ऋ विक्षेपे किरिः आवश्यकाधमर्ण्ययोर्णिनिः अवश्यंकारी शतं दायी भविष्यदर्थे पि निश्च ग्रामं गामी। ॥ ६ ॥ ः॰ः ॥ छ ॥ ६ ॥ ॥ राम ४९
॥

पूर्वकालेक्त्वासमानकर्तृकयोर्धात्वर्थयोः पूर्वकालेविद्यमानाद्धातोः क्त्वास्यात्पूर्वकालेत्रबहुव्रीहिः क्त्वातुअव्ययकृतोभावइतिभावेभावोपिघञादाविवनेहसिद्धाव
स्थापन्नः किंतुसाध्यावस्थापन्नः सचधातुनैवलब्धः क्त्वाप्रत्ययार्थभूताक्रियाचक्रियांतरंप्रतिविशेषणंभवतिक्त्वाप्रत्ययमाहकित्वान्नगुणः क्त्वांतमित्यव्ययत्वा
द्विभक्तेर्लुक् क्त्वासेट्किन्नधातोःपरःसेट्क्त्वाकिन्नस्यात्वृतुवर्तनेवृतइतीट्वर्तित्वाशीङ्स्वप्नेशयित्वासेट्किंकृत्वाकितइतीण्नमृडमृदगुधकुषक्लिशवदव
सरुदविदमुषग्रहिभ्यःकित्एभ्योधातुभ्यःसेट्क्त्वाकित्मृडसुखनेमृदक्षोदेगुधपरिवेष्टनेगुधरोषेचकुषनिःकर्षेक्लिशूहिंसायांदिवादिःक्लिशूविबाधनेक्र्यादिः
वदव्यक्तायांवाचिवसनिवासेरुदिर्अश्रुविमोचनेविदज्ञानेमुषस्तेयेग्रहउपादानेमृडमृडित्वामृदमृदित्वागुधगुधित्वाकुषकुषित्वाक्लिशूऊदित्वादिट्क्लिशित्वा

पूर्वकालेक्त्वा।धातोस्समानकर्तृकेधातौप्रयुज्यमानेक्त्वासेट्किन्न।धातोःक्त्वाप्रत्ययःपूर्वकालेर्थेसेट्क्त्वाकिन्नवर्तित्वाशयित्वा।मृडमृदगुधकुषक्लिशवदवसरुदविद
मुषग्रहिभ्यःकित्मृडित्वामृदित्वागुधित्वाकुषित्वाक्लिशित्वाउदित्वाउषित्वारुदित्वाविदित्वामुषित्वागृहीत्वानोपधात्थफान्ताद्वाकित्
ग्रंथित्वाग्रथित्वागुंफित्वागुफित्वाअलंखल्वोःप्रतिषेधेअलंभुक्त्वाखलुकृत्वा॥ क्लिशूवदयजामितिसंप्रसारणंउदित्वावसवसिक्षुधोरिटीतीट्यजा
मितिसंप्रसारणंघसादेरितिषः उषित्वारुदिर्रुदित्वाविद्विदित्वामुषमुषित्वाग्रहग्रहामितिसंप्रसारणंईटोग्रहामितिदीर्घःगृहीत्वानोपधात्थफान्ताद्वानोपधा
द्धातोःथफान्तात्परःसेट्क्त्वावाकित्स्यात्ग्रंथसंदर्भेकित्वान्नोलोपइतिनलोपःग्रथित्वाग्रंथित्वागुंफग्रंफनेकित्वासक्षेनलोपःगुफित्वागुंफित्वानोपधात्किंको
थित्वारेफित्वाकुथपूतीभावेरिफकत्थनयुद्धनिंदाहिंसादानेषुइहइवर्णोपधादितिविकल्पोपिनभवतिनोपधग्रहणसामर्थ्यात्अलंखल्वोःप्रतिषेधेप्रतिषे
धार्थेअलंखल्वोरुपपदयोर्धातोःक्त्वास्यात्भुजपालनादौअलंभुक्त्वाडुकृञ्करणेकितइतीट्खलुकृत्वाअलंखल्वोःकिंमाकार्षीत्प्रतिषेधयोःकिंअलंकारः॥

॥ ॥

उदितः क्त्वो वेट् उदितो धातोः परस्य क्त्वाप्रत्ययस्येड्वा स्यात् इषु इच्छायां ऊदित्वादिट् इट्पक्षे क्त्वा सेडित्यकित्वाद्गुणः एषित्वा इडभावे इष्ट्वा इष्ट्वा भ्रमु चलने
ऊदित्वादिट् भ्रमित्वा इडभावे अनुनासिकस्येति दीर्घः भ्रान्त्वा अदो जग्धिः अदभक्षणे अस्य जग्धादेशः क्त्वाप्रत्यये तथोर्धः इति धः खरि चेति धस्य दः झबे जबाइति द
ल्यपः जग्ध्वा समासे क्त्वा ल्यप् अव्ययपूर्वपदे अनञ्समासे समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा ल्यप् स्यात् क्त्वाप्रत्ययमाह किकित्वाद्गुणो न पित्वात्
ह्रस्वस्य पिति कृतीति तुक् डुभृञ् धारणपोषणयोः प्रपूर्वत्वे शब्दे च प्रणम शब्दो नाम्नः अव्ययकृते इति क्त्वान्तेन नित्यं समस्यते संभृत्य प्रणम्य अनञ् किं अकृत्वा अव्ययपूर्वपदे इ
ति किम् परमकृत्वा मांतानिटां धातूनां तु अमस्य लोपो वा भवति क्त्वा पि वनतितनोत्यादीनां तु लोपस्त्वनुदात्ततनामिति नित्यं अमस्य लोपः आगत्य आगम्य प्रणत्य

उदितः क्त्वो वेट् इषित्वा एषित्वा इष्ट्वा भ्रमित्वा भ्रान्त्वा अदो जग्धिः जग्ध्वा समासे क्त्वा ल्यप् समासे सति पूर्वकाले क्त्वा ल्यप् समानकर्तृके धातौ प्रयुज्यमा
नेस भृत्य करोति प्रणम्य गच्छति प्रणत्य गच्छति अनञ् पूर्वे इत्येवं अकृत्वा क्त्वा पि लघुपूर्वात्परस्य णेरय् परिणमय्य लघुपूर्वात् किम् संप्र

प्रणम्य अन्यत्र तु नित्यम् प्रहत्य प्रमत्य वितत्य क्त्वा पि लघुपूर्वात् परस्य णेरयल्घुः पूर्वो यस्मात् वर्णात् लघुपूर्व ॥ धार्य आप्नोतेर्वा प्रापय्य प्राप्य ॥ ॥
वर्णात्परस्य णेरयादेशः स्यादित्यर्थः णम प्रह्वत्वे शब्दे च अस्मात् प्रयोजके णिप्रत्यये जनी जृषि क्नसु रंजोऽमंतत्वान्मित्त्वम् मितां ह्रस्व इति ह्रस्वस्ततो णेरयादेशः प्रणमय्य
गणसंख्याने चुरादिरदन्तः अस्मात् स्वार्थे णिप्रत्यये यत इत्यलोपः नन्विह कृतस्याल्लोपस्य स्थानिवद्भावेन लघुपूर्ववर्णात्परत्वं नास्ति कथमयादेशः स्यात् उ
च्यते अयादेशे कर्तव्ये ल्लोपस्य स्थानिवत्त्वं भाष्यादौ न स्वीकृतमस्ति विगणय्य लघुपूर्वादिति किम् संप्रधार्य संपूर्वात् धृ धारणे अस्मात् प्रयोजके णिप्रत्ययो
नात् क्त्वा पि कृते णेरिति णिलोपः आप्नोतेर्वा आप्लृ व्याप्तौ अवस्मात्परस्य णेरयादेशो वा स्यात् अप्राप्तविभाषेयं तथा च ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ राम ५०
॥ ॥

श्रीहर्षः अयमयोगिवधूवधपातकी भ्रमिमवाप्य दिवः खलु पात्यते इत्यत्राप्यवाप्येत्यस्यावाप्येत्यर्थो बोध्यः ॥ ३ ॥ कपोत्वाभावः दादेरिती त्वमुस्यामीत्थं च प्राप्तमनेन
निषिध्यते डुदाञ् दाने प्रदाय ष्ठा गतिनिवृत्तौ प्रस्थाय षोंतकर्मणि प्रसाय डुधाञ् धारणादौ विधाय कथं तर्हि निपीय यस्येति श्रीहर्षप्रयोग इति चेदत्राहुः दिवा
दिगणस्थस्य पीङ् पाने इत्यस्य रूपमिति तत्कालेपि क्वचित् क्वापि स्यात् डुदाञ् दाने व्यादाय यदैव स्वपिति तदैव मुखं व्यादत्ते मील निमी लने निमील्य यदैव हसति तदैव
नेत्रे संमीलयतीत्यर्थः पौनःपुन्येणमुपदं द्वि अपौनःपुन्ये द्योत्ये समानकर्तृकयोः पूर्वकाले धातोर्णमुल् स्यात् चकारात्क्त्वा चणमन्तस्य द्वित्वं चणमुप्रत्ययमाहृणि
त्वा हृदि स्मृत्वा ध्यानं चेत्स्य व्ययत्वादिह भजते लुक् पापाने स्मात्रागमिकृते आतो युगिति युक् पायंपायं पक्षे पीत्वा पीत्वा स्यामीनीत्वं भुज पालनादौ भोजंभोजं भुक्त्वा स्मृ चिंतायां

कपोत्वाभावः प्रदाय प्रधाय प्रस्थाय प्रसाय मिनोति मीनाती स्यात्त्वं प्रमाय नि मायं एवं लिलीङो रात्वम्वेत्यादिं विलीयं विलायं नत्काले ः
पि क्वचित् नेत्रे संमील्य हसति मुखं व्यादाय स्वपिति पौनःपुन्येणमुपदं द्वित्वं समानकर्तृकेषु धातुषु प्रयुज्यमानेषु पूर्वकाले धातोर्णमुल् क्त्वा चणमन्त
स्य पदस्य द्विर्वचनम् पायंपायं इच्छति भोजंभोजं स्मारंस्मारं मितां ह्रस्वनामिणिणमि च वा दीर्घः गामंगामं गमंगमं लाभंलाभं लंभंलं
भम् कथमादिषु स्वार्थे कृञो णमुल् कथंकारं अन्यथाकारं एवंकारं इत्थंकारं पठति एवंकारं पठतीत्यर्थः ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

स्मारं २ पक्षे स्मृत्वा २ गम्लृ गतौ अन्तादत्स्यात् णमि कृते जनीजृष्वसमंतत्वान् मितृ डुलभष् प्राप्तौ मंज्ञायां मितां ह्रस्व इति ह्रस्वे कृते मितां ह्रस्वनामिणिणमि चेति वा दीर्घः गामं २
गमम् २ पक्षे गत्वा २ डुलभष् प्राप्तौ अस्मात् णमि कृते लभेरिणामोरिति वा नुम् लंभम् २ नुमभावे वृद्धिः लाभम् २ पक्षे लब्ध्वा २ कथमादिषु स्वार्थेषु कृञो णमुल् कथमित्थम
न्यथैवमित्यादिषूपपदेषु कृञो णमुल् स्यात् यदि कृञ् प्रयोगानर्हः स्यात कथंकारं पठति कथं पठतीत्यर्थः अन्यथाकारं भुंक्ते अन्यथा भुंक्ते इत्यर्थः एवंका
रं करोति एवं करोतीत्यर्थः इत्थंकारं वदति इत्थं वदतीत्यर्थः प्रयोगानर्ह इति किम् शिरोऽन्यथा कृत्वा भुंक्ते ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

सि॰चं॰ अग्रेप्रथमपूर्वेषूपपदेषु क्त्वाणमुलौ वा पौनःपुन्ये इति नानुवर्त्तते एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः अग्रे इति सप्तम्यंतस्यानुकरणं प्रकृतिवदनुक
कौ॰उ॰ रणमिति स्यस्यैव कस्मिकत्वाद्विभक्तेर्लुक् न कृतः अग्रेभोजं अग्रेभुक्त्वा वा व्रजति अग्रेम्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीत्यर्थः पक्षे लडादयः अग्रेभुंक्ते पौनःपुन्ये तु
५१ नित्यमेव णमुल् क्त्वा च अग्रेभोजं २ भुक्त्वा २ वा व्रजति कर्मण्याक्रोशे कृञः खमुञ् कर्मण्युपपदे आक्रोशे गम्ये करोतेः खमुञ् स्यात् खमुञ् प्रत्ययमाह खि

अग्रेप्रथमपूर्वेषूपपदेषु क्त्वाणमुलौ वा॰ अग्रेभोजं व्रजति॰ अग्रेभुक्त्वा॰ प्रथमम्भोजम्॰ प्रथमम्भुक्त्वा॰ पूर्वम्भुक्त्वा॰ पूर्वम्भोजम्॰ पक्षे प्रत्ययाभा
वः॰ अग्रेभुंक्ते ततो व्रजति॰ आभीक्ष्ण्ये तु पूर्वेण नित्यमेव णमुल्॰ अग्रेभोजं भोजं व्रजति॰ कर्मण्याक्रोशे कृञः ४ खमुञ्॰ चौरंकारमाक्रोश
ति॰ चौरशब्दमुच्चार्येत्यर्थः॰ स्वाद्वर्थेषु स्वादुमर्थेषु कृञो णमुल्स्यादेककर्तृकयोः पूर्वकाले पूर्वपदस्य मान्तत्वं निपात्यते॰ अस्वादुं स्वादुं कृत्वा
भुंक्ते स्वादुंकारं भुंक्ते॰ सम्पन्नंकारम्॰ लवणंकारम्॰ सम्पन्नलवणशब्दौ स्वादुपर्यायौ क्त्वापि स्वादुं कृत्वा भुंक्ते॰ यथातथयोरसूयाप्रतिव
चने कृञः सिद्धाऽप्रयोगे णमुल्॰ यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन॰ सिद्धाप्रयोगे किं॰ सिद्धं कृत्वा भुंक्ते॥ ६ ॥ ६ ॥

त्वात्विति पदस्येति मुमजित्वाद्वृद्धिः॰ उकार उच्चारणार्थः॰ करोतिरुच्चारणेऽर्थे वर्तते अत्र चौरंकारमाक्रोशति चौरशब्दमुच्चार्येत्यर्थः॰ स्वाद्वर्थेषु स्वादुमर्थेषु कृञो णम
ल् स्वादुपर्यायेषूपपदेषु एककर्तृकयोः पूर्वकाले करोतेर्णमुल् स्यात् पूर्वपदस्य मान्तत्वं निपात्यते यथातथयोरसूयाप्रतिवचने यथातथयोरुपपदयोः कृञः सिद्धाऽप्रयोगेण
मु॰ करोतेः सिद्धाऽप्रयोगे णमुल् स्यात् सिद्धः अप्रयोगोऽस्य एवंभूतश्चेत् कृञ् व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः गुणेषु दोषारोपणमसूया असूयया प्रतिवचनं असूयाप्रतिवचनं तस्मिन् राम
वाच्ये सति यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये यथा भोक्ष्ये अहं तथा भोक्ष्ये इत्यर्थः॥ ५१

॥ ॥

कर्मणि दृशिविदोः साकल्ये कर्मण्युपपदे दृशिविदोर्णमुल्स्यात् साकल्ये सकलस्य भावः साकल्यं तस्मिन् दृशिर् प्रेक्षणे विद् ज्ञाने विद्लृ लाभे विद विचारणे इति त्रया
णां ग्रहणम् यावति विंदजीवोः यावच्छब्दे उपपदे विद्लृ लाभे जीव प्राणधारणे आभ्यां णमुल्स्यात् कर्मणि चर्मोदरयोः पूरेः चर्मोदरयोः कर्मणोरुपपदयोः पूरी
आप्यायने अस्मात् णमुल्स्यात् चर्मपूरं स्तृणाति आच्छादयतीत्यर्थः कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये णमुल्स्यात् समुदायेन वर्षप्रमाणे गम्येव

कर्मणि दृशिविदोः साकल्ये कन्यादर्शं वरयति सर्वाः कन्या इत्यर्थः। ब्राह्मणवेदं भोजयति। यं यं ब्राह्मणं जानाति लभते विचारयति
वा तं तं सर्वं भोजयतीत्यर्थः। यावति विन्दजीवोः। यावद्वेदं भुंक्ते। यावल्लभते तावदित्यर्थः। यावज्जीवमधीते विप्रः। कर्मणि चर्मोद
रयोः पूरेः। चर्मपूरं स्तृणाति। उदरपूरं भुंक्ते। कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये णमुल्। गोष्पदप्रमाणं वृष्टो देवः। गोष्पदपूरम्वा।
मूषिकाबिलप्रं वृष्टो देवः। मूषिकाबिलपूरम्वा। चैलार्थे क्नूपः कर्मसूपपदेषु क्नोपेर्वर्षप्रमाणे णमुल्। चैलक्नोपं वृष्टो देवः। वस्त्रक्नोपम्। वस
नक्नोपम्। निमूलसमूलयोः कषः। कषादिषु यथाविध्यनुप्रयोगः प्रयोक्तव्यः। अत्र प्रकरणे पूर्वकाल इति न संबध्यते असंभवात् प्रतीतेश्च
निमूलकाषं कषति समूलकाषं कषति निमूलं समूलं वा कषतीत्यर्थः। २

र्षं वृष्टिरित्यमरः वर्षस्य वृष्टेः प्रमाणं वर्षप्रमाणं तस्मिन् चैलार्थेषु क
र्मसूपपदेषु क्नोपेर्वर्षप्रमाणे चैलमर्थो येषां तानि चैलार्थानि तेषु कर्मसूपपदेषु क्नूयी शब्दे उंदे च ण्यंतादस्मात् णमुल्स्यात् क्नूय धातोः प्रयोजके णि
प्रत्यये कृते ह्रीव्लीरीक्नूयीक्ष्माय्यातां पुक् यवयोर्वसे हकारे चेति यलोपः पुकीति गुणः क्नोपीति ण्यंतात् णमुल् णेरनिटीति णिलोपः चैलं क्नोप
यस्माद्दूरीकरोतीति चैलक्नोपं निमूलसमूलयोः कषः निमूलसमूलयोः कर्मणोरुपपदयोः कषहिंसायामस्मात् धातोर्णमुल्स्यात् ॥ ६ ॥ ॥
॥
॥

शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः एषु कर्मसूपपदेषु पिष्लृ संचूर्णने ऽस्माद्धातोर्णमुस्यात् समूलाकृतजीवेषु हनकृञ्ग्रहां णम् समूलादिषु कर्मसूपपदेषु हनादि
भ्यो णमुस्यात् हनादीनामेव यथाविध्यनुप्रयोगश्च कर्त्तव्यः समूलोपपदाद्धन्तेर्णमि कृते हनो घदिति घत् ततोऽत उपधाया इति वृद्धिः समूलघातं जीवोपपदा
द्ग्रहातेर्णमि कृते वृद्धिः जीवग्राहं जीवनीति जीवः नाम्युपधात्किः जीवं तं गृह्णातीत्यर्थः करणे हनः करणकारकोपपदात् हन्तेर्णमु स्यात् हंतेरन्नुप्रयोगश्च

शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषम्। रूक्षपेषम्। समूलाकृतजीवेषु कर्मसु हन्कृञ्ग्रहां
णम्। समूलघातं हन्ति समूलं हन्तीत्यर्थः। अकृतकारं करोति। जीवग्राहं गृह्णाति जीवं गृह्णातीत्यर्थः। करणे हनः। पादघातं हन्ति पादेन ह
न्तीत्यर्थः। स्नेहने पिषः। उदपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः। हस्तार्थे करणे वर्तिग्रहोः। हस्तवर्त्तं वर्त्तयति करवर्त्तम्। हस्तेन गुटिकां
करोतीत्यर्थः। हस्तग्राहं गृह्णाति करग्राहम्। पाणिग्राहम्। धनार्थे करणे पुषः। धनपोषं पुष्णाति। स्वपोषम्। गोपोषम्॥ आधारे
बन्धः। चक्रबन्धं बध्नाति। चक्रे बध्नातीत्यर्थः॥ ९॥

११ निससमासार्थमिदं सूत्रं भिन्नधातुसंबंधेतु हिंसार्थानामिति वक्ष्यते स्नेह
ने पिषः स्नेहनकरणोपपदात् पिष्लृ संचूर्णने ऽस्मात् णमुस्यात् स्निह्यते येन तत् स्नेहनं तस्मिन् पेषं वा सवा हनषिषु परेषु उदकस्योदादेशो वक्तव्यः इत्यु
दादेशः उदपेषं हस्तार्थे करणे वर्तिग्रहोः हस्तार्थकरणकारकोपपदाभ्यां वर्तिग्रहिभ्यां णमुस्यात् अनयोर्यथाविध्यनुप्रयोगश्च वृतु वर्त्तने ण्यंतादस्मात्
णमि कृते णेरिति णिलोपः हस्तवर्तं हस्तग्राहम् गृह्णाति हस्तेन गृह्णातीत्यर्थः धनार्थे करणे पुषः धनपर्यायविशेषे चोपपदेषु पुष पुष्टौ अस्मात् णमुस्यात्
अनुप्रयोगश्च आधारे बंधः अधिकरणोपपदाद्बंध बंधनेऽस्मात् णमुस्यात् अनुप्रयोगश्च॥

संज्ञायां बन्धोनेः संज्ञायां वाच्यायाम् अस्मात् णमुस्यात् कर्त्रोर्जीवपुरुषयोर्नशिवहोः जीवपुरुषकर्तृकोपपदाभ्यां नश अदर्शने वह प्रापणे आभ्यां णमुस्यात् यथावि ध्यनुप्रयोगश्च ऊर्द्धे कर्तरि शुषिपूरोः ऊर्द्धे कर्त्रोपपदाभ्यां शुष शोषणे पूरी आप्यायने आभ्यां णमुस्यात् यथा अनयोरनुप्रयोगश्च ऊर्द्धशोषं शुष्यति वस्त्रादि ऊर्द्धे व तिष्ठन् शुष्यतिरस्यार्थः ऊर्द्धपूरं पूर्य्यते ऊर्द्धमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः उपमाने कर्मणि कर्तरि च उपमानवाचके कर्तरि कर्मणि चोपपदे धा

संज्ञायां बन्धातेः क्रौञ्चबन्धं बद्धः मयूरिकाबन्धं बद्धः अट्टालिकाबन्धम् बद्धः बन्धविशेषाणां संज्ञा एताः कर्त्रोर्जीवपुरुषयोर्नशिवहोः जीव नाशं नश्यति जीवो नश्यतीत्यर्थः पुरुषवाहं वहति पुरुषो वहतीत्यर्थः ऊर्द्धे कर्तरि शुषिपूरोः ऊर्द्धशोषं शुष्यति ऊर्द्धः शुष्यतीत्यर्थः ऊर्द्ध पूरं पूर्य्यते ऊर्द्धः पूर्य्यत इत्यर्थः उपमाने कर्मणि कर्तरि च घृतं निधाय विहितं जलम् घृतमिव सुरक्षितमित्यर्थः अजनाशं नष्टः अज इव नष्ट इत्यर्थः कषादिषु यस्मात् णमु विहितस्तस्य एवानुप्रयोक्तव्यः तथैवोदाहृतम् उपदंशस्तृतीयायाम् इतः प्रभृति पूर्वकाल इति संबध्यते। मूल कोपदंशं भुङ्क्ते मूलकेनोपदंशम् दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीयायं यद्यप्युपदंशिना सह न शाब्दः संबंधः तथापि भु जिनार्थः हिंसार्थानां चानुप्रयोगधातुना समानकर्मणां तृतीयान्ते उपपदे दण्डोपघातं गाः कालयति दण्डेनोपघातम् दण्डताडं दण्डेन ताडम् वा समानकर्मकाणां किम् दण्डेन चौरमाहत्य गाः कालयतीत्यर्थः ११ तोर्णमुस्यात् तस्यैव धातोरनुप्रयोगश्च उपदंशस्तृतीयायां तृतीयान्तोपपदादुपदंशेर्णमुस्यात् मूलकोपदंशं वा कामपि च मूलकेनोपदंशं हिंसार्थानामनुप्रयोगधातुना समानकर्मणां तृतीयान्ते उपपदे तृतीयान्तो पपदादनुप्रयोगधातुना सह समानकर्मकाद्धिंसार्थाण्णमुस्यात् हन्तेर्णमि रूते हनो घ दिति घत् वृद्धिः दंडोपघातं गाः कालयति कलविक्षेपे चुरादिः प्रेरयतीत्यर्थः दंडेना

॥ ॥

सि॰ चं॰ सप्तम्यांतृतीयायांचोपपदे उपपीडरुधकर्षः सप्तमीतृतीयांतोपपदे भ्य उपपूर्वेभ्यः पीडादिभ्योणमुस्यात् इह सूत्रे पीडादीनांसमाहारद्वंद्वं कृत्वा उपपूर्वः पीडारु
कृ॰ उ॰ धकर्षइसुत्तरपदलोपीसमासः कर्तव्यः सूत्रेपुंस्त्वंसौत्रंज्ञेयंपंचम्यर्थेप्रथमाचज्ञेयापीडपीडायांरुधिर्आवरणेकृषविलेखनेअयंभौवादिकएवगृह्यतेगुणस
५३ धकर्षइसुत्तरपदलोपी हिनस्यकृषेरपानिर्देशानत्तस्कलंतुदादेर्स्तुदासः यद्यपिविलेखनेएवतौदादिकोपिपठ्यतेतथापिसैत्रविषयकविलेखनेएवतौदादिकः प्रयुज्यतेएवंचतौ
दादिकात्कर्षेःक्यप्प्रत्ययएवभवतिसेत्रेउपकृष्यहलेनोपकृष्येतितृतीयासप्तम्योरुपपदयोःसन्निकर्षेधातोःतृतीयासप्तम्युपपदाद्धातोर्णमुस्यात्सन्नि

सप्तम्यांतृतीयायाञ्चोपपदेउपपीडरुधकर्षः पार्श्वोपपीडंशेते पार्श्वाभ्यामुपपीडम् पार्श्वयोरुपपीडम्वा व्रजोपरोधंगाःस्थापयति
व्रजेनोपरोधम् पाण्युपकर्षंधानाःसंगृह्णाति पाणावुपकर्षम् पाणिनोपकर्षम् तृतीयासप्तम्योरुपपदयोःसंनिकर्षेधातोः॥ केशग्रा
हंयुध्यंते केशेषुगृहीत्वायुध्यंतइत्यर्थः हस्तग्राहंहस्तेनगृहीत्वा तृतीयासप्तम्योःप्रमाणेगम्येधातोः द्व्यंगुलोत्कर्षंखण्डिकांछिनत्तीति द्व्यं
गुलेनद्व्यंगुलेवोत्कर्षम् अपादानेद्वितीयायांचत्वरायांगम्यमानायांधातोः शय्योत्थायंधावति यष्टिग्राहंयुध्यन्ते लोष्टग्राहम् अपगुरोर्वा
णम्यातः॥

कर्षःसंबंधः तृतीयासप्तम्योःप्रमाणेगम्येधातोःतृतीयासप्तम्युपपदाद्धातोर्णमुस्यात्प्रमाणेगम्येद्वयोरंगुल्योःसमाहारोद्व्यंगुलंद्व्यंगुलोत्कर्षं
मद्व्यंगुलेनोपकृष्यपरिच्छिद्येत्यर्थः खंडिकांछिनत्तिइक्षुः खण्डःखण्डिकातां अपादानेद्वितीयायांचत्वरायांगम्य मानायांधातोःपंचमीद्वितीयांतोपपदाद्धा
तोर्णमुत्वरायांगम्यमानायां शय्योत्थायंधावति शय्यायाउत्थायधावतीत्यर्थः आतोयुगिति युक्उदःस्थास्तंभोरितिसलोपः यष्टिग्राहंयुध्यंतेएवंख ग॰ भ॰ ५३
लुयुद्धायत्वरंतेयष्ट्यादिकमपिगृहीत्वाधावंतिनायुधंप्रतीक्षंतेइत्यर्थः अपगुरोर्वाणमुस्यातः॥ श्रीगणेश॥ ॐ॥ ॐ॥ ॐ॥
॥
॥

गुरौ उद्यमे इत्यस्यौकारस्यात्वेयास्यात् णमि प्रत्यये अस्यपगारं युध्यंते असिमुद्यम्येत्यर्थः अध्रुवे स्वांगे द्वितीयांते धातोः द्वितीयांतात् ध्रुवस्वांगोपप
स्यात् परिक्लिश्यमाने द्वितीयांते स्वांगे धातोः सर्वतो बाध्यमाने स्वांगे द्वितीयांते उपपदे सति धातोर्णमुस्यात् पिष्लृ संचूर्णने उरः प्रतिपेषं द्वितीयांते विशिपति
स्कंदां व्याप्यमानासेव्यमानयोर्गम्ययोः द्वितीयांतोपपदेभ्यो विश्यादिभ्यो णमुस्यात् व्याप्तावर्थे पौनःपुन्ये चार्थे गम्ये वीप्सायां पदं द्विरिति क्रियासमभिहारे द्वे इति

गुरौ उद्यमे अस्यपगारं युध्यन्ते अस्यपगोरमवा अध्रुवे स्वाङ्गे द्वितीयान्ते धातोः भ्रुविक्षेपं कथयति भ्रुवंविक्षेपम् अध्रुवे किम् शिर उत्क्षिप्य कथयति
येन विना न जीवनं तद्ध्रुवम् परिक्लिश्यमाने द्वितीयान्ते स्वाङ्गे धातोः उरः प्रतिपेषं युध्यन्ते कृत्स्नमुरः संपीडयित्वेत्यर्थः उरोविदारं प्र
तिचस्करे नखैः ध्रुवार्थमिदम् द्वितीयांते विशिपति पदि स्कंदां व्याप्यमानासेव्यमानयोर्गम्ययोः गेहादिद्रव्याणां विश्यादिक्रियाभिः
साकल्येन संबन्धो व्याप्तिः क्रियायाः पौनःपुन्यमासेवा गेहानुप्रवेशमास्ते गेहं गेहमनुप्रवेशम् एवं गेहानुप्रपातम् गेहानुप्रपाद
म् गेहानुस्कन्दम् असमासे गेहस्य णमन्तस्य च पर्य्यायेण द्वित्वम् गेहं गेहमनुप्रवेशं गेहमनुप्रवेशमनुप्रवेशम् क्रियांतरेषु कालेषु द्वितीयान्तेषूपपदेषु
क्रियाव्यवधाने वर्तमानयोरस्यतितृषोः द्व्यहात्यासं गाः पाययति द्व्यहमत्यासम् द्व्यहतर्षम् अत्यसनेन न तर्षणेन च गवां पान
क्रियाव्यवधीयते अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥ ॥ द्वित्वं तु न भवति समासेनैव वीप्सासमभिहारयोरुक्तत्वात् यद्यपि पौ
नःपुन्येण मुक्त एव न तथापि द्वितीयांतस्योपपदसंज्ञार्थे समासेवाय मिति पुनर्विधिः समासे गेहानुप्रवेशं असमासे गेहं गेहमनुप्रवेशमिति च क्रियांतरेषु काले
षु द्वितीयांतेषूपपदेषु क्रियाव्यवधाने वर्त्तमानयोरस्यतितृषोः क्रियामंतरयंति व्यवधानेनेति क्रियांतरास्तेषु क्रियांतरकालवाचिषु शब्देषु द्वितीयांतेषूपप
देषु सत्सु क्रियाः व्यवधाने वर्तमानाभ्यामसु क्षेपणे ञितृषपिपासायामाभ्यां णमुस्यात् ॥ श्री ॥ ९ ॥ श्री ॥ ६ ॥ श्री ॥ ६ ॥

सि.चं. नाम्निद्वितीयांतेऽव्यादिशिग्रहोः द्वितीयांते नामशब्दे उपपदाभ्यांम्आङ्पूर्वकदिशअतिसर्जनेग्रह उपादाने आभ्यांणमुस्यात् अव्ययेयथाभिप्रेताख्यानेकृ
कृ.उ. ञः क्त्वाणमौ वा अव्ययपूर्वपदात्करोतेः क्त्वाणमौ वास्तः अययथाभिप्रेताख्यानेर्थेयथाभिप्रेतंतथाख्यानमित्यर्थः अप्रियस्यनीचैः कथनंयथाभिप्रेताख्यानंतद्विपरी
५४ तं अयथाभिप्रेताख्यानमितितिर्यग्युपपदेसमाप्तौकृञः क्त्वाणमौवातिर्यक् शब्दे उपपदात्करोतेः क्त्वाणमौवास्तः समाप्तौगम्यमानायांसमाप्तौकिम् तिर्यक्कृत्वाकाष्ठंग

॥पुस्तकपं. हरिप्रशादजीकोदः संकरदयाल॥

नाम्निद्वितीयान्ते आदिशिग्रहोः नामादेशमाचष्टे नामग्राहंकथयति अव्ययेयथाभिप्रेताख्यानेकृञः क्त्वाणमौ वाअयथाभि प्रेताख्या नं
नाम अप्रियस्योच्चैः प्रियस्यनीचैः कथनम् उच्चैः कृत्य इति उच्चैः कृत्वा उच्चैः कारं वा ऽप्रियमाचष्टे नीचैः कृत्य इति नीचैः कृत्वा नीचैः
कारं वा प्रियंब्रूते तिर्य्यग्युपपदेसमाप्तौकृञः क्त्वाणमौ वातिर्य्यक्कृत्य गत इति तिर्य्यक्कृत्वा तिर्य्यक्कारम् समाप्यगत इत्यर्थः समाप्तौकिम् ति
र्य्यक्कृत्वाकाष्ठङ्गतः स्वाङ्गेतस्प्रत्यये कृभ्वोः मुखतः कृत्यगतः मुखतः कृत्वा मुखतः कारम् मुखतोभूयगत इति मुखतोभूत्वा मुखतोभावम्

तः अग्रतः स्थितं पार्श्वतः कृत्वागत इत्यर्थः स्वांगे तस्प्रत्यये कृभ्वोः तस्प्रत्ययांते स्वांगे उपपदे कृञ्करणे भू सत्तायामाभ्यांणमुस्यात् तस...
स्मान्नत् तस्प्रत्ययंतस्मिन्तस्प्रत्यये किम् मुखेनतस्यतीति मुखतः कृत्वा गतः तसु उपसंख्याने ऽस्मान्क्विपिकृते धातुत्वादिहत्व ऽत्वसोः सावितिदीर्घे

नाद्यार्थप्रत्ययान्ते च्व्यर्थे कृभ्वोः क्त्वाणमौ वा नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभूभ्यां क्त्वाणमौ वा स्तः विनञ्भ्यां नानाञाविति नाना अप्र-
विधाप्रत्ययः द्वित्रिभ्यां मेधाधमुञौ चेति एधाधमुञाविति नाधार्थप्रत्ययाः एवं द्वैधंकृत्येत्यादि प्रत्ययग्रहणम् किम् हिरुक् कृत्वा पृथक् कृत्वा हि
चेति रुद्रः हिरुग्युक्तं च सामीप्ये इत्यमरः नाना पृथक् विनान्तरेणर्ते हिरुक् नाना च वर्जने इत्यमरः तूष्णीं शब्दे भुवः क्त्वाणमौ तूष्णीं शब्दे उपपदे भुवो धातोः क्त्वा
सः अन्वग्चानुकूल्ये गम्ये अन्वक् शब्दे उपपदे भुवः क्त्वाणमौ वा स्तः वर्णात्कारः वर्णनिर्देशे वाच्ये स्वरात्कारप्रत्ययः स्यात् निर्देशोनुकरणम् कारप्रत्यय आ-

नाधार्थप्रत्ययान्ते च्व्यर्थे कृभ्वोः क्त्वाणमौ वा अनानां नानाकृत्य नाना कृत्वा नानाकारम् विनाकृत्य विना कृत्वा विनाकारम् नाना भूय नाना भूत्वा ना-
नाभावम् अनेकं द्रव्यमेकं कृत्वा एकधा कृत्य एकधा कृत्वा एकधाकारं एकधाभूय एकधाभूत्वा एकधाभावम् प्रत्ययग्रहणं किम् हिरुक् कृत्वा पृथग्भूत्वा तूष्णीं शब्दे भुवः क्त्वाणमौ तू-
ष्णीभूय मौनं तूष्णीं भूत्वा तूष्णीं भावम् अन्वक् चानुकूल्ये अन्वक् शब्दे भुवः क्त्वाणमौ वानुकूल्ये गम्ये अन्वग्भूय ते अन्वग्भूत्वा अन्वग्भावम्।
अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्ते इत्यर्थः आनुकूल्ये किम्। अन्वग्भूत्वा तिष्ठति पृष्ठतो भूत्वेत्यर्थः वर्णात्कारः अकारः इकारः वकारः रा-
द्रिफो वा रेफः रकारः लोकाच्छेषस्य सिद्धिर्यथा मातरादयः इति श्रीरामाश्रमविरचितायां सिद्धान्तचन्द्रिकायामुत्तरार्द्धं समाप्तं

इत्यग्रहणमत्र कर्तव्यम् तेन क्वचिन्नरादिको वारकारात्स्वराद्वा इकप्रत्ययः स्यात् लोकाच्छेषस्य सिद्धिर्यथा मातरादेः उक्तादन्यः शेषः अत्रानुक्तस्य सिद्धिः साधनं लो-
कादन्यव्याकरणात् ज्ञातव्यं यथा माता च पिता चेति मातरपितरौ मातरेतिनिपातनादिति श्रीमत्साठक धुर्य्यभक्तिविनयानन्दंतिसद्विद्ययानाशास्त्रविचारजातप-
मानन्दाः स्वभावोज्ज्वलाः संवेगादिगुणौर्वशीकृतजनाविख्यातकीर्तिप्रभास्तेषामस्तिविचक्षणो विनयवान् शिष्यः सदानन्दकः १निधिनंदावंभूवर्षे सदानंदः सुधीमुदे
सिद्धांतचंद्रिकावृत्तिं कृदन्ते कृतवान् जुमुदे इति कृदन्तं समाप्तम्॥६॥ इति श्रीसिद्धांतचंद्रिकायां व्याख्या सुबोधिनीसमाख्याता सदानंदी च समाप्ता॥ सं. १९४७ मि. आश्वि